[1] काव्यमाला ।

श्रीराघवचैतन्यविरचितं[2]

महागणपतिस्तोत्रम् ।

तच्छिष्यकृतया टिप्पण्या समेतम् ।

योगं योगविदां विधूतविविधव्यासङ्गशुद्धाशय-
प्रादुर्भूतसुधारसप्रसृमरध्यानास्पदाध्यासिनाम् ।
आनन्दप्लवमानबोधमधुरामोदच्छटामेदुरं
तं भूमानमुपास्महे परिणतं दन्तावलास्यात्मना ॥ १ ॥

वलो गजस्तस्येवास्यं मुखं यस्य स गजाननस्तदात्मना तद्रूपेण परिणतं तं ब्रह्मोपास्महे । कीदृशं तम् । आनन्दो ब्रह्मानन्दस्तेन प्लवमानः । लक्षणया भिन्न इत्यर्थः । इदृशो यो बोधस्तेन चिदानन्दमयं स्वरूपमुक्तम् । तद्विवर्तरूपः मधुरामोदच्छटात्वेन रूपितस्तेन मेदुरम् । पुनः कीदृशम् । योगविदां योगम् । योगविदाम् । विधूतो विविधो व्यासङ्गो यैरत एव शुद्धो य आशयस्तस्मिन्प्रा- धारसः शान्तिसुखं येषां ते च ते प्रसृमरं प्रसारि ध्यानं यस्मिन्नीदृशं यदास्पदं तादध्यासिनश्च तेषाम् ॥

तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदु-
स्तस्मै स्तात्प्रणतिर्गणाधिपतये यो रागिणाभ्यर्थ्यते ।
आमन्त्र्य प्रथमं वरेति वरदेत्यार्तेन सर्वं जनं
स्वामिन्मे वशमानयेति सततं स्वाहादिभिः पूजितः ॥ २ ॥

---

१. ...ार्यारम्भे विघ्नविघाताय देवतास्मरणं कर्तव्यमिति शिष्टाचारमनुसरद्भिरस्माभिरपि ...प्रारम्भे देवतास्तुतिरूपाण्येव कानिचित्काव्यानि समुद्धृतानीति ज्ञातव्यं

२. राघवचैतन्यनामा कश्चिन्महाकविः शार्ङ्गधरात्प्राचीन आसीत्, यतः शार्ङ्ग- ...मध्ये राघवचैतन्यनाम्ना केचिच्छ्लोकाः समुद्धृताः सन्ति. शार्ङ्गधरस्य पितामहो ...नामा हम्मीरचौहाणसभायामासीत्. हम्मीरस्तु १२९५ मिते ख्रिस्तसंवत्सरे मृतः. ...स्यैव संन्यासग्रहणानन्तरं राघवचैतन्य इति नाम जातमिति भाति.

महागणपतिमन्त्रमुद्धरति—तारः प्रणवः, श्रीर्लक्ष्मीबीजम्, परशक्ति कामः कामबीजम्, वसुधा भूमिबीजम्, इति पञ्चरूपाणां बीजानामनु गमितं विदुस्तस्मै गणाधिपतये प्रणतिः स्तादिति योजना । यः सततं दिभिः शक्तिभिः पूजितः । आर्तेन रागिणा प्रथमं वरेति ततो वरदेत्याम अभ्यर्थनामेवाह—सर्वं जनं स्वामिन्मे वशमानयेति । स्वाहादिभिरित्यनेन मन्त्रः । अत्राधिपदं सर्वमिति च पदं छन्दोनुरोधादुक्तम् । मन्त्रे तु गणपतये त मित्येकमेव पदम् । स्वामिन्निति च मन्त्राद्बहिर्भूतम् ॥

कल्लोलाञ्चलचुम्बिताम्बुदतताविक्षुद्रवाम्भोनिधौ
द्वीपे रत्नमये सुरद्रुमवनामोदैकमेदस्विनि ।
मूले कल्पतरोर्महामणिमये पीठेऽक्षराम्भोरुहे
षट्कोणाकलितत्रिकोणरचनासत्कर्णिकेऽमुं भजे ॥ ३

कल्लोलानां महोर्मीणामञ्चलाः प्रान्तास्तैराश्लिष्टा मेघततिर्येनैतादृश इक्षुरस द्रुमाणां पारिजातादीनां वनं तदामोदेन परिपुष्टे । रत्नमयं द्वीपं वारिमध्यस्थं कल्पतरोर्मूले महामणिमयं पीठं तत्र षट्कोणयुक्तत्रिकोणकर्णिकायुक्तेऽक्षराम्भो प्रसिद्धे मातृकाकमलेऽमुं महागणपतिं भजे ॥

चक्रप्रासरसालकार्मुकगदासद्बीजपूरद्विज-
व्रीह्यग्रोत्पलपाशपङ्कजकरं शुण्डाग्रजाग्रद्घटम् ।
आश्लिष्टं प्रियया सरोजकरया रत्नस्फुरद्भूषया
माणिक्यप्रतिमं महागणपतिं विश्वेशमाशास्महे ॥ ४ ॥

चक्रं प्रसिद्धम्, प्रासस्त्रिशूलः, रसालकार्मुकमिक्षुधनुः, गदा प्रसिद्धा, बीज ङ्गिलः, द्विजः स्वकीयो दन्तः, व्रीह्यग्रं शालिमञ्जरी, उत्पलं प्रसिद्धम्, पा प्रसिद्धौ, एवं दशायुधानि करेषु यस्य । शुण्डाग्रे पुष्करे जाग्रत्स्थितो घटो रत्न कुम्भो यस्य । कमलहस्तया प्रियया दक्षिणहस्तेनालिङ्गितं माणिक्यप्रतिमं सर्वेश्वरं महागणपतिमाशास्महे ॥

दानाम्भःपरिमेदुरप्रसृमरव्यालम्बिरोलम्बभृ-
त्सिन्दूरारुणगण्डमण्डलयुगव्याजात्प्रशस्तिद्वयम् ।
त्रैलोक्येष्टविधानवर्णसुभगं यः पद्मरागोपमं
धत्ते स श्रियमातनोतु सततं देवो गणानां पतिः ॥ ५ ॥

दानाम्भसा मदाम्बुना परिमेदुरं व्याप्तं प्रसृमरान्व्यालम्बिनो रोलम्बा भर्तीति प्रसृमरव्यालम्बिरोलम्बभृत् । सिन्दूरेणारुणमेतादृशं कुम्भप्रदेशद्वयं त

च्छविधानवर्णसुभगं त्रिभुवनशुभविध्यक्षरमनोज्ञम् । पद्मरागोपमं पद्मरागो लोहि-
...पमं प्रशस्तिद्वयं यो धत्ते स गणानां पतिर्देवः सततं श्रियमातनोतु । यथा
...लिप्ते दारुफलके रक्तचूर्णं दत्त्वाक्षराणि, तथा दानाम्बुलिप्ते सिन्दूरवति कुम्भस्थले
...इत्युक्तं भवति ॥

भ्राम्यन्मन्दरघूर्णनापरवशक्षीराब्धिवीचिच्छटा-
सच्छायाश्चलचामरव्यतिकरश्रीगर्वसर्वंकषाः ।
दिक्कान्ताघनसारचन्दनरसासाराः श्रयन्तां मनः
स्वच्छन्दप्रसरप्रलिप्तवियतो हेरम्बदन्तत्विषः ॥ ६ ॥

...म्बदन्तत्विषो मनः श्रयन्ताम् । किंभूताः । भ्राम्यतो मन्दरस्य घूर्णनावृत्तयस्त-
...ग्न क्षीराब्धेर्वीचयो लहर्यस्तासां छटा अग्रभागास्तैः सदृशाः । पुनः कीदृशाः ।
...मारव्यतिकरश्रीगर्वसर्वंकषाः । व्यतिकरो व्यतिषङ्गः । दिक्कान्तेत्यादिरूपकम् । घ-
...कर्पूरः । तथा स्वच्छन्दप्रसरप्रलिप्तवियतोऽनल्पसंचाराकीर्णाकाशाः । एतेन त्विषां
...व्यज्यते ॥

मुक्ताजालकरम्बितप्रविकसन्माणिक्यपुञ्जच्छटा-
कान्ताः कम्बुकदम्बचुम्बितवनाभोगप्रवालोपमाः ।
ज्योत्स्नापूरतरङ्गमन्थरतरत्संध्यावयस्याश्चिरं
हेरम्बस्य जयन्ति दन्तकिरणाकीर्णाः शरीरत्विषः ॥ ७ ॥

...क्तिकसमूहमिश्रितप्रदीप्तमाणिक्यसमूहच्छटावत्कान्ता मनोहराः । शङ्खसमूहसंगत-
...र्णविद्रुमसमाः । ज्योत्स्नापूरतरङ्गे मन्थरं तरन्ती चासौ संध्या च तस्या वयस्याः
...सख्यः । एतादृशा हेरम्बस्य दन्तकिरणैर्व्याप्ताः शरीरत्विषश्चिरं जयन्ति ॥

शुण्डाग्राकलितेन हेमकलशेनावर्जितेन क्षर-
न्नानारत्नचयेन साधकजनान्संभावयन्कोटिशः ।
दानामोदविनोदलुब्धमधुपप्रोत्सारणाविर्भव-
त्कर्णान्दोलनखेलनो विजयते देवो गणग्रामणीः ॥ ८ ॥

...ण्डाग्रधृतसुवर्णकलशसंगृहीतेन क्षरता बहुत्वाद्बहिरपि निर्गच्छता मुक्तामाणिक्या-
...समूहेन कोटिशः साधकजनान्संभावयन्नसंख्यातानुपासकान्संपदा वर्धयन् । दाने-
... । आमोदो गन्धहर्षयोः । प्रोत्सारणमुच्चाटनं तदर्थमाविर्भवत्कर्णान्दोलनक्रीडः ।
...मणीश्वरो देवो विजयते ॥

हेरम्बं प्रणमामि यस्य पुरतः शाण्डिल्यमूले श्रिया
बिभ्रत्याम्बुरुहे समं मधुरिपुस्ते शङ्खचक्रे वहन् ।

न्यग्रोधस्य तले सहाद्रिसुतया शंभुस्तया दक्षिणे ।
बिभ्राणः परशुं त्रिशूलमितया पाशाङ्कुशाभ्यां शुभम् ॥ ९ ॥

शाण्डिल्यमूले बिल्ववृक्षस्याधो यस्य महागणपतेः पुरतोऽग्रभागे पद्मे बिभ्रत्या श्रिया समं ते प्रसिद्धे शङ्खचक्रे वहन्मधुरिपुर्विष्णुरस्ति । तथा यस्य दक्षिणे न्यग्रोधस्य तले वटवृक्षाधः पाशाङ्कुशाभ्यामितया सहितयाद्रिसुतया पार्वत्या सह परशुं त्रिशूलं च बिभ्राणः शंभुः शिवोऽस्ति ॥

पश्चात्पिप्पलमाश्रितो रतिपतिर्देवस्य रत्योत्पले
बिभ्रत्या सममैक्षवं धनुरिषून्पौष्पान्वहन्पञ्च च ।
वामे चक्रगदाधरः स भगवान्क्रोडः प्रियंगोस्तले
हस्तोद्यच्छुकशालिमञ्जरिकया देव्या धरण्या सह ॥ १० ॥

देवस्य पश्चिमे पिप्पलवृक्षस्याध उत्पले बिभ्रत्या रत्या सममैक्षवं धनुः पञ्च पौष्पानिषूंश्च वहन्रतिपतिः कामदेवोऽस्ति । अस्य च वामे प्रियंगुवृक्षाधो हस्तोद्यच्छुकशालिमञ्जरिकयैकस्मिन्करे कीरमन्यत्र कलमकणिशं बिभ्रत्या धरण्या सह स प्रसिद्धो भगवान्क्रोडो वराहोऽस्ति तं हेरम्बं प्रणमामीति पूर्वेणान्वयः ॥

षट्कोणाश्रिषु षट्सु षड् गजमुखाः पाशाङ्कुशाभीवरा-
न्बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मपुञ्जत्विषः ।
आमोदः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्तेति च ॥ ११ ॥

षट्कोणस्य पीठस्य षट्स्वश्रिषु पालीषु षड् गजमुखा ध्येयाः। कीदृशास्ते । पाशाङ्कुशाभयवरान्हस्तेषु बिभ्राणाः । प्रमदानां सखाय इति प्रमदासखाः । भार्यासहिता इत्यर्थः । पृथुश्चासौ महाशोणाश्मनां पद्मरागाणां पुञ्जस्तद्वत्त्विट् कान्तिर्येषां ते । यदि 'पृथुमहाः' इति विसर्गान्तः पाठस्तदाभिन्नं पदम् । पृथुर्महो येषां ते । अकारान्तोऽपि महशब्दोऽस्ति। तेषां नामान्याह—पुरतोऽग्रकोण आमोदः । तं चामोदमभितः प्रमोदसुमुखौ । पुरः कल्पितपूर्वदिगपेक्षयाग्निकोणे प्रमोदः, एवमीशानकोणे सुमुख इत्यर्थः । पश्चात्पश्चिमकोणे दुर्मुखः । अस्य दुर्मुखस्य विघ्न इति यस्य नाम स एकस्मिन्पार्श्वे, विघ्नकर्तेति यस्य नाम स द्वितीयपार्श्वेऽस्ति । अर्थादेको नैर्ऋत्यकोणे, अपरो वायव्ये वर्तते ॥

आमोदादिगणेश्वरप्रियतमास्तत्रैव नित्यं स्थिताः
कान्ताश्लेषरसज्ञमन्थरदृशः सिद्धिः समृद्धिस्ततः ।
कान्तिर्या मदनावतीत्यपि तथा कल्पेषु या गीयते
सान्या यापि मदद्रवा तदपरा द्राविण्यमूः पूजिताः ॥ १२ ॥

क्रान्तस्य स्वस्वभर्तुरालिङ्गनरसं जानन्त्यत एव मन्थरा रागिणी दृग्यासां ताः । आ-
द्यर्द्धीनां पूर्वश्लोकोक्तानां षण्णां भार्यास्तेषां समीपे स्थिता ध्येयाः । तासां नामानि
—सिद्धिः, समृद्धिः, कान्तिः, मदनावती, मदद्रवा, द्राविणी चेति ॥

आश्लिष्टौ वसुधेत्यथो वसुमती ताभ्यां सितालोहितौ
वर्षन्तौ वसु पार्श्वयोर्विलसतस्तौ शङ्खपद्मौ निधी ।
अङ्गान्यन्वथ मातरश्च परितः शक्रादयोऽब्जाश्रया-
स्तद्बाह्ये कुलिशादयः परिपतत्कालानलज्योतिषः ॥ १३ ॥

वसुधया वसुमत्या च क्रमेणालिङ्गितौ शुक्लरक्तवर्णौ धनं वर्षन्तौ तौ शङ्खपद्मसंज्ञौ प्र-
द्धौ निधी षट्कोणपार्श्वयोर्विलसतः । तयोर्ध्यानं कुर्यादित्यर्थः । अनु निधिध्यानानन्तरं
याादि षडङ्गानि ध्यायेत् । परितो ब्राह्म्याद्या अष्ट मातरो ध्येयाः । षट्कोणाद्बहिःस्थिते-
दलकमल इन्द्रादयो दिक्पालास्तद्बाह्ये तेषां समीप एव परिपतत्कालानलज्योतिषः
ीप्तस्वरूपा इन्द्रादीनां हेतयो वज्राद्या ध्येयाः ॥

इत्थं विष्णुशिवादितत्त्वतनवे श्रीवक्रतुण्डाय हुं-
कारक्षिप्तसमस्तदैत्यपृतनाव्राताय दीप्तत्विषे ।
आनन्दैकरसावबोधलहरीविध्वस्तसर्वोर्मये
सर्वत्र प्रथमानमुग्धमहसे तस्मै परस्मै नमः ॥ १४ ॥

'हेरम्बं प्रणमामि' इति (९।१०) श्लोकाभ्यां विष्णुशिवादिस्वरूपैस्तनुर्मूर्तिर्यस्य स
स्मै । आदिपदात्स्मरक्रोडौ । हुंकारमात्रेण निरस्तसमस्तासुरसैन्यसमूहाय दीप्तकान्तये ।
ानन्देति । निरतिशयसुखस्फुरणतरङ्गैर्दूरीकृतसंपूर्णोर्मये । ऊर्मयः षड्भावविकाराः ।
च—जायते, अस्ति, वर्धते, विपरिणमते, अपचीयते, नश्यतीति च । आनन्दैकरसाव-
धलहरीभिर्विध्वस्ताः सर्वेषां साधकानामूर्मयः षडिन्द्रियजन्या वृत्तयो यस्मादि-
र्थः । ऊर्मिशब्देनाविद्यादयो योगशास्त्रप्रसिद्धाः क्लेशाः । सर्वत्र प्रथमानं मुग्धं सुन्दरं
हो यस्य तस्मै परस्मै जगतोऽन्यस्मै नमः ।

सेवाहेवाकिदेवासुरनरनिकरस्फारकोटीरकोटी-
कोटिव्याटीकमानद्युमणिसममणिश्रेणिभावेणिकानाम् ।
राजन्नीराजनश्रीसखचरणनखद्योतविद्योतमानः
श्रेयः स्थेयः स देयान्मम विमलदृशो बन्धुरं सिन्धुरास्यः ॥१५॥

सेवायां हेवाकोऽभिलाषो येषाम् । अहमग्रेऽहमग्रे भवामीतीच्छा । अहंपूर्विकेति या-
त् । ते च ते देवासुरनराणां समूहास्तेषां देदीप्यमानमुकुटाग्राणां या कोटिः संख्या-
विशेषस्तत्र व्याटीकमानाः सुसंगताः सूर्यतुल्यरत्नपङ्क्तिकान्तिप्रवाहास्तेषाम् । राजन्ती

नीराजनश्रीराराात्रिकशोभा तस्याः सखायस्ते च ते चरणनखाश्च तेषां द्योतेन प्रकाशेन, विद्योतमानः स प्रसिद्धः सिन्धुरास्यो गजमुखः । हे विमलदृशः पण्डिताः । मम बन्धुरं रम्यं स्थेयः स्थिरतरं श्रेयः कल्याणं देयात् । ममेत्यस्य वा विमलदृश इति विशेषणम् । 'विमलदृशा' इति पाठे तु सौम्यावलोकनेन श्रेयो दद्यादित्यर्थः ॥

एतेन प्रकटरहस्यमन्त्रमालागर्भेण स्फुटतरसंविदा स्तवेन ।
यः स्तौति प्रचुरतरं महागणेशं तस्येयं भवति वशंवदा त्रिलोकी॥१६॥

स्फुटतरसंविदेत्यनेन स्तोत्रे प्रसादगुणः सूचितः । प्रचुरतरं मुहुर्मुहुः । अन्यत्स्पष्टम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीराघवचैतन्यविरचितं महागणपतिस्तोत्रं तच्छिष्यकृतया टिप्पण्या समेतं समाप्तम् ।

श्रीलङ्केश्वरविरचिता

शिवस्तुतिः ।

गले[1] कलितकालिम प्रकटितेन्दु भालस्थले
विनाटितजटोत्करं रुचिरपाणिपाथोरुहे ।
उदञ्चितकपालकं जघनसीम्नि संदर्शित-
द्विपाजिनमनुक्षणं किमपि धाम वन्दामहे ॥ १ ॥

वृषोपरिपरिस्फुरद्धवलधाम धामश्रिया
कुबेरगिरि[2]गौरिमप्रभवगर्वनिर्वासि तत् ।
क्वचित्पुनरुमाकुचोपचितकुङ्कुमै रञ्जितं
गजाजिनविराजितं वृजिनभङ्गबीजं भजे ॥ २ ॥

उदित्वरविलोचनत्रयविसृत्वरज्योतिषा
कलाकर[3]कलाकरव्यतिकरेण चाहर्निशम् ।
विकासितजटाटवीविहरणोत्सवप्रोल्लस-
त्तरामरतरङ्गिणीतरलचूडमीडे मृडम् ॥ ३ ॥

---

१. 'गले कलितकालिम' इत्यादि धामविशेषणानि. २. कुबेरगिरिः कैलासः. स च सदैव हिमाच्छादितत्वादतिशुभ्रः. ३. कलानामाकरः कलाकरश्चन्द्रः. रलयोः सावर्ण्यात्कराणामाकरः किरणमाली सूर्योऽपि कलाकरः.

विहाय कमलालयाविलसितानि विद्युन्नटी-
  विडम्बनपटूनि मे विहरणं विधत्तां मनः ।
कपर्दिनि कुमुद्वतीरमणखण्डचूडामणौ
  कटीतटपटीभवत्करटिचर्मणि ब्रह्मणि ॥ ४ ॥

[1]भवद्भवनदेहलीविकटतुण्डदण्डाहति-
  त्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते ।
व्रजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं
  किमित्यमरसंपदः प्रमथनाथ नाथाम हे ॥ ५ ॥

त्वदर्चनपरायणप्रमथकन्यकालुण्ठित-
  प्रसूनसफलद्रुमं कमपि शैलमाशास्महे ।
अलं तटवितर्दिकाशयितसिद्धसीमन्तिनी-
  प्रकीर्णसुमनोमनोरमनमेरुणा[2] मेरुणा ॥ ६ ॥

न जातु हर यातु मे विषयदुर्विलासं मनो
  मनोभवकथास्तु मे न च मनोरथातिथ्यभूः ।
स्फुरत्सुरतरङ्गिणीतटकुटीरकोटौ वस-
  न्नये शिव दिवानिशं तव[3] भवानि पूजापरः ॥ ७ ॥

विभूषणसुरापगाशुचितरालवालावली-
  वलद्बहलसीकरप्रकरसेकसंवर्धिता ।
महेश्वरसुरद्रुमस्फुरितसज्जटामञ्जरी
  नमज्जनफलप्रदा मम[4] नु हन्त भूयादियम् ॥ ८ ॥

---

१. अयं श्लोकः श्रीमदप्पयदीक्षितैः कुवलयानन्देऽनुज्ञालंकारोदाहरण उदाहृतः. तत्र पूर्वार्धोत्तरार्धयोर्व्यत्ययः. व्याख्यातश्चेत्थं कुवलयानन्दटीकायां चन्द्रिकायाम्—'व्र-[illegible]ीति । हे प्रमथनाथ हर, पैशाचिकीं पिशाचसंबन्धिनीं प्रकृतिं पिशाचतामेत्य प्राप्य [illegible]तोऽन्तिकं समीपदेशं भजेम । अमरसंपदः किमिति प्रार्थयामहे । यतो मघवादिभिरि-[illegible]मुखैरपि भवद्भवनदेहलीषु विकटतुण्डस्य वक्रतुण्डस्य दण्डाघातैः स्फुटन्मुकुटाग्रैर्भूयत[illegible]भिः ॥'. २. 'छायावृक्षो नमेरुः स्यादिति शब्दार्णवः' इति मेघदूतटीकायां मल्लिनाथः. [illegible]रुः सुरपुंनागवृक्षो रुद्राक्षवृक्षश्च' इति शब्दार्थचिन्तामणिः. ३. 'भव' इति द्वितीयपु-[illegible]कपाठः. ४. 'तदिह किं न भूयामहे' इति द्वितीयपुस्तकपाठः.

बहिर्विषयसंगतिप्रतिनिवर्तिताक्षावलेः
समाधिकलितात्मनः पशुपतेरशेषात्मनः ।
शिरःसुरसरित्तटीकुटिलकल्पकल्पद्रुमं
निशाकरकलामहं वटु[1]विमृष्यमाणां भजे ॥ ९ ॥

त्वदीयसुरवाहिनीविमलवारिधारावल-
ज्जटागहनगाहिनी मतिरियं ममाक्रामतु ।
उपोत्तमसरित्तटीविटपिताटवीप्रोल्लस-
त्तपस्विपरिषत्तुलाममलमल्लिकाभ प्रभो[2] ॥ १० ॥

इति श्रीलङ्केश्वरविरचिता शिवस्तुतिः समाप्ता ।

महाकविश्रीकालिदासकृतं[3]

श्यामलादण्डकम्[4] ।

माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलोपलकोमलाङ्गीं मातङ्गकन्यां सततं स्मरामि ॥

---

१. 'वसुविमृष्यमाणम्' इति द्वितीयपुस्तकपाठः. २. अष्टमनवमदशमश्लोकाः किंचिदस्फुटा एव सन्तीति विचारयन्तु विद्वांसः. ३. कालिदासस्य समयादिकमद्यापि न निश्चयेन वक्तुं शक्यते. आरोहकभगदत्तजह्लणसंगृहीतसूक्तिमुक्तावलि-हरिकविसंगृहीतसुभाषितहारावल्यो राजशेखरनाम्ना समुद्धृतात् 'एकोऽपि जीयते हन्त कालिदासो न केनचित् । शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥' इत्यस्मात्पद्याज्ज्ञायते यद्राजशेखरात्पूर्वं त्रयः कालिदासाः समुत्पन्नाः. ते च कस्मिन्कस्मिन्देशे काले च प्रादुरभूवन्निति न ज्ञायते. अकबरीयकालिदासस्तु चतुर्थोऽर्वाचीनः. राजशेखरस्तु ख्रिस्तसंवत्सरस्य दशमे शतके समुत्पन्न इति पण्डितवर-रामकृष्ण-गोपाल-भाण्डारकरनिर्णयः. ४. मातङ्गीदेवीस्तुतिरूपोऽयं ग्रन्थः. अस्मिन्दण्डके सर्वत्र पादप्रारम्भे नगणद्वयम्. तदनन्तरं चानियतसंख्या रगणाः. तस्मान्मत्तमातङ्गलीलाकर इति नामास्य दण्डकस्य. तल्लक्षणं तु—'यत्र रेफान्कविः स्वेच्छया पाठसौकर्यसापेक्षया रोपयत्येष धीरैः स्मृतो दण्डको मत्तमातङ्गलीलाकरः.' अस्मिन्दण्डके पादपञ्चकं दृश्यते तल्लेखकादिदोषसमुद्भूतम्. अन्यथा तु पादचतुष्टयमेवापेक्षितम्. चण्डवृष्टिप्रपातादिषु तु पादप्रारम्भे नगणद्वयम्. तदनन्तरं सप्ताष्टादिनियता रगणा भवन्ति. अत्र त्वनियता इति भेदः.

जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय संगीतरसिके जय लीलाशुकप्रिये ॥

जय जननि सुधासमुद्रान्तरुद्यन्मणिद्वीपसंरूढबिल्वाटवीमध्यकल्पद्रुमा-
कल्पकादम्बकान्तारवासप्रिये कृत्तिवासःप्रिये सर्वलोकप्रिये । सादरारब्ध-
संगीतसंभावनासंभ्रमालोलनीपस्रगाबद्धचूलीसनाथत्रिके सानुमत्पुत्रिके ।
शेखरीभूतशीतांशुरेखामयूखावलीबद्धसुस्निग्धनीलालकश्रेणिशृङ्गारिते लोक-
संभाविते । कामलीलाधनुःसंनिभभ्रूलतापुष्पसंदोहसंदेहकृल्लोचने वाक्सुधा-
सेचने । चारुगोरोचनापङ्ककेलीललामाभिरामे सुरामे रमे । प्रोल्लसद्वालिका-
मौक्तिकश्रेणिकाचन्द्रिकामण्डलोद्भासिलावण्यगण्डस्थलन्यस्तकस्तूरिकापत्ररे-
खासमुद्भूतसौरभ्यसंभ्रान्तभृङ्गाङ्गनागीतसान्द्रीभवन्मन्द्रतन्त्रीस्वरे सुस्वरे
भास्वरे । वल्लकीवादनप्रक्रियालोलतालीदलाबद्धताटङ्कभूषाविशेषान्विते
सिद्धसंमानिते । दिव्यहालामदोद्वेलहेलालसच्चक्षुरान्दोलनश्रीसमाक्षिप्तक-
र्णैकनीलोत्पले पूरिताशेषलोकाभिवाञ्छाफले श्रीफले । स्वेदबिन्दूल्लसद्भा-
ललावण्यनिःष्यन्दसंदोहसंदेहकृन्नासिकामौक्तिके सर्वविश्वात्मिके कालिके ।
मुग्धमन्दस्मितोदारवक्त्रस्फुरत्पूगताम्बूलकर्पूरखण्डोत्करे ज्ञानमुद्राकरे सर्वसं-
पत्करे पद्मभास्वत्करे । कुन्दपुष्पद्युतिस्निग्धदन्तावलीनिर्मलालोकसंमेलनस्मे-
रशोणाधरे चारुवीणाधरे पक्वबिम्बाधरे ॥ १ ॥

सुललितनवयौवनारम्भचन्द्रोदयोद्वेललावण्यदुग्धार्णवाविर्भवत्कम्बुबिब्बो-
कभृत्कंधरे सत्कलामन्दिरे मन्थरे । दिव्यरत्नप्रभाबन्धुरच्छन्न[1]हारादिभू-
षासमुद्द्योतमानानवद्यांशुशोभे शुभे । रत्नकेयूररश्मिच्छटापल्लवप्रोल्लसद्दोर्ल-
ताराजिते योगिभिः पूजिते । विश्वदिङ्मण्डलव्यापिमाणिक्यतेजःस्फुर-
त्कङ्कणालंकृते विभ्रमालंकृते साधकैः सत्कृते । वासरारम्भवेलासमुज्जृम्भमा-
णारविन्दप्रतिद्वन्द्विपाणिद्वये संततोद्यद्दये अद्वये । दिव्यरत्नोर्मिकादीधिति-
स्तोमसंध्यायमानाङ्गुलीपल्लवोद्यन्नखेन्दुप्रभामण्डले संनताखण्डले चित्प्रभा-
मण्डले प्रोल्लसत्कुण्डले । तारकाराजिनीकाशहारावलिस्मेरचारुस्तनाभोग-
भारानमन्मध्यवल्लीबलिच्छेदवीचीसमुल्लाससंदर्शिताकारसौन्दर्यरत्नाकरे व-

१. छन्ननामको हस्तभूषणविशेषः. २. संपूर्णम्.

ल्लकीभृत्करे किंकरश्रीकरे । हेमकुम्भोपमोत्तुङ्गवक्षोजभारावनम्रे त्रिलोकावनम्रे । लसद्वृत्तगम्भीरनाभीसरस्तीरशैवालशङ्काकरश्यामरोमावलीभूषणे मञ्जुसंभाषणे । चारुशिञ्जत्कटीसूत्रनिर्भर्त्सितानङ्गलीलाधनुःशिञ्जिनीडम्बरे दिव्यरत्नाम्बरे । पद्मरागोल्लसन्मेखलाभास्वरश्रोणिशोभाजितस्वर्णभूभृत्तले चन्द्रिकाशीतले ॥ २ ॥

विकसितनवकिंशुकाताम्रदिव्यांशुकच्छन्नचारूरुशोभापराभूतसिन्दूरशोणायमानेन्द्रमातङ्गहस्तार्गले वैभवानर्गले श्यामले । कोमलस्निग्धनीलोपलोत्पादितानङ्गतूणीरशङ्काकरोदारजङ्घालते चारुलीलागते । नम्रदिक्पालसीमन्तिनीकुन्तलस्निग्धनीलप्रभापुञ्जसंजातदूर्वाङ्कुराशङ्कसारङ्गसंयोगरिङ्खन्नखेन्दूज्ज्वले प्रोज्ज्वले निर्मले । प्रह्वदेवेशलक्ष्मीशभूतेशतोयेशवाणीशकीनाशदैत्येशयक्षेशवाय्वग्निकोटीरमाणिक्यसंघृष्टबालातपोद्दामलाक्षारसारुण्यतारुण्यलक्ष्मीगृहीताङ्घ्रिपद्मे सुपद्मे उमे ॥ ३ ॥

सुरुचिरनवरत्नपीठस्थिते सुस्थिते । रत्नपद्मासने । रत्नसिंहासने शङ्खपद्मद्वयोपाश्रिते । तत्र विघ्नेशदुर्गाबटुक्षेत्रपालैर्युते । मत्तमातङ्गकन्यासमूहान्विते । मञ्जुलामेनकाद्यङ्गनामानिते भैरवैरष्टभिर्वेष्टिते । देवि वामादिभिः शक्तिभिः सेविते । धात्रिलक्ष्म्यादिशक्त्यष्टकैः संयुते । मातृकामण्डलैर्मण्डिते । यक्षगन्धर्वसिद्धाङ्गनामण्डलैरर्चिते । पञ्चबाणात्मिके । पञ्चबाणेन रत्या च संभाविते । प्रीतिभाजा वसन्तेन चानन्दिते । भक्तिभाजां परं श्रेयसे कल्पसे । योगिनां मानसे द्योतसे । छन्दसामोजसा भ्राजसे । गीतविद्याविनोदातितृष्णेन कृष्णेन संपूज्यसे । भक्तिमच्चेतसा वेधसा स्तूयसे । विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे ॥ ४ ॥

श्रवणहरणदक्षिणक्वाणया वीणया किंनरैर्गीयसे । यक्षगन्धर्वसिद्धाङ्गनामण्डलैरर्च्यसे । सर्वसौभाग्यवाञ्छावतीभिर्वधूभिः सुराणां समाराध्यसे । सर्वविद्याविशेषात्मकं चाटुगाथासमुच्चारणं कण्ठमूलोल्लसद्वर्णराजित्रयं कोमलश्यामलोदारपक्षद्वयं तुण्डशोभातिदूरीभवत्किंशुकं तं शुकं लालयन्ती परिक्रीडसे । पाणिपद्मद्वयेनाक्षमालामपि स्फाटिकीं ज्ञानसारात्मकं पुस्तकं चाङ्कुशं पाशमाबिभ्रती येन संचिन्त्यसे तस्य वक्त्रान्तराद्गद्यपद्यात्मिका भारती निःसरेत् ।

येन वा यावकाभाकृतिर्भाव्यसे तस्य वश्या भवन्ति स्त्रियः पूरुषाः । येन वा शातकुम्भद्युतिर्भाव्यसे सोऽपि लक्ष्मीसहस्रैः परिक्रीडते । किं न सिद्ध्येद्वपुः श्यामलं कोमलं चन्द्रचूडान्वितं तावकं ध्यायतः । तस्य लीलासरो वारिधिस्तस्य केलीवनं चन्दनं तस्य भद्रासनं भूतलं तस्य गीर्देवता किंकरी तस्य चाज्ञाकरी श्रीः स्वयम् । सर्वतीर्थात्मिके सर्वमन्त्रात्मिके सर्वतन्त्रात्मिके सर्वयन्त्रात्मिके सर्वशक्त्यात्मिके सर्वपीठात्मिके सर्वतत्त्वात्मिके सर्वविद्यात्मिके सर्वयोगात्मिके सर्वनादात्मिके सर्वशब्दात्मिके सर्वविश्वात्मिके सर्वदीक्षात्मिके सर्वसर्वात्मिके सर्वगे पाहि मां पाहि मां पाहि मां देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमः ॥ ९ ॥

माता मरकतश्यामा मातङ्गी मदशालिनी ।
कटाक्षयतु कल्याणी कदम्बवनवासिनी ॥

इति महाकविश्रीकालिदासकृतं श्मामलादण्डकं समाप्तम् ।

श्रीकुलशेखरनृपतिविरचिता

मुकुन्दमाला[1] ।

वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशङ्खदशनं शिशुगोपवेषम् ।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥

जयतु[2] जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ २ ॥

---

१. यद्यपीयं मुकुन्दमाला कलिकातामुद्रिते काव्यसंग्रहे मुम्बयीमुद्रितेषु स्तोत्रकलादिषु च मुद्रितास्ति, परंतूभयत्राप्यसंपूर्णाशुद्धा च, तस्मादस्माभिः पुनरपि गृहीता. अस्मत्पुस्तकं तु संपूर्णं शुद्धं कश्मीरदेशलिखितमास्ति. २. मुद्रितपुस्तकेषु प्रथमश्लोकादनन्तरमयं श्लोको दृश्यते—

'श्रीवल्लभेति वरदेति दयापरेति भक्तिप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासेत्यालापिनं प्रतिदिनं कुरु मां मुकुन्द ॥'

मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे भवे भवे मेऽस्तु भवत्प्रसादात् ॥ ३ ॥

श्रीमुकुन्दपदाम्भोजमधुनः परमाद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ४ ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेऽहं भवन्तम् ॥ ५ ॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्भाव्यं तद्भवतु भगवन्पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ६ ॥

दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ।
अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥ ७ ॥

सरसिजनयने सशङ्खचक्रे मुरभिदि मा विरमेह चित्त रन्तुम् ।
सुखकरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥ ८ ॥

मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ९ ॥

---

१. मुद्रितपुस्तकेषु नवमश्लोकादग्रे प्रक्षिप्तं श्लोकषट्कं वर्तते—

'भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारावृतानाम् ।
विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥
रजसि निपतितानां मोहजालावृतानां जननमरणदोलादुर्गसंसर्गगानाम् ।
शरणमशरणानामेक एवातुराणां कुशलपथनियुक्तश्चक्रपाणिर्नराणाम् ॥
अपराधसहस्रसंकुलं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १० ॥

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते सहजतनयग्राहसंघाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधाम-
न्पादाम्भोजे वरद भवतो भक्तिनावे[1] प्रसीद ॥ ११ ॥

पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघु-
स्तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा
दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ १२ ॥

आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं
मेदश्छेदपदानि पूर्तविधयः सर्वे हुतं भस्मति ।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
द्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ १३ ॥

आनन्द गोविन्द मुकुन्द राम नारायणानन्त निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनानि मोक्षे ॥ १४ ॥

क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ १५ ॥

मा मे स्त्रीत्वं मा च मे स्यात्कुभावो मा मूर्खत्वं मा कुदेशेषु जन्म ।
मिथ्यादृष्टिर्मा च मे स्यात्कदाचिज्जातौ जातौ विष्णुभक्तो भवेयम् ॥
कायेन वाचा मनसेन्द्रियैश्च बुद्ध्यात्मना वानुसृतिप्रभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायैव समर्पयामि ॥
यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् ।
त्वया कृतं तु फलभुक्त्वमेव मधुसूदन ॥

एषु श्लोकेषु 'भवजलधि–' इत्यादि प्रथमः श्लोकः सुभाषितावलीमध्ये वल्लभदेवेन क्षेमेन्द्रनाम्ना समुद्धृतः. अन्येऽपि केचिच्छ्लोकाः पुराणादिषु लभ्यन्ते. तस्मादत्र प्रक्षिप्ता एवेति ध्येयम्.

१. भवच्चरणारविन्दभक्तिरूपां नौकां देहि.

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणा-
दौदार्यादघशोषणादगणितश्रेयःपदप्रापणात्।
सेव्यः श्रीपतिरेव सर्वजगतामेकान्ततः साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥ १६ ॥

नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति।
यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥ १७ ॥

भो लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां
योगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः।
अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां
यत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम् ॥ १८ ॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना।
नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिना-
मस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ १९ ॥

तत्त्वं ब्रुवाणानि परं परस्मादहो क्षरन्तीव सुधां पदानि।
आवर्तय प्राञ्जलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥ २० ॥

इदं शरीरं परिणामपेशलं पतत्यवश्यं श्लथसंधि जर्जरम्।
किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब ॥ २१ ॥

श्रीमन्नाम प्रोच्य नारायणाख्यं येन प्राप्ता वाञ्छितं पापिनोऽपि।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिंस्तेन प्राप्तं गर्भवासादिदुःखम् ॥ २२ ॥

मा द्राक्षं क्षीणपुण्यान्क्षणमपि भवतो भक्तिहीनान्पदाब्जे
मा श्रौषं श्रव्यबद्धं तव चरितमपास्यान्यदाख्यानजातम्।

---

१. 'वात्सल्यात्' इत्यादिश्लोकमारभ्य समाप्तिपर्यन्तमेकोनविंशतिश्लोका मुद्रितपुस्तके न सन्ति. वात्सल्यादिषु षट्सु प्रह्लादादयः षट् क्रमेण साक्षिणः.

मा स्प्राक्षं माधव त्वामपि भुवनपते चेतसापह्नुवानं
मा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेऽपि ॥ २३ ॥
मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि ।
हरनयनकृशानुना कृशोऽसि स्मरसि न चक्रपराक्रमं मुरारेः ॥ २४ ॥
दारा वाराकरवरसुता[1] तेऽङ्गजोऽयं विरिञ्चः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर्मध्ये जगदविकलं तावके देवकी ते
माता मित्रं बलरिपुसुतस्[2]तत्त्वतोऽन्यन्न जाने ॥ २५ ॥
जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथां श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ २६ ॥
यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभं
ते नेत्रे तमसोज्झिते सुरुचिरे याभ्यां हरिर्दृश्यते ।
सा बुद्धिर्नियमैर्यमैश्च विमला या माधवध्यायिनी
सा जिह्वामृतवर्षिणी प्रतिपदं या स्तौति नारायणम् ॥ २७ ॥
भक्तद्वेषिभुजंगगारुडमणिस्त्रैलोक्यरक्षामणि-
र्गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः ।
श्रीकान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो ध्येयशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ २८ ॥
शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसंपूज्यमन्त्रं
संसारोत्तारमन्त्रं समुदितमनसां सङ्गनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसंदष्टसंत्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ २९ ॥
व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्यानर्थकरौषधं त्रिजगतां संजीवनैकौषधम् ।

---

१. समुद्रसुता लक्ष्मीः. २. अर्जुनः.

मक्तार्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम् ॥ ३० ॥

आश्चर्यमेतद्धि मनुष्यलोके सुधां परित्यज्य विषं पिबन्ति ।
नामानि नारायणगोचराणि त्यक्त्वान्यवाचः कुहकाः[1] पठन्ति॥ ३१॥

लाटीनेत्रपुटीपयोधरघटीरेवातटीदुष्कुटी-
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते[2] ।
गोविन्देति जनार्दनेति जगतां नाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसामतिक्रामति ॥ ३२ ॥

अयाच्यमक्रेयमयातयाममपाच्यमक्षय्यमदुर्भरं मे ।
अस्त्येव पाथेयमितः प्रयाणे श्रीकृष्णनामामृतभागधेयम् ॥ ३३ ॥

यस्य प्रियौ श्रुतधरौ कविलोकगीतौ
मित्रे द्विजन्मपरिवारशिवावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता स्तुतिरियं कुलशेखरेण ॥ ३४ ॥

इति श्रीकुलशेखरनृपतिविरचिता मुकुन्दमाला समाप्ता ।

पण्डितराजश्रीजगन्नाथविरचिता[3]

सुधालहरी[4] ।

उल्लासः[5] फुल्लपङ्केरुहपटलपतन्मत्तपुष्पंधयानां
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।

---

१. मायाविनः. २. लाटदेशस्त्रीणां नेत्रपुटकुचकलशादिवर्णनेन रेवातटास्थितनिकुञ्जचन्दनादिद्रुमवर्णनेन च मूढानां कवीनां दिनान्यतिक्रामन्ति. लाटीत्युपलक्षणम्. ३. तैलङ्गवंशोद्भवः पेरमभट्टसूनुरनेकग्रन्थकर्ता पण्डितराजजगन्नाथो दिल्लीबादशाहस्य शाहजहानसूनोर्दाराशाहस्य सभायामासीत्, यतोऽनेन जगदाभरणकाव्ये दाराशाहस्यैव यशोवर्णनं कृतमस्ति. भामिनीविलाससमाप्तौ च 'दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः' इत्युक्तम्. स च दाराशाहः १६५९ मितखिस्तसंवत्सरपर्यन्तमासीत्. ४. सूर्यस्तवरूपोऽयं ग्रन्थः. ५. रसगङ्गाधरे प्रथमानन उदाहृतोऽयं श्लोकः.

उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
संघातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥ १ ॥
पद्मद्रोहोद्धुराणां धवलितहरितामैन्दवीनां द्युतीनां
दर्पं[1] द्राग्द्रावयन्तो विदलदरुणिमोद्रेकदेदीप्यमानाः ।
दूरादेवान्धकारान्धितधरणितलद्योतने बद्धदीक्षा-
स्ते दैन्यध्वंसदक्षा मुदमुदयदिनोद्वेलदुस्रा[2] दिशन्तु ॥ २ ॥
त्रातामीवार्तलक्षाः[3] प्रतिदिनविहितानेकगीर्वाणरक्षा
भक्तानां कल्पवृक्षाः स्फुरदनलगतस्वर्णभासां सदृक्षाः ।
लोकक्षेमात्तदीक्षा नलिनपरिषदां दत्तसौभाग्यलाक्षा[4]
दुर्वृत्तध्वंसदक्षा मम रविकिरणाः सन्त्वघानां विपक्षाः ॥ ३ ॥
प्रालेयानां करालाः कवलितजगतीमण्डलध्वान्तजाला-
स्त्रातस्वर्लोकपाला विदलदरुणिमक्षिप्तबालप्रवालाः ।
विश्लिष्यत्कोकबालाज्वरहरणभवत्कीर्तिजालैर्जटाला
व्योमव्याप्तौ विशालास्त्वयि दधतु शिवं भास्वतो भानुमालाः ॥ ४ ॥
निर्भिद्य क्ष्मारुहाणामतिघनमुदरं येषु गोत्रां गतेषु
द्राघिष्ठस्वर्णदण्डभ्रमभृतमनसः संनिधित्सन्ति पादान् ।
यैः संभिन्ने दलाग्रप्रचलहिमकणे दाडिमीबीजबुद्ध्या
चञ्चूचाञ्चल्यमञ्चन्ति च शुकशिशवस्तेऽशवः पान्तु भानोः ॥ ५ ॥
अह्नि[6] क्रीडोचितानां सरसिरुहलसन्मन्दिराणां प्रभाते
प्रोद्घाट्य द्राक्कपाटान्यथ कुमुदगृहान्मुद्रयन्तो विमुक्तान् ।

ऽल्लास इति । रविवर्णनम् । उदयाचलप्रान्तभागादयं कोऽपि विलक्षणो धाम्नां तेजसां समूहः प्रादुर्भवति । तत्र रूपकं चतुर्धा । विकसितकमलसमूहमध्यावधिकनिःसरणयुतर-...पानजोन्मादवद्भ्रमराणामुल्लासः । तादृशकोकीनां निस्तारो दुःखोद्धर्ता । नाशिततेजसां तामसानां तमःसमूहानां उत्पातो नाशकः । नेत्राणां पक्षपातः सहकारी ।' इति तत्र नागेशभट्टव्याख्यानम्.

१. आधिक्य. २. किरणाः. ३. त्रातममीवेन पापेन रोगेण वार्तास्तेषां लक्षं यैः. ४. सौभाग्यवत्यो हस्तपादादिषु लाक्षारसेन रञ्जनं कुर्वन्ति. ५. शुकशावकानां रविकिरणेषु सुवर्णदण्डभ्रान्तिः. किरणकान्त्यरुणीकृतेषु जलकणेषु च दाडिमीबीजभ्रान्तिर्भवति. ६. दिवसे कमलेषु, रात्रौ कुमुदेषु च लक्ष्मीर्निवसतीति प्रसिद्धिः.

सिञ्चन्तः किं च भूमीतलमखिलमपि क्षुण्णकाश्मीरनीरैः
पायासुः श्रीसपर्याविरचनपटवः पद्मबन्धोः करा नः ॥ ६ ॥

आलेपा हिङ्गुलानामिव धरणिभुजामच्छसौधाग्रमौलि-
ष्वग्रेषु क्ष्मारुहाणामभिनवविदलत्पल्लवोल्लासलीलाः ।
प्रौढप्रालेयपुञ्जोपरि चितखदिराङ्गारभारा इवारा-
त्पारावारात्प्रयान्तो दिनकरकिरणा मङ्गलं नः क्रुषीरन् ॥ ७ ॥

कीलालैः कुङ्कुमानां निखिलमपि जगज्जालमेतन्निषिक्तं
मुक्ताश्चोन्मत्तभृङ्गाविदलितकमलक्रोडकारागृहेभ्यः ।
उत्सृष्टं गोसहस्रं बहलकलकलः श्रूयते च द्विजानां
भाग्यैर्वृन्दारकाणां हरिहयहरिता सूयते पुत्ररत्नम् ॥ ८ ॥

या सूते सर्वभूतेष्वनुदिनमुदये चेतनाया विलासा-
न्यान्ती सायं निकायं जलनिधिजठरं संजरीहर्ति सद्यः ।
अत्यर्थं वर्धयन्ती मणिगणसुषमासंपदं रत्नसानोः
सा नो भानोः प्रभा नो नयनसरणितो दूरतो जातु यातु ॥ ९ ॥

नीहारैर्नीरजानां निबिडतमतमोराशिभिर्लोचनानां
श्रौतस्मार्तक्रियाणामपि खलु निशया नाशमालक्ष्य दूरात् ।
सद्यः सिन्धोः सकाशादधिकतरजवेनागता वासवाशा-
माशापाशानशेषानपहरतुतरां तीक्ष्णभानोः प्रभा नः ॥ १० ॥

शीते शोकं शशाङ्के कृशतमरुचितामाशुनाशं निशायां
धिक्कारं ध्वान्तवर्गे कुमुदपरिषदि प्रोद्गमं दीनतायाः ।
पाण्डित्यं पुण्डरीकेष्वनुदिनमधिकां कान्तिमाशासु तन्व-
न्नन्वञ्चत्यन्वहं द्यामुषसि करुणया विश्ववन्द्यो विवस्वान् ॥ ११ ॥

स्वापं स्वापाकुलानां गदमथ गदिनामन्धकारं त्रिलोक्याः
पापं पापाविलानां सपदि परिहरन्नागतो वासवाशाम् ।

---

१. रक्तवर्णो धातुविशेषः. २. कुर्वन्तु. ३. जलैः. ४. धेनुसहस्रं किरणसहस्रं च
५. ब्राह्मणानां पक्षिणां च. ६. पूर्वदिशा. ७. हरति. ८. सुमेरोः. ९. विकासम
१०. प्रतिदिनमाकाशमारोहति.

नित्यप्रस्थानलीलाकुपितकमलिनीनर्मनिर्माणकर्मा

विश्वार्तित्राणधर्मा गगनमणिरसौ पातु शर्मानिशं वः ॥ १२ ॥

अन्तर्नीरं नदीनामनुदिनमुदये बिम्बिता ये समन्ता-

द्गीर्वाणाद्रेरुदञ्चन्मणिगणजटिलां मेदिनीं दर्शयन्ति ।

विप्रप्रोत्क्षिप्तसंध्याञ्जलिजलकणिकाजालमाकाशमध्ये

माणिक्यव्रातयन्तो[1] मम मिहिरकरा मान्द्यमुन्मूलयन्तु ॥ १३ ॥

प्रत्यग्रोढाः[2] प्रगल्भा युवतिपरिषदः प्रोषितप्राणनाथा[3]

यस्मिन्नस्ताद्रिमौलेरुपरिमणिमयच्छत्रलीलां दधाने ।

सत्रासं सप्रसादं परिणतकरुणं लोचनान्युत्क्षिपन्ति

स्थेमानं[4] स प्रियाणां घटयतु भगवान्पद्मिनीवल्लभो वः ॥ १४ ॥

अन्तर्द्यावापृथिव्योरधिरजनि भृतानन्धकारानुदारा-

न्विद्राव्य द्राक्तदीयैरिव जगदरुणं शोणितैर्यद्बिधत्ते ।

सायं प्रातश्च संध्याञ्जलिमवनिसुराः संप्रयच्छन्ति यस्मै

तस्मै कस्मैचिदेतन्मम परमहसे देवतायै नमोऽस्तु ॥ १५ ॥

त्राणं त्रैविष्टपानां तरणमथ पयस्तोम[5]ताम्यत्तनूनां

नद्यन्तानामतर्क्यं त्रिगुणमयतया यत्त्रयाणां तुरीयम् ।

तत्तादृक्तुन्दिलायास्तरुणतरतमःसंततेरन्तकृत्त्वां

तेजस्त्रैलोक्यताम्रीकरणचतुरिम त्रायतां तीक्ष्णभानोः ॥ १६ ॥

गीर्वाणग्रामणीभिर्गगनतलगतैर्गीर्भिरुद्गीथगाभि-

र्गन्धर्वैश्चापि गीता गुणगणगरिमोद्गारिगाथासहस्रैः ।

गाहं गाहं गृहालीरगतिकगदिनां गन्धयन्तो गदार्तिं

ग्लानिग्रामं ग्रसन्तां ग्रहरुचिगुरवो गोपतेर्गोविलासाः ॥ १७ ॥

जीवातुर्जाड्यजालाधिकजनितरुजां तप्तजाम्बूनदाभं

जङ्घालं जाङ्घिकानां जलधिजठरतो जृम्भमाणं जगत्याम् ।

---

१. रक्तवर्णत्वान्माणिक्यसमूहसदृशं दर्शयन्तः. २. नवोढाः. ३. विरहिण्यः. ४. स्थै-र्यम्. ५. 'तमस्तोम' इत्यपि पाठः. ६. पुष्टायाः. अतिमहत्या इति यावत्. ७. सामभेदः. . नाशयन्तः. ९. जीवनौषधम्. १०. जाङ्घिकानां वेगवतां मध्ये जङ्घालं वेगवत्.

जीवाधानं जनानां जनकमथ रुचो जीवजैवातृकादे-[1]

ज्योतिर्जाज्वल्यमानं जलजहितकृतो जायतां वो जयाय ॥ १८ ॥

प्रातर्निर्गत्य गोभिः सह रुचिविषये संचरन्त्योऽह्नि ताभिः

साकं सायं निकायं प्रति पुनरपि याः संप्रयातुं त्वरन्ते ।

यासां दिव्यप्रभावस्त्रिजगदघवनश्रेणिदाहैकदावः

क्षेमं तन्वन्तु ता वः शिवमयवपुषो वासरेशस्य गावः[2] ॥ १९ ॥

वृन्दैर्वृन्दारकाणां दनुतनुजनुषां रक्षसां च क्षपान्ते

गन्धर्वाणां धुरीणैः प्रणतमहिवरैः किंनरैर्यक्षैरैश्च[3] ।

विद्यां हृद्यां निजेभ्यो वितरदविरतं दीप्तिभिर्दीपयद्द्या-

मैद्यादाद्यामविद्यामिदमुदयगिरेरुद्यदर्कस्य बिम्बम्[4] ॥ २० ॥

आ पाथोजासनायुः क्षणलवघटिकाद्यात्मकं कालचक्रं[5]

प्राहुः पूर्वे पुराणागमविषयविदो यस्य लीलाविलासम् ।

भावानां षड्विकारानथ[6] खलु गतिभिर्यश्च नित्यं प्रसूते

स प्रातः पौरहूते परिलसति हरिन्मण्डले चण्डभानुः ॥ २१ ॥

भङ्गानि ब्राह्मणानामुषसि हिमभरासङ्गतो भङ्गुराणि

व्यालक्ष्य द्राक्प्रपाता रिपुजनितरुषेवारुणा वासवाशाम् ।

धर्मध्वंसोद्धुराणामखिलमपि कुलं जक्षतः[7] शोभितक्ष्मा

यक्ष्माणं मे हरन्तु त्वरितमघभिदो भानवश्चण्डभानोः ॥ २२ ॥

विश्रान्तिं ब्राह्मणानां सुखमतिशयितं कामिनां स्थायिलीला-

मम्भोजानां प्रबोधं कुमुदपरिषदां यश्चिकीर्षन्दयार्द्रः ।

निर्यात्यन्तःसमुद्रं सकलमपि नृणां भारमाधाय वह्ना-

र्वह्नायाह्नामधीशः स भवतु भवतां भूयसे मङ्गलाय[8] ॥ २३ ॥

द्रागाहत्य प्रभाते रजनिहिमवतः[9] कौमुदीः कौतुकेन

प्रोद्यत्प्रौढानुकम्पाः पुनरपि खलु ये सायमुज्जीवयन्ति ।

---

१. बृहस्पतिचन्द्रादेः. २. किरणाः. ३. यद्बिम्बं नरैरपि प्रणतम्. ४. सनातनमज्ञान भक्षयतु. ५. ब्रह्मण आयुःपर्यन्तम्. परार्धद्वयपर्यन्तमिति यावत्. ६. जायते, अस्ति वर्धते, विपरिणमते, अपचीयते, नश्यतीति भावविकारषट्कम्. ७. नाशयन्तः. ८. शीघ्रम्. ९. चन्द्रस्य.

आरुण्ये पल्लवानामथ गुरु[1]चरणाः शक्रगोपावलीनां
ते युष्मद्भावलीनां दिनकरकिरणाः क्लान्तिमुन्मूलयन्तु ॥ २४ ॥
द्रागद्वैतं वितन्वंस्त्रिभुवनमभितः कौङ्कुमीनां द्युतीनां
न्यक्कुर्वन्मान्द्यमुद्रामथ रजनिरुजां कोकसीमन्तिनीनाम् ।
तन्द्रान्धानान्ध्यसिन्धोरिह विततरैरुद्दधानं कराग्रैः
स्वान्तध्वान्तं धुनीतामुदयगिरिशिरश्चुम्बि मार्तण्डबिम्बम् ॥ २५ ॥
शुद्धं[2] ब्रह्मालवालं प्रकृतिशबलितं[3] यस्य मूलं करास्त-
द्राघिष्ठस्वर्णशाखा विकसदरुणिमा पल्लवानां विलासः ।
नीलं व्योमालि[4]माला सुरसफलभरो धर्मकामार्थमोक्षाः
स श्रीमान्वाञ्छितार्थं वितरतु सततं सूर्यकल्पद्रुमो वः ॥ २६ ॥
नीहारं निम्नगाभ्यो निखिलनयनतो नीरजेभ्यश्च निद्रां
नीडेभ्यो नीडजानां[5] निकरमुषसि ये नित्यमुद्वासयन्ति ।
सायं तेष्वेव तेषां पुनरपि घृणया कल्पयन्ते च वासं
ते वः सन्तु प्रयासं घृणि[6]घनघृणयो हन्तुमाबद्धकक्षाः ॥ २७ ॥
संहृत्य द्राग्बहिःस्थं तिमिरकुलमथाभ्यन्तरं हर्तुकामा
रन्ध्रालीभिर्गृहाणामुदरमनुदिनं ये विशङ्कं विशन्ति ।
भानोस्तेऽमी हृषीका[7]ण्यखिलतनुभृतां हर्षयन्तो हितेहा
हृद्रोगं संहरन्तां हिममहिमहृतो हेमहृद्याः करा नः ॥ २८ ॥
ब्रह्माण्डं मण्डयन्तो वियति वलयिनो मण्डलैरण्डजानां
पाखण्डान्दण्डयन्तो दनुतनुजनुषां शोभिताखण्डलाशाः ।
ये खण्डान्पौण्डरीकान्विदलयितुमथोद्दण्डपाण्डित्यभाज-
स्ते चण्डांशोरचण्डास्त्वरितमिह कराः पाण्डुतां खण्डयन्तु ॥२९॥
ऊर्ध्वं पापावलिभ्यः स्थित इति जगदे यस्य वेदैरुदाख्या
निन्युः केऽप्यासनार्थं खलु सहचरतां नेत्रयोः पुण्डरीकम् ।

---

१. उपदेष्टारः. अरुणत्वसंपादका इति यावत्. २. शुद्धं ब्रह्म यस्यालवालम्. ३. शबलं ब्रह्म यस्य मूलम्. ४. नीलवर्ण आकाश एव भ्रमरपङ्क्तिः. ५. पक्षिणाम्. ६. सूर्यस्य [illegible]डाः किरणाः. ७. इन्द्रियाणि. ८. पक्षिणाम्. ९. रोगम्. १०. अन्तिमश्लोक एव.

ओष्ठावृक्साम यस्य द्रुतकनकनिभश्मश्रुकेशाखिलाङ्गः
सोऽयं सर्वान्तरात्मा तव दिशतुतरां वासरेशः शिवानि ॥ ३० ॥

इति पण्डितराजश्रीजगन्नाथविरचिता सुधालहरी समाप्ता ।

---

[1]महाकविश्रीशंभुविरचितो

[2]राजेन्द्रकर्णपूरः ।

बद्धस्पर्धः क्षितिधरसुताभ्रूलतावक्रतायां
भूयाद्भूत्यै तव हरशिरःशेखरो रोहिणीशः ।
यं निष्पीड्य स्तनमुखनखोल्लेखरेखासु देव्याः
संभोगान्ते वितरति सुधास्यन्दमर्धेन्दुमौलिः ॥ १ ॥

अव्यात्स वस्ताण्डवविभ्रमेण मौलौ विलीना हरिणाङ्कलेखा ।
सा यस्य वामे कुचमण्डलाग्रे कर्पूरपत्राङ्कुरटङ्क[3]मेति ॥ २ ॥

प्रेमाणं विनिमील्य मल्लिकलिकाकर्णावतंसे रसं
मुक्त्वा मौक्तिककुण्डले कुरुत भोः शंभोर्गिरः कर्णयोः ।
युष्माकं रतिकान्तकार्मुकलताङ्कारकान्ते रुते
सोत्कण्ठं [4]कलकण्ठकण्ठकुहरोद्भूतेऽपि मा भून्मनः ॥ ३ ॥

व्याप्तव्योमलते मृगाङ्कधवले निर्धौतदिङ्मण्डले
देव त्वद्यशसि प्रशान्ततमसि प्रौढे जगत्प्रेयसि ।
कैलासन्ति महीभृतः फणभृतः शेषन्ति पाथोधयः
क्षीरोदन्ति [5]सुरद्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः ॥ ४ ॥

---

१. अयं शंभुमहाकविः कश्मीरदेशे श्रीहर्षदेवराज्यसमये समुत्पन्नः. अस्मिन्नेव राजेन्द्रकर्णपूर एकोनविंशे श्लोके श्रीहर्षदेवस्य, द्विचत्वारिंशे श्लोके च कश्मीरदेशस्य नाम गृहीतमस्ति. श्रीहर्षदेवस्य राज्यसमयस्तु १०८८ मितात्खिस्तसंवत्सरादारभ्य ११०० खिस्तसंवत्सरपर्यन्तमासीत्. स एव समयोऽस्य ग्रन्थस्य. श्रीकण्ठचरितस्य पञ्चविंशे सर्गेऽपि शंभुमहाकवेर्नाम गृहीतमस्ति. अस्यैकमेव पुस्तकमस्माभिः कश्मीरदेशे कथंचिदधिगतम्. सुभाषितावलावत्रत्या बहवः श्लोकाः समुद्धृताः सन्ति. २. कश्मीराधिपते श्रीहर्षदेवस्य स्तुतिरूपोऽयं ग्रन्थः. ३. शोभातिशयम्. ४. कोकिलः. ५. ऐरावत शुक्लवर्णोऽस्ति.

कैलासाचलसानुसीमनि [1]मरुत्सीमन्तिनीभिस्तथा
गीतास्ते कलकण्ठकण्ठनिनदश्रव्यैः स्वरैः कीर्तयः।
अप्युत्तंसविलासवानपि रते रत्नप्रदीपो यथा
चूडाचन्द्रकलाङ्कुरः [2]पुरजिता सद्यः प्रसादीकृतः॥ ५॥

[3]चौडीचूडाभरणहरणः कीर्णकर्णावतंसः
कर्णाटीनां मुषित[4]मुरलीकेरलीहारलीलः।
कुर्वन्नुर्वीतिलक तिल[5]कोत्सृष्टलाटीललाटं
जीयादेकस्तव नवयशःस्वर्णशाणः कृपाणः॥ ६॥

शान्त्यै दर्पवतां जयाय जगतां संपत्तये याचतां
संमानाय सतां हिताय महतां तापाय पृथ्वीभृताम्।
सोल्लासेन सकौतुकेन शमितध्यानेन दूरीकृत-
स्वाध्यायेन समाप्तसर्वतपसा त्वं वेधसा निर्मितः॥ ७॥

....
....।
कि[6]ं वान्यद्वसुधापुरंदर पुरस्त्वत्पौरुषस्य क्वचि-
न्नार्हत्यस्खलितक्रमोऽपि गगने त्रैविक्रमो विक्रमः॥ ८॥

देवाकर्णय नाकिनां पुरि नृणां लोके पुरे भोगिनां[7]-
मासन्केचन सन्ति केचन तथा स्थास्यन्ति ये केचन।
तन्मध्ये न बभूव नास्ति भविता तादृङ् न नीतौ नतौ
कान्तौ काव्यरतौ मतौ रिपुहतौ कीर्तौ च यस्ते समः॥ ९॥

आनन्दं [8]मुचुकुन्द[9]कन्दलि भज स्वस्थासि वासन्तिके
कल्याणं तव मल्लिके कुशलिनी जातासि हे मालति।
अद्यैतद्यशसि श्रुतिप्रणयितां याते न कुर्वन्ति वः
कर्णोत्तंसरसान्नवीनकलिकाभङ्गं कुरङ्गीदृशः॥ १०॥

---

१. देवाङ्गनाभिः. २. शिवेन. ३. चोलदेशोद्भवा नारी. ४. मुरलकेरलौ च देश-विशेषौ. ५. तिलकरहितं लाटदेशाङ्गनाललाटम्. ६. आदर्शपुस्तकेऽस्य श्लोकस्य पूर्वार्ध-[त्रु]टितमस्ति. ७. सर्पाणाम्. ८. पुष्पवृक्षविशेषः. ९. कन्दलं नवाङ्कुरम्. अल्पत्वविव-[क्षया स्त्र]ीलिङ्गम्.

चैत्रं मा स्मर विस्मर स्मर रतिं किं सायकैर्मारकै-
गौंधां मुग्ध मुधा बधान जहिहि ज्याबन्धधीरं धनुः ।
देवेऽस्मिन्हि सकृत्स्मृतेऽपि न मतिर्नैव स्मृतिर्न स्थिति-
र्नासक्तिर्न धृतिर्न निर्वृतिरपि क्वाप्यस्ति वामभ्रुवाम् ॥ ११ ॥

जहाति नगरीं गलत्क[नकक]ङ्कणः कौङ्कणो
वनं विशति विह्वलः स्खलितकुन्तलः कौन्तलः ।
किमन्यदुदितक्रुधि त्वयि मृगेन्द्रभीमारवं
तटं विशति मारवं च्युतरमालवो मालवः ॥ १२ ॥

तां संक्रन्दनमन्दिरे सुरवधूकर्णामृतस्यन्दिनीं
त्वत्सौन्दर्यकथां निशम्य गदितामानन्दिभिर्बन्दिभिः ।
चापं मुञ्चति बाणमुज्झति शुचं धत्ते रतिं नेक्षते
चित्रं चैत्रमुपेक्षते परिणमन्मन्दव्यथो मन्मथः ॥ १३ ॥

कीरीहारलतासु केरलवधूधम्मिल्लमालासु या
चोलीदन्तचतुष्किकासु मुरलीलीलास्मितेषु द्युतिः ।
अग्रे त्वद्यशसां सुधाकरकरन्यक्कारपारंगमा-
मप्येतामसितामहो सुकवयो विन्दन्ति निन्दन्ति च ॥ १४ ॥

विषमेषुविगलितरसाश्चपलतरंगालिभिर्जडैः क्षुभिताः ।
तिमिरचितवसतयस्तव रिपुसुदृशो निम्नगा जाताः ॥ १५ ॥

अङ्के केरलसुन्दरीकचभरश्यामं कलङ्कं वह-
न्मिथ्यारोहति पूर्वपर्वतशिखां मुग्धस्तमीबान्धवः ।
यत्तापिच्छतरुच्छदच्छवि तमो लुम्पन्ति लिम्पन्ति च
प्रालेयैरिव पारदैरिव जगत्कोशं भवत्कीर्तयः ॥ १६ ॥

---

१. धनुर्गुणघातवारणाय प्रकोष्ठबद्धा चर्मपट्टी. २. कुन्तलनामकदेशस्य राजा. ३. लक्ष्मीलेशरहितः. ४. कीरदेशोद्भवा स्त्री. ५. मुख्यं दन्तचतुष्टयम्. ६. (रिपुस्त्रीपक्षे) विषमेषुः कामः, रसो रागः, जडैर्मुखैर्गालिभिरवाच्यैः क्षुभिताः, तिमिरेण व्याप्ता वसतिर्यासाम्; (नदीपक्षे) विषमेषु नतोन्नतप्रदेशेषु, रसो जलम्, चपलतरङ्गपङ्क्तिभिर्जलैः क्षोभं नीताः, तिमयो मत्स्यास्तै रचिता स्थितिर्यासु. ७. चन्द्रः.

तस्थौ कम्पतरङ्गितस्तनतटं बाष्पाम्बुधौताधरं
शोकाक्रान्तकपोलकीलितकरं द्यां **मुञ्जराजे** गते ।
संजाते त्वयि हारिहारवलयक्वाणं क्वणत्कङ्कणं
चञ्चत्काञ्चनकाञ्चि सा भगवती नर्नर्ति वाग्देवता ॥ १७ ॥

आलेख्यं चिरमुल्लिलेख विजने सोल्लेखया रेखया
संकल्पानकरोद्विकल्पबहुलाकल्पाननल्पानपि ।
अद्राक्षीदपरप्रजापतिमतं चक्रे च तीव्रव्रतं
त्वन्निर्माणविधौ कियन्न विदधे बद्धावधानो विधिः ॥ १८ ॥

शेष क्लेशमशेषमुत्सृज भज त्वं कूर्म कर्म स्वकं
स्वैरं खेलत सिन्धुसैकतलताकुञ्जेषु दिक्कुञ्जराः ।
अप्येतां सकुलाचलां सनगरां साम्भोनिधिं सापगां
सद्वीपां च भुवं बिभर्ति हि भुजः **श्रीहर्ष**पृथ्वीभुजः ॥ १९ ॥

हेरम्ब त्यज कर्णतालनिनदं चूडापगे गर्ज मा
मा मा काञ्चनकिङ्किणीकलकलं कण्ठे ककुद्मन्कृथाः ।
प्रक्रान्तासु सुरैः पुरः पुररिपोर्युष्मद्यशोगीतिषु
व्यग्रस्येति परिस्फुरन्ति वचनान्यानन्दिनो नन्दिनः ॥ २० ॥

अकङ्कणममेखलागुणमहारमस्ताङ्गदं
व्रजन्ति चतुरैः पदैर्मरुमरातिवामभ्रुवः ।
करोत्यसिलतां करे यदसिगर्वमुर्वीभुजो
भुजस्य परिपन्थिनामयमदक्षिणे दक्षिणे ॥ २१ ॥

राकाकान्तकलाङ्कुरं कुरु चिरं चण्डीश चूडान्तरे
कच्छं गच्छ पुराणकच्छप परं गम्भीरमम्भोनिधेः ।
ध्यानं मुञ्च विरञ्च किं च पयसा सिञ्चासनाम्भोरुहं
येनायं परितः प्रभो प्रसरति प्रौढः प्रतापानलः ॥ २२ ॥

---

१. अतीव गुणिवत्सलो वाक्पतिराजदेवापरनामा श्रीमुञ्जराजः श्रीहर्षदेवात्किंचिदेव [पूर्व]मासीत्. ख्रिस्तसंवत्सरस्य ९९४ मिते काले श्रीमुञ्जमहीपालो राज्यं कुर्वन्नासीदित्य-[मित]गतिप्रणीतसुभाषितरत्नसंदोहनामकग्रन्थसमाप्तिश्लोकाज्ज्ञायते. २. इदमुत्तरार्ध-[पाठान्तर]मस्ति.

कंदर्पे नलकूबरे कुमुदिनीकान्तेऽप्यवज्ञावतां
त्वत्सौन्दर्यकथासु तासु मरुतां वृत्तासु कौतूहलात् ।
प्राप्ता तानवमुर्वशी रतिरतिक्लान्ता हता रोहिणी
जाता किं च खरस्मरज्वरभरारम्भापि रम्भातनुः ॥ २३ ॥

सोल्लासा अपि सोद्यमा अपि घनोत्कण्ठा अपि क्वापि नो
यान्ति श्यामनिशान्तरेऽपि रमणोपान्तं कुरङ्गीदृशः ।
सद्यस्त्वद्यशसा हि कुञ्जररदच्छेदच्छविच्छादिना
नीतं कान्तपुरंध्रिकुन्तलभरश्यामं विरामं तमः ॥ २४ ॥

न क्वाप्यौर्वज्वलनमहसा यस्य चक्राथ पाथः
शोषं तस्मिन्भजति जलधौ त्वत्प्रतापानलेन ।
शङ्के पङ्के पतति यतते बालशैवालमूले
कूले लोलः किमपि कुरुते कर्म वैकुण्ठकूर्मः ॥ २५ ॥

उल्लेखं निजमीक्षते भणितिषु प्रौढिं परां शिक्षते
संधत्ते पदसंपदः परिचयं धत्ते ध्वनेरध्वनि ।
वैचित्र्यं वितनोति वाचकविधौ वाचस्पतेरन्तिके
देव त्वद्गुणवर्णनाय कुरुते किं किं न वाग्देवता ॥ २६ ॥

शान्तध्वान्तकलङ्क शंकरशिखालंकार तारापते
राकाकान्त सविभ्रमं भ्रम सदा निःशङ्कमङ्के दिवः ।
अद्यैतद्यशसैव सप्तसु [1]कृतालोकेषु लोकेषु हि
स्वर्भानोर्भवितास्मि[2] नासि नभसि च्छिन्नाकृतेर्गोचरः ॥ २७ ॥

('अस्मि' = त्वम्, अस्मि = अहम्)

त्वय्युत्पन्ने गुणवति सतां नाभिरामः स राम-
स्त्यागव्यग्रे भवति भवति म्लानवर्णः स कर्णः ।
ब्रूमः किं वा बहु ननु धनुर्वेदविद्याविदस्ते
[3]संङ्ग्रामोर्वीपुरहर पुरः स्या[4]दपार्थः स [5]पार्थः ॥ २८ ॥

---

१. कृतप्रकाशेषु. २. 'अस्मि' इति विभक्तिप्रतिरूपकमव्ययम्. त्वमित्यर्थः. ३. युद्धभूमौ रुद्रतुल्य. ४. निष्फलः. ५. अर्जुन.

कान्ति कल्पय तान्तिमल्पय सखि स्वल्पापि नैवास्ति ते
मुक्ताशुक्तिषु वारिराशिरमणि श्रीताम्रपर्णि क्षतिः ।
अस्यालोक्य कुरङ्गकेतनकलालावण्यचौरं यशो
वर्तन्ते हि विमुक्तमौक्तिकलतोत्कण्ठाः कुरङ्गीदृशः ॥ २९ ॥

निद्रा न द्रविणाधिपस्य भजते शङ्कां स लङ्कापति-
र्व्योम्नि व्याकुलतामलं कमलिनीकान्तस्य धत्ते वपुः ।
किं वान्यत्तव देव वेल्लति यदि भ्रूवल्लरीपल्लवः
सोऽपि क्षामकपोलकीलितकरः संक्रन्दनः क्रन्दति ॥ ३० ॥

अस्तं याति ययातिधाम विगतं दुष्यन्तवार्ताशतैः
शान्तं शंतनुकीर्तिभिर्लघु रघोर्लोकेषु जातं यशः ।
किं चान्यत्त्वयि मेदिनीकुमुदिनीराकाशशाङ्कोदये
जाते हन्त तथा कथा अपि विभो रामे विरामं गताः ॥३१॥

लोलन्मौक्तिकवल्लि वेल्लदलकं वाचालकाञ्चीगुणं
चञ्चत्काञ्चनकङ्कणं च गिरिजा जातोत्सवा नृत्यतु ।
त्वत्कीर्तिश्रवणोन्मुखेन विलसत्कल्लोलकोलाहला
यन्मुक्ता मुकुटान्मृगाङ्कशकलोत्तंसेन मन्दाकिनी ॥ ३२ ॥

कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाप्लाविते
जाते हन्त दिवापि देव ककुभां गर्भे भवत्कीर्तिभिः ।
धृत्वाङ्गे कवचं निबध्य शेवधिं कृत्वा पुरो माधवं
कामः कैरवबान्धवोदयधिया धुन्वन्धनुर्धावति ॥ ३३ ॥

अधिकंसमाप्तसमरः प्रथितो भुवनेषु गोपनरसोत्कः ।
भाति सदानवविजयं कुर्वन्कृष्णस्तवायमसिः ॥ ३४ ॥

.. सूर्यस्य. २. चलति. ३. तूणीरम्. ४. वसन्तम्. ५. (राजपक्षे) तवायमसिः कृष्णः कृष्णवर्णो भाति. खड्गविशेषणानि—अत्यन्तं समाप्तयुद्धः शत्रूणामभावात्, रक्षणे यो रसस्तस्मिन्नुत्कण्ठितः, सर्वदा नवीनं विजयं कुर्वन्; (कृष्णपक्षे) ...सं कंसविषये प्राप्तयुद्धः, गोपालरूपनरेषु पुरुषेषूत्कण्ठितः, स प्रसिद्धः, दानवानां ... कुर्वन्.

राकाकान्तकलाङ्कराङ्कितजरत्किशो(?) निशीथक्षणे
गायन्तीषु सुराङ्गनासु भवतः कैलासकुञ्जे यशः ।
निष्पीड्य प्रियमौलिचन्द्रकलिकां कंदर्पकेलिक्लम-
स्वापं दूरयितुं दृशोर्गिरिजया दत्ताः सुधाबिन्दवः ॥ ३५ ॥
किं तान्तिः किमनिर्वृतिः किमधृतिर्वाग्देवि मुञ्जे गते
किं शून्यासि किमाकुलासि किमिति क्लान्तासि कोऽयं क्रमः ।
एतं विद्धि तमेव सास्य हि मतिः सा विश्रुतिः सा द्युतिः
स त्यागः स नयः स सूक्तिषु रसस्ताः संमताः संपदः ॥३६॥
कस्मादम्ब विलम्बसे कुरु कृपां केनापि रूपेण मे
जिह्वाग्रे वस संनिधेहि हृदये वाग्देवि तुभ्यं नमः ।
यन्मे साहसिकस्य भूपचरितव्यावर्णने सादरं
सप्रेमप्रसरं सकौतुकरसं सोल्लासमास्ते मनः ॥ ३७ ॥
नाके मुग्धमधुव्रतप्रणयिनीहुंकारहारिस्वनै-
श्चारु त्वच्चरितं यदेव चतुरैरुच्चारितं चारणैः ।
कान्तं मौक्तिकदामनद्धचिकुरस्वःसुन्दरीणां पुरः[1]
प्राप्तो देव तदैव सूत्रितशरासारः ससारः स्मरः ॥ ३८ ॥
श्रीखण्डद्रवनिर्झरन्ति हृदये पीयूषकल्लोलिनी-
निःष्यन्दन्ति तनौ रसायनरसस्यन्दन्ति कर्णान्तिके ।
नासीरप्रसरन्ति[2] दिक्परिसरे भूमण्डले मौक्तिक-
प्रस्तारन्ति सुधाकरन्ति गगनोत्सङ्गे भवत्कीर्तयः ॥ ३९ ॥
किं बालेन मृणालतन्तुमलिनच्छायेन खण्डेन्दुना
निःशङ्कोऽद्य वृषाङ्क शेखरपदे राकाशशाङ्कं कुरु ।
देवस्यास्य हि केतकोदरदलच्छायैर्यशोभिर्निशि
व्योम्नः सीम्नि च मण्डले च ककुभां व्यस्तं समस्तं तमः॥४०
नो चैत्रः सहकारकुड्मलकुलैः क्लृप्तं न तत्कार्मुकं
नामी क्रूरशिलीमुखाः शितमुखा नो कोकिलापञ्चमः[3] ।

---

१. 'मौक्तिकदाम—' इत्यादि विशेषणमनुपयुक्तमिव भाति. २. सेनामुखं नासीरमिल्युच्यते. ३. स्वरविशेषः.

नैवोद्दामकरः शशी न मकरः केतुस्थितो नो रति-
स्तत्रापि त्वमहो समस्तरमणीमानव्यधो मन्मथः ॥ ४१ ॥
तन्मूर्तं भुवने मुहूर्तममृतं मन्ये भृशं वासरं
सारं वेद्मि तदेव सैव च गुणैरायामिनी यामिनी ।
श्रीवासो यशसां पदं सुमनसामप्यास्पदं संपदां
यत्रागच्छति गोचरं नयनयोः **काश्मीरमीनध्वजः** ॥ ४२ ॥
संजाते जलदात्ययेऽपि फणभृत्पर्यङ्कशय्यातलं
मा मा मुञ्च मुकुन्द कान्तकमलादोःकन्दलालिङ्गितः ।
जागर्ति स्थितये सतां विरतये येनासतामप्ययं
संनद्धो गुणिमौलिमण्डनमणिर्भूमण्डलाखण्डलः ॥ ४३ ॥
श्लाघा **राघव** लाघवं तव गता **दुष्यन्त** वि[1]ध्वं तव
म्लानिं याति यशो गता तव तथा **पार्थ** प्रथापार्थताम् ।
जातेऽस्मिन्गुणिबान्धवे [2]नरपतिश्यामाधवे क्ष्माधवे
कस्याप्यत्र न **कर्ण** कर्णपदवीं याता भवत्कीर्तयः ॥ ४४ ॥
ज्ञाता भूरियमम्बुराशिरसना किं नाम नालोचितं
तत्राखण्डलमण्डले मणिपुरे वार्तापि वृत्तैव नः ।
कान्तौ कीर्तिरतौ नये परिचये काव्यक्रमप्रक्रमे
यावत्क्वापि कदापि कोऽपि भवतः स्पर्धापरो नापरः ॥ ४५ ॥
एवं त्वामहमर्थये विरमितस्वाध्यायकौतूहलो
ब्रह्माण्डोदरम[3]म्बुजासन पुनर्यत्नेन विस्तारय ।
देवस्यास्य यतो न माति विततं राकेन्दुरोचिर्लता-
लीलोन्मीलितकैरवोदरदलद्धौतावदातं यशः ॥ ४६ ॥
उर्वीं मौर्वीकिणभृति भवद्दोष्णि बिभ्रत्यशेषां
शान्तक्लान्तिः किमपि कुरुते नर्मणा कर्म कूर्मः ।
कृत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः सममथ सरिन्नाथपाथः पिबन्ति ॥ ४७ ॥

---

१. संपूर्णम्. २. महीपतिचन्द्रे. ३. हे ब्रह्मदेव.

किं मौनं ननु मेनके किमु शुचं धत्से शचि क्षामता
　केयं वाचि घृताचि साचि[1] किमिदं रम्भे मुखाम्भोरुहम् ।
याते त्वच्चरणामृते श्रुतिपथं गीर्वाणवामभ्रुवा-
　मेवं देव खरस्मरज्वरजुषामुक्ताः सखीभिर्गिरः ॥ ४८ ॥

किं राकेन्दुकरच्छटाभिरुदितं किं मौक्तिकैरुद्गतं
　किं मल्लीमुकुलैः सितं विकसितं किं मालतीकुड्मलैः ।
किं रूढं रमणीविलासहसितैः किं तत्र कीर्णं सुधा-
　स्यन्दैर्यत्र जगत्त्रयैकतिलक भ्रान्तं भवत्कीर्तिभिः ॥ ४९ ॥

नोद्दामानि दिशां मुखानि न घनाभोगा नभोमण्डली
　नैवोत्तालतलं रसातलमियं पृथ्वी न पृथ्वी पुनः ।
एवं देव कथं नु कुञ्जररदच्छेदावदातास्तव
　स्वैरं यान्ति च मान्ति च श्रुतिसुधाधारामुचः कीर्तयः ॥ ५० ॥

यो वैरिष्वनलो **नलो** वसुमतीदीपो **दिलीपो**ऽथ यो
　यो मानेन पृथुः **पृथु**र्जगति यो निर्लाघवो **राघवः** ।
यः कीर्तौ **भरतो** रतो नृपगुणैर्यः शंतनुः[2] **शंतनुः**
　संजाते त्वयि कस्य न क्षितिपते सर्वेऽपि ते विस्मृताः ॥ ५१ ॥

अपारपुलिनस्थलीभुवि हिमालये मौलये[3]
　निकामविकटोन्नते दुरधिरोहणे रोहणे ।
महत्यमरभूधरे गहनकंदरे मन्दरे
　भ्रमन्ति न पतन्त्यहो परिणता[4] भवत्कीर्तयः ॥ ५२ ॥

तात्पर्यं कमलासने[5] विरचितं गौरीहितैः[6] पालिता
　त्रैलोक्याद्भुतकृत्सदानवजये[7] दोर्विक्रमो दर्शितः ।

---

१. तिर्यक्. २. कल्याणशरीरः. ३. लक्ष्मीनिवासभूते. ४ अन्यस्तु परिणत वृद्धश्चेत्पर्वतारोहणावसरे पतत्येव. ५. कमलाया लक्ष्म्या असने क्षेपणे. याचकेभ्यो दा इति यावत्; अथ च कमलरूपे विष्टरे. ब्रह्मणः पद्मासनत्वात्. ६. गौः पृथ्वी, ईहितै रभीष्टैः; (पक्षे) गौरी पार्वती, हितैः प्रेमभिः. ७. सर्वदा नवीने जये; (पक्षे) प्रसिद्धः, दानवानां जये.

एकेनैव कृतं तु देव भवता तत्रापि ते न स्मयो
 यद्द्वेधाश्च पुरान्तकश्च[2] कमलाकान्तश्च देवोऽकरोत् ॥ ९३ ॥
औदार्यं सधने नयो गुणिजने लज्जा कुलस्त्रीजने
 सत्काव्यं वदने मदो द्विरदने पुंस्कोकिलः कानने ।
रोलम्बः कमले नखाङ्कुरचना कान्ताकपोलस्थले
 तन्वी तल्पतले भवानपि विभो भूमण्डले मण्डनम् ॥ ९४ ॥
जाता तामरसोदरे[3] भगवतो धातुः कृतार्था स्थिति-
 र्युक्तं यद्यचिरात्करोति जलधौ संस्थां रमावल्लभः ।
सर्वत्रैव विभो तव प्रसरति प्रौढे प्रतापानले
 धत्ते सोऽपि पिनाकिनः सफलतां मौलीन्दुरेखाङ्कुरः ॥ ९५ ॥
कण्ठान्तःक्वणितं दिवाकरकरक्लान्त्या रजोविप्लवै-
 स्तन्नेत्राञ्चलकुञ्चनं शितकुशप्रान्तक्षतैः सीत्कृतिः ।
श्वासोर्मिप्रभवो वनेचरभिया त्वद्वैरिवामभ्रुवा-
 मेवं देव मरोस्तटेऽपि सुरतक्रीडानुरूपः[4] क्रमः ॥ ९६ ॥
संदिष्टं वसुधासुधाकर शचीकान्तेन मुञ्चोद्यमं
 देव त्वं प्रबलप्रतापदहनोद्रेकाय[5] बद्धाञ्जलि ।
एते मानुभवन्तु नाकतरुणीकर्णावतंसोचिताः
 क्लान्तिं नन्दनकन्दलीषु कलितव्यापल्लवाः पल्लवाः ॥ ९७ ॥
शाक्तिं मानसतीव्रतापदहने धत्ते गलत्संयमा
 कामाशां प्रकटीकरोति न सतां सर्वत्रपापासनात्[6] ।
प्रेम प्रौढमनारतं वितनुते वृद्धेति शुद्धेति च
 प्रख्यातापि महीमनोभव भवत्कीर्तिर्विचित्राः स्त्रियः ॥ ९८ ॥
रूपं यन्मदने द्युतिः शशिनि या गम्भीरता याम्बुधौ
 यो मेरौ गरिमास्ति या कमलिनीकान्ते प्रतापोन्नतिः ।

---

१. गर्वः. २. शिवः. ३. कमलमध्ये. ४. सुरतेऽपि कण्ठकूजितं नेत्रकुञ्चनं सीत्कारः श्वासाधिक्यं च भवत्येव. ५. क्रियाविशेषणम्. ६. सर्वस्यास्त्रपाया अपासनादूरीकरणात्; (पक्षे) सर्वत्र पापस्यासनात्.

यो लक्ष्मीरमणेऽपि विक्रमगुणस्तत्सर्वमेकत्र चे-
द्द्रष्टुं वाञ्छसि दृश्यतामयमये देवस्त्रिलोकीमणिः ॥ ५९ ॥

स ख्यातो जगति त्रिविक्रम इति त्वद्विक्रमा भूरय-
स्तेनैको निहतो बलिर्बलिशतध्वंसी भुजस्तावकः ।
तं वैकुण्ठमवैति को न जगतीं जेतुं त्वकुण्ठो भवा-
नस्त्येवं महदन्तरं तव तथा देवस्य दैत्यद्रुहः ॥ ६० ॥

चक्रे यत्र मदोर्जितार्जुनभुजस्तम्भाहतिं भार्गवो
यत्रासीद्दशकण्ठकण्ठविपिनच्छेदी रघूणां पतिः ।
पार्थेनापि जितः स यत्र गिरिजाकान्तः किराताकृति-
र्गीतः पल्लविताद्भुतैस्तव न कैस्तत्रापि दोर्विक्रमः ॥ ६१ ॥

राकेन्दोरुदयभ्रमेण मुखतो मुक्त्वा मृणालाङ्कुरं
तान्ति तत्र वहन्ति हन्त विलसद्भृङ्गा रथाङ्गाङ्गनाः ।
किं चोदञ्चितचञ्चुरञ्चति शरच्चन्द्रप्रभा[भ्रान्तितो
हर्षं हन्त] चकोरपङ्क्तिरमलं यत्रोदितं ते यशः ॥ ६२ ॥

प्रालेयैः स्नपयन्ति कल्पलतिकाः सेकाननेकानथ
श्रीखण्डाम्बुगलज्जलैरविरलैस्तन्वन्ति संतानके ।
सान्द्रैश्चन्द्रमणिद्रवैरपि विभो मन्दारवल्लीमलं
सिञ्चन्त्यद्य भवत्प्रतापदहनत्रासेन नाकाङ्गनाः ॥ ६३ ॥

यातं **राम**विरामविक्लवतया दुष्यन्तविश्रान्तिजः
संतापो विगतो [विलीनमखिलं दुःखं **नला**भावजम्] ।
किं चान्यत्त्वयि देव बिभ्रति महासाम्राज्यलक्ष्मीमिमां
शान्तः **शांतनवो**ऽपि कोऽपि विपुलाभोगो वियोगो भुवः॥६४॥

किंचित्कुड्मलितैकलोचनपुटं कण्डूं मुहुर्गण्डयो-
र्झम्पाकम्पितकुड्मले कुरबके निर्वाप्य वन्यद्विपैः ।

१. वै निश्चयेन कुण्ठं जडम्; (पक्षे) वैकुण्ठनामकम्. २. विष्णोः. ३. परशुरामः. ४. दुष्यन्तमहीपालवियोगजनितः.

देव स्मेरसरोजसङ्गसुरभि स्वैरं भवद्वैरिणां
पीतं प्राङ्गणवापिकामकरिणीपीतावशेषं पयः ॥ ६५ ॥

कूर्मे धैर्यं शिथिलय धृतिं मुञ्च शेषस्य शेषा-
माशामाशाकरिषु[1] वसुधे देवि मा मा दधीथाः ।
शक्तः सप्ताम्बुनिधिपरिखामेखलामप्ययं त्वां
वोढुं मौर्वीकिणपरिचितो भूपतेरस्य बाहुः ॥ ६६ ॥

कान्तारेषु च काननेषु च सरित्तीरेषु च क्षमाभृता-
मुत्सङ्गेषु च पत्तनेषु च सरिद्भर्तुस्तटान्तेषु च ।
भ्रान्ताः केतकगर्भपल्लवरुचः श्रान्ता इव क्षमापते
कान्ते नन्दनकन्दलीपरिसरे रोहन्ति ते कीर्तयः ॥ ६७ ॥

राकेन्दोरुदयः किमेष किमयं गौरीगुरुर्वा[2] गिरिः
क्षीरोदः किमयं किमेष पुरजिल्लीलाविलासोरगः[3] ।
किं मन्थाद्रिरयं[4] सुधाजलनिधेर्धौतस्तरङ्गैरिति
त्वत्कीर्तौ वसुधापुरंदर सदा संदेहिनो देहिनः ॥ ६८ ॥

विलोकनकथापि मे न नलकूबरे न स्मरे
किमन्यदमृतद्युतेरपि न दर्शनं प्रार्थये ।
अयं नयनगोचरं व्रजति चेद्दृशामुत्सवः
समग्ररमणीमनोमधुपमाधवः क्षमाधवः ॥ ६९ ॥

कुन्दः[5] कन्दलितव्यथं विचकिलः कम्पाकुलं केतकः
सातङ्कं मदनः सदैन्यमलसं मुक्तोऽतिमुक्तद्रुमः ।
मोक्तुं किं तु न पारितस्तव रिपुस्त्रीभिः पुरीनिर्गमे
तत्कालं कृतमाधवीपरिणयः[6] सत्केसरः केसरः ॥ ७० ॥

तद्युक्तं ननु कुम्भसंभव[7] भवत्प्रज्ञारहस्येन य-
द्द्यां च क्ष्मां च तिरोदधन्निरवधिर्विन्ध्योऽपि वन्ध्यः कृतः ।

---

१. दिग्गजेषु. २. हिमालयः. ३. शेषः. ४. मन्दराचलः. ५. कुन्दविचकिलादयः पुष्पवृक्षविशेषाः. ६. लताविशेषः. ७. हे अगस्त्य.

देवस्यास्य शरन्निशाकरकरन्यक्कारपारंगमं
मात्येतत्कथमन्यथा परिणतं द्यावापृथिव्योर्यशः ॥ ७१ ॥
धिक्तं मल्लीकुसुमकलितं केलिकर्णावतंसं
ध्वंसं सोऽपि व्रजतु विफलो रत्नताटङ्कटङ्कः ।
हे राजानः प्रकृतिसरलैः शांभवैरेव[1] सूक्तै-
र्युक्तः कर्तुं भवति भवतां केवलं कर्णपूरः ॥ ७२ ॥
उद्भिन्ना कलकण्ठकण्ठकुहरात्कर्णामृतस्यन्दिनी
युक्ता यद्यपि मार्दवैकवसतिः सा काकलीहुंकृतिः ।
अन्यस्तन्वि तथापि ते पशुपतिप्लुष्टस्य जीवार्पणे
पञ्चेषोरुचितः प्रपञ्चितरसः पाकाञ्चितः पञ्चमः ॥ ७३ ॥
किं हारैः किमु कङ्कणैः किमु सुमैः[2] किं कर्णपूरैरलं
केयूरैर्मणिकुण्डलैरलमलं साडम्बरैरम्बरैः ।
पुंसामेकमखण्डनं पुनरिदं शंभोर्मते मण्डनं
यन्निष्पीडितपार्वणेन्दुशकलस्यन्दोपमाः सूक्तयः ॥ ७४ ॥
पीयूषद्रवहारिणी सुमनसां भ्रूलास्यविस्तारिणी
त्वत्सेवाभिरवापि काप्यभिनवा वाग्देवते भारती ।
अस्त्येका तु कृताञ्जलेर्जननि मे शंभोरियं प्रार्थना
मद्वाचां क्वचिदस्तु वस्तुनिपुणः श्रोता सचेता जनः ॥ ७५ ॥

इति काश्मीरदेशोद्भवमहाकविश्रीशंभुविरचितो राजेन्द्रकर्णपूरः समाप्तः ।

महाकवि[3]श्रीक्षेमेन्द्रविरचितः

कलाविलासः ।

प्रथमः सर्गः ।

अस्ति विशालं कमलाललितपरिष्वङ्गमङ्गलायतनम् ।
श्रीपतिवक्षःस्थलमिव रत्नोज्ज्वलमुज्ज्वलं नगरम् ॥ १ ॥

---

१. शंभुकविसंबन्धिभिः. २. पुष्पैः. ३. अनेकग्रन्थकर्ता व्यासदासापरनामा क्षेमेन्[द्र]
महाकविः कश्मीरदेशे श्रीमदनन्तराजस्य राज्यकाले समुत्पन्नः, यतोऽनेन सु[...]

मणिभूबिम्बितमुक्ताप्रलम्बनिवहेन यत्र शेषाहिः।
भवनानि बिभर्ति सदा बहुधात्मानं विभज्येव ॥ २ ॥
विघ्नोऽभिसारिकाणां भवनगणस्फाटिकप्रभानिकारः।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ॥ ३ ॥
यत्र त्रिनयननयनज्वलनज्वालावलीशलभवृत्तिः।
जीवति मानसजन्मा शशिवदनावदनकान्तिपीयूषैः ॥ ४ ॥
रतिलुलितललितललनाक्लमजललववाहिनो मुहुर्यत्र।
श्लथकेशकुसुमपरिमलवासितदेहा वहन्त्यनिलाः ॥ ५ ॥
नवबिसकिसलयकवलनकषायकलहंसकलरवो यत्र।
कमलवनेषु प्रसरति लक्ष्म्या इव नूपुरारावः ॥ ६ ॥
नृत्यन्मुग्धमयूरा मरकतधारागृहावली सततम्।
सेन्द्रायुधघननिवहा प्रावृण्मूर्तेव यत्रास्ते ॥ ७ ॥
शशिकरणप्रावरणस्फाटिकहर्म्येषु हरिणशावाक्ष्यः।
यत्र विभान्ति सुधाम्बुधिमुग्धतरङ्गोत्थिता इवाप्सरसः ॥ ८ ॥
तत्राभूदभिभूतप्रभूतमायानिकायशतधूर्तः।

त्तिलकादिग्रन्थसमाप्तिष्वनन्तराजस्य वर्णनं कृतमस्ति. अनन्तराजस्य राज्यकालस्तु १०२८ मितात्खिस्तसंवत्सरादारभ्य १०८० मितसंवत्सरपर्यन्तमासीत्. तस्मिन्नेव समये मालवाधीशो भोजराजोऽप्यासीत्. 'स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ। सूरी तस्मिन्क्षणे तुल्यं द्वावास्तां कविबान्धवौ ॥' इति राजतरङ्गिणी (७।२५९). सोऽनन्तराज इत्यर्थः. क्षेमेन्द्रेण बहवो ग्रन्था विरचिताः, तन्मध्याद्यावधि ज्ञाता ग्रन्थास्त्वेते— (१) अमृततरङ्गकाव्यम्, (२) औचित्यविचारचर्चा, (३) कनकजानकी, (४) कलाविलासः, (५) कविकण्ठाभरणम्, (६) चतुर्वर्गसंग्रहः, (७) चारुचर्या, (८) चित्रभारतनाटकम्, (९) दशावतारचरितकाव्यम्, (१०) देशोपदेशः, (११) नीतिकल्पतरुः, (१२) पद्यकादम्बरी, (१३) पवनपञ्चाशिका, (१४) बृहत्कथामञ्जरी, (१५) बोधिसत्त्वावदानकल्पलता, (१६) भारतमञ्जरी, (१७) मुक्तावली, (१८) राजावली, (१९) रामायणमञ्जरी, (२०) लावण्यवती, (२१) लोकप्रकाशकोषः, (२२) वात्स्यायनसूत्रका(सा)रः, (२३) व्यासाष्टकम्, (२४) शशिवंशमहाकाव्यम्, (२५) समयमातृका, (२६) सुवृत्ततिलकम्, (२७) सेव्यसेवकोपदेशः, (२८) हस्तिजनप्रकाशः.

सकलकलानिलयानां धुर्यः श्रीमूलदेवाख्यः[1] ॥ ९ ॥

नानादिग्देशागतधूर्तैरुपजीव्यमानमतिविभवः ।
स प्राप विपुलसंपदमात्मगुणैश्चक्रवर्तीव ॥ १० ॥

भुक्तोत्तरं सहृदयैरास्थानी[2]संस्थितं कदाचित्तम् ।
अभ्येत्य सार्थवाहो[3] दत्तमहार्होपहारमणिकनकः ॥ ११ ॥

प्रणतो हिरण्यगुप्तः सहितः पुत्रेण चन्द्रगुप्तेन ।
प्राप्तासनसत्कारः प्रोवाच मुहूर्तविश्रान्तः ॥ १२ ॥ (युग्मम्)

अतिपरिचयसप्रतिभा तव पुरतो मादृशामियं वाणी ।
ग्राम्याङ्गनेव नगरे न तथा प्रागल्भ्यमायाति ॥ १३ ॥

पिहितबृहस्पतिधिषणो रुचिरः प्रज्ञामरीचिनिचयस्ते ।
तीक्ष्णांशोरिव सहजः प्रोषिततिमिराः करोत्याशाः ॥ १४ ॥

आजन्मार्जितबहुविधमणिमौक्तिककनकपूर्णकोषस्य ।
एको ममैष सूनुः संजातः पश्चिमे वयसि ॥ १५ ॥

मोहस्थानं बाल्यं यौवनमपि मदनमानसोन्मादम् ।
अनिलावलोलनलिनीदलजलचपलाश्च वित्तचयाः ॥ १६ ॥

हारिण्यो हरिणदृशः सततं भोगाब्जमधुकरा धूर्ताः ।
पतिता परम्परैषा दोषाणां मम सुतस्यास्य ॥ १७ ॥ (युग्मम्)

धूर्तकरकन्दुकानां वारवधूचरणनूपुरमणीनाम् ।
धनिकगृहोत्पन्नानां मुक्तिर्नास्त्येव मुग्धानाम् ॥ १८ ॥

अज्ञातदेशकालाश्चपलमुखाः पङ्गवोऽपि सप्लुतयः ।
नवविहगा इव मुग्धा भक्ष्यन्ते धूर्तमार्जारैः ॥ १९ ॥

---

१. मूलदेवनामा कश्चिदतिप्राचीनः कलाशास्त्रप्रवर्तक आसीत्. अस्यैव कर्णीसुत कलाङ्कुरः, मूलभद्रः, एतान्यपि नामान्तराणि सन्ति. सुबन्धुप्रणीतायां वासवदत्तायां वास वदत्तास्वयंवरवर्णने 'तत्र च केचित्कलाङ्कुरा इव विजितनगरमण्डनाः' इत्यस्ति. तट्टीकाय च 'कलाङ्कुरा इव मूलदेवा इव । कर्णीसुतो मूलदेवो मूलभद्रः कलाङ्कुर इति हारावर्ल इत्यादि वर्तते. कादम्बरीकथायां विन्ध्याटवीवर्णने 'कर्णीसुतकथेव संनिहितविपुलाचल इत्याद्यस्ति. कथासरित्सागरे च नवाशीतितमे चतुर्विंशोत्तरशततमे च तरङ्गे मूलदेवकथ वर्तते. तत्र च विक्रमादित्यसभायां मूलदेव आसीदित्यादि वर्णितमस्ति. २. सभा. ३. श्रेष्ठी

आश्रितजनतनयोऽयं तव विद्वन्निजसुताधिकः सत्यम् ।
न यथा प्रयाति नाशं तथास्य बुद्धिं प्रयच्छ पराम् ॥ २० ॥

इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य ।
तमुवाच मूलदेवः प्रीतिप्रसरैः प्रसारितौष्ठाग्रः ॥ २१ ॥

आस्तामेष सुतस्ते मम भवने निज इव प्रयत्नपरः ।
ज्ञास्यति मयोपदिष्टं शनकैः सकलं कलाहृदयम् ॥ २२ ॥

इति तस्य शासनेन स्वसुतं निःक्षिप्य तद्गृहे मतिमान् ।
नत्वाथ सार्थवाहः प्रययौ निजमन्दिरं मुदितः ॥ २३ ॥

अथ शिथिलकिरणजालो धूसरकान्तिर्निरम्बर[1]स्तरणिः ।
अभवददृश्यः शनकैर्धूर्तैरिव निर्जितः कितवः[2] ॥ २४ ॥

अस्तमिते दिवसकरे तिमिरभर[3]द्विरदसंसक्ता ।
सिन्दूरपटलपाटलकान्तिरिवाग्रे बभौ संध्या ॥ २५ ॥

त्यक्तापि प्रतिदिवसं दिवसद्युतिरनुजगाम दिवसकरम् ।
न तु रक्तापि हि संध्या हृदयं जानाति कः स्त्रीणाम् ॥ २६ ॥

गगनाङ्गणकमलवने संध्यारागे गते शनैः क्वापि ।
अप्राप्तस्थितिविकलं बभ्राम भ्रमर[4]विभ्रमं तिमिरम् ॥ २७ ॥

तीक्ष्णांशुविरहमोहै[5]स्तिमिरैरिव मीलिता बभूव मही ।
तीव्रोऽपि जनस्य सदायातः खलु वल्लभो भवति ॥ २८ ॥

रजनी रराज सिततरतारकमुक्ताकलापकृतशोभा ।
शबररमणीव परिचिततिमिरमयूरच्छदाभरणा ॥ २९ ॥

अथ पथिकवधूदहनः शनकैरुदभून्निशाकरालोकः ।
कुमुदप्रबोधदूतो व्यसनगुरुश्चक्रवाकीणाम् ॥ ३० ॥

मन्मथसितातपत्रं दिग्वनितास्फटिकदर्पणो विमलः ।
विरराज रजनिरमणीसिततिलको यामिनीनाथः ॥ ३१ ॥

---

१. अम्बरं वस्त्रमाकाशश्च. २. द्यूतकारः. ३. तिमिरसमूह एव हस्ती. ४. भ्रमरसदृ-
. ५. मोहैरिव तिमिरैरित्यन्वयः. मोहस्य कृष्णवर्णत्वं कविसंप्रदायसिद्धम्.

निजकरमृणालवल्लीवलयविलासी ललास सितकान्तिः ।
गगनतटिनीतटान्ते रजनिकरो राजहंस इव ॥ ३२ ॥
श्यामा शुशुभे शशिना तया मनोभूर्मधूत्सवस्तेन ।
मदमुदितमानसानां तेनापि मृगीदृशां लीला ॥ ३३ ॥
धूर्ताः समृद्धिसचिवा विच्छायां पद्मिनीं परित्यज्य ।
फुल्लानि विविशुरलयः सानन्दाः कुमुदवृन्दानि ॥ ३४ ॥
ज्योत्स्नाभसस्मेरा[1] सुललितशशिशकलपेशलकपाला ।
तारास्थिपटलहारा शुशुभे कापालिकीव निशा ॥ ३५ ॥
तस्मिन्प्रौढनिशाकरकिरणप्रकरप्रकाशिताशेषे ।
निजमणिभवनोद्याने निर्वर्तितभावनासमाधानः ॥ ३६ ॥
स्फटिकासनोपविष्टः सह शशिना निर्विभागमित्रेण ।
कन्दलिमुख्यैः शिष्यैः परिवारितपादपीठान्तः ॥ ३७ ॥
प्रोवाच **मूलदेवो** वीक्ष्य चिरं सार्थवाहसुतमग्रे ।
कुर्वन्दशनमयूखैर्लज्जालीनामिव ज्योत्स्नाम् ॥ ३८ ॥ (विशेषकः
शृणु पुत्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम् ।
ज्ञाते भवन्ति यस्मिन्क्षणरुचिचपलाः[2] श्रियोऽप्यचलाः ॥ ३९ ॥
एकोऽस्मिन्भवगहने तृणपल्लववलयजालसंच्छन्नः ।
कूपः पतन्ति यस्मिन्मुग्धकुरङ्गा निरालम्बे ॥ ४० ॥
सोऽयं निधानकुम्भो दम्भो नाम स्वभावगम्भीरः ।
कुटिलैः कुहकभुजंगैः संवृतवदनः स्थितो लोके ॥ ४१ ॥
मायारहस्यमन्त्रश्चिन्तामणिरीप्सितार्थानाम् ।
दम्भः प्रभावकारी धूर्तानां श्रीवशीकरणम् ॥ ४२ ॥
मत्स्यस्येवाप्सु सदा दम्भस्य ज्ञायते गतिः केन ।
नास्य करौ न च पादौ न शिरो दुर्लक्ष्य एवासौ ॥ ४३ ॥

---

१. 'ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीनन्तर्धानव्यसनरसिका रात्रिका[...]लिकीयम् । द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छन[...]च्छलेन ॥' इति काव्यप्रकाशोदाहृतं रूपकालंकारोदाहरणपद्यमनुकरोतीयमार्या. २. विद्यु[...]

मन्त्रबलेन भुजंगा मुग्धकुरङ्गाश्च कूटयन्त्रेण ।
स्थलजालेन विहंगा गृह्यन्ते मानवाश्च दम्भेन ॥ ४४ ॥
जनहृदयविप्रलम्भो मायास्तम्भो जगज्जयारम्भः ।
जयति सदानुपलम्भो मायारम्भोदयो दम्भः ॥ ४५ ॥
सततावर्तभ्रान्ते दुःसहमायासहस्रकुटिलारे ।
मूलं दम्भो नाभिर्विपुलतरे चक्रिकाचक्रे ॥ ४६ ॥
नयननिमीलनमूलः सुचिरं स्नानार्द्रचूलजलसिक्तः ।
दम्भतरुः शुचिकुसुमः सुखशतशाखाशतैः फलितः ॥ ४७ ॥
व्रतनियमैर्बकदम्भः संवृतनियमैश्च कूर्मजो दम्भः ।
निभृतगतिनयननियमैर्घोरो मार्जारजो दम्भः ॥ ४८ ॥
बकदम्भो दम्भपतिर्दम्भनरेन्द्रश्च कूर्मजो दम्भः ।
मार्जारदम्भ एष प्राप्तो दम्भेषु चक्रवर्तित्वम् ॥ ४९ ॥
नीचनखश्मश्रुकचश्चूली जटिलः प्रलम्बकूर्चो वा ।
बहुमृत्तिकापिशाचः परिमितभाषी प्रयत्नपादत्रः ॥ ५० ॥
स्थूलग्रन्थिपवित्रकपृष्ठार्पितहेमवल्लीकः ।
कक्षार्पितपटपल्लवरुद्धभुजो भाण्डहस्त इव ॥ ५१ ॥
अङ्गुलिभङ्गविकल्पनविविधविवादप्रवृत्तपाण्डित्यः ।
जपचपलोष्ठः सजने ध्यानपरो नगररथ्यासु ॥ ५२ ॥
साभिनयाञ्चितचुलकैराचमनैः सुचिरमज्जनैस्तीर्थे ।
संरुद्धसकललोकः पुनः पुनः कर्णकोणसंस्पर्शी ॥ ५३ ॥
सीत्कृतदन्तनिनादावेदितहेमन्तदुःसहस्नानः ।
विस्तीर्णतिलकचर्चासूचितसर्वोपचारसुरपूजः ॥ ५४ ॥
शिरसा बिभर्ति कुसुमं विनिपतितां काकदृष्टिमिव रचयन् ।
एवं रूपं पुरुषो यो यः स स दाम्भिको ज्ञेयः ॥ ५५ ॥
निर्गुणलोकप्रणतः सगुणे स्तब्धः स्वबन्धुषु द्वेषी ।
परजनकरुणाबन्धुः कीर्त्यर्थी दाम्भिको धूर्तः ॥ ५६ ॥

कार्योपयोगकाले प्रणतशिराश्चाटुशतकारी ।
सभ्रूभङ्गो मौनी कृतकार्यो दाम्भिकः क्रूरः ॥ ९७ ॥
स्तम्भितविबुधसमृद्धिर्दैत्यो योऽभूत्पुरा जम्भः ।
दम्भः सोऽयं निवसति भूमितले भूतदेहेषु ॥ ९८ ॥
शुचिदम्भः शमदम्भः स्नातकदम्भः समाधिदम्भश्च ।
निःस्पृहदम्भस्य तुलां यान्ति तु नैते शतांशेन ॥ ९९ ॥
शौचाचारविवादी मृत्क्षयकारी स्वबान्धवस्पर्शी ।
शुचिदम्भेन जनोऽयं विश्वामित्रत्वमायाति ॥ ६० ॥
संहृतबहुविधसत्त्वो निःक्षेपद्रविणवारिबहुतृष्णः ।
सततमहिंसादम्भो वडवाग्निः सर्वभक्षोऽयम् ॥ ६१ ॥
मुण्डो जटिलो नग्नश्छत्री दण्डी कषायचीरी वा ।
भस्मस्मेरशरीरो दिशि दिशि भोगी विजृम्भते दम्भः ॥ ६२ ॥
खल्वाटः स्थूलवपुः शुष्कतनुर्मुनिसमानरूपो वा ।
शाटकवेष्टितशीर्षश्चैत्योन्नतशिखरवेष्टनो वापि ॥ ६३ ॥
लोभः पितातिवृद्धो जननी माया सहोदरः कूटः ।
कुटिलाकृतिश्च गृहिणी पुत्रो दम्भस्य हुंकारः ॥ ६४ ॥
भगवान्पुरा स्वयंभूः कृत्वा भुवनानि भूतसर्गं च ।
विरतव्यापारतया सुचिरं चिन्तान्वितस्तस्थौ ॥ ६५ ॥
दृष्ट्वा स मर्त्यलोके दिव्यदृशा मानुषान्निरालम्बान् ।
आर्जवयोगविशेषादप्राप्तधनादिसंभोगान् ॥ ६६ ॥
मीलितनयनः क्षिप्रं स्थित्वा मायामये समाधाने ।
असृजन्नृणां विभूत्यै दम्भं संभावनाधारम् ॥ ६७ ॥
बिभ्राणः कुशपूलीं पुस्तकमाले कमण्डलुं शून्यम् ।
निजहृदयकुटिलशृङ्गं दण्डं कृष्णाजिनं खनित्रं च ॥ ६८ ॥
स्थूलतरकुशपवित्रकलाञ्छितकर्णः पवित्रपाणिश्च ।
सुव्यक्तमुण्डमस्तककुशवेष्टितचूलमूलसितकुसुमः ॥ ६९ ॥

काष्ठस्तब्धग्रीवो जपचपलौष्ठः समाधिलीनाक्षः ।
रुद्राक्षवलयहस्तो मृत्परिपूर्णं वहन्पात्रम् ॥ ७० ॥
नयनाञ्चलैः सकोपैर्भ्रुकुटीहुंकारवदनसंज्ञाभिः ।
बहुविधकदर्थनाभिः कथिताखिलहृदयवाञ्छितो मौनी ॥ ७१ ॥
रक्षन्परसंस्पर्शं शौचार्थी ब्रह्मलोकेऽपि ।
दम्भः पुरोऽस्य तस्थावुत्थित एवासनाकाङ्क्षी ॥ ७२ ॥
आकल्पेन सुमहता सहसास्य वशीकृताः परं तेन ।
सप्तर्षयोऽपि तस्मै प्रणतास्तस्थुः कृताञ्जलयः ॥ ७३ ॥
तं दृष्ट्वा परमेष्ठी लीलाकृतसकलसर्गवर्गोऽपि ।
गौरवविस्मयहर्षैर्निःस्पन्दान्दोलितस्तस्थौ ॥ ७४ ॥
तस्यातितीव्रनियमाद्भ्रस्तेऽगस्त्येऽतिविस्मयेनेव ।
अल्पतपोव्रतलज्जाकुञ्चितपृष्ठे वसिष्ठे च ॥ ७५ ॥
अतिसरलनिजमुनिव्रतपरिगतकुत्से च कूणिते कौत्से ।
डम्बररहितात्मतपोनिरादरे नारदे विहिते ॥ ७६ ॥
निजजानुसंधिशिखरे जमदग्नौ मग्नवदने च ।
त्रस्ते विश्वामित्रे वलितगले गालवे भृगौ मग्ने ॥ ७७ ॥
सुचिरोत्थितमतिकोपादासनकमले निविष्टदृष्टिं च ।
शूलप्रोतमिवाग्रे निःस्पन्दममन्दगर्वगुरुगात्रम् ॥ ७८ ॥
ज्ञात्वा तमासनार्थिनमवदद्देवश्चतुर्मुखः प्रीत्या ।
विकसन्निजदशनरुचा विहसन्निव वाहनं हंसम् ॥ ७९ ॥
उपविश पुत्र ममाङ्के नियमेन महीयसातिचित्रेण ।
अर्होऽसि गुणगणोद्गतगौरवसंवादिनानेन ॥ ८० ॥
इत्युक्तो विश्वसृजा तस्याङ्कमशङ्कया ससंकोचः ।
अभ्युक्ष्य वारिमुष्ट्या कृच्छ्रेणोपाविशद्दम्भः ॥ ८१ ॥
वाच—नोच्चैर्वाच्यमवश्यं यदि वाच्यं हस्तपद्मेन ।
आच्छाद्य वक्त्ररन्ध्रं स्पृष्टो न स्यां यथास्यवातांशैः ॥ ८२ ॥

. मुखमारुतैः.

तत्तस्य शौचमतुलं दृष्ट्वा स्मेराननो ब्रह्मा ।
दम्भोऽसीति जगाद प्रायो हस्ताग्रमाकम्प्य ॥ ८३ ॥
उत्तिष्ठ सकलजलनिधिपरिखावलिमेखलां महीमखिलाम् ।
अवतीर्य भुङ्क्ष्व भोगान्विबुधैरपि तत्त्वतो न विज्ञातः ॥ ८४ ॥
इत्यादराद्विसृष्टो विधिना संसारसागरगतानाम् ।
कण्ठे शिलां निबध्नन्मर्त्यानामवततार महीम् ॥ ८५ ॥
अथ मर्त्यलोकमेत्य भ्रान्त्वा दम्भो वनानि नगराणि ।
विनिवेश्य गौडविषये निजजयकेतुं जगाम दिशः ॥ ८६ ॥
वचने बाह्लीकानां व्रतनियमे प्राच्यदाक्षिणात्यानाम् ।
अधिकारे कीराणां दम्भः सर्वत्र गौडानाम् ॥ ८७ ॥
एते दम्भसहायाः प्रतिग्रहश्राद्धसिद्धचूर्णेन ।
कुर्वन्ति ये प्रभाते यतस्ततो भस्मना तिलकम् ॥ ८८ ॥
तूर्णं सहस्रभागैर्भुवनतले संविभज्य भूतानि ।
मूर्तः सततं निवसति दम्भो वदनेऽधिकरणभट्टानाम् ॥ ८९ ॥
गुरुहृदयमविशदग्रे बालकहृदयं तपस्विहृदयं च ।
कुटिलं नियोगिहृदयं दीक्षितहृदयं स्वयं दम्भः ॥ ९० ॥
तदनु च गणकचिकित्सकसेवकवणिजां सहेमकाराणाम् ।
नटभटगायनवाचकचक्रचराणां च हृदयानि ॥ ९१ ॥
अंशैः प्रविश्य हृदयं विविधविकारैः समस्तजन्तूनाम् ।
दम्भो विवेश पश्चादन्तरमिह पक्षिवृक्षाणाम् ॥ ९२ ॥
मत्स्यार्थी चरति तपः सुचिरं निःस्पन्द एकपादेन ।
तीर्थेषु बकतपस्वी तेन विहंगान्गतो दम्भः ॥ ९३ ॥
विपुलजटावल्कलिनः शीतातपवातकर्शिताः सततम् ।
वृक्षा जलार्थिनो यद्दम्भस्य विजृम्भितं तदपि ॥ ९४ ॥
एवं विचारणीयः सर्वगतः सर्वहृत्सदा दम्भः ।
ज्ञाते तस्मिन्विविधे विफला मायाविनां माया ॥ ९५ ॥

दम्भविकारः पुरतो वञ्चकचक्रस्य कल्पवृक्षोऽयम् ।
वामनदम्भेन पुरा हरिणा त्रैलोक्यमाक्रान्तम् ॥ ९६ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे दम्भाख्यानं नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्वतो भयं दृष्टम् ।
कार्याकार्यविचारो लोभाकृष्टस्य नास्त्येव ॥ १ ॥

मायाविनिमयविभ्रमनिह्नववैचित्यकूटकपटानाम् ।
संचयदुर्गपिशाचः सर्वहरो मूलकारणं लोभः ॥ २ ॥

सत्त्वप्रशमतपोभिः सत्त्वधनैः शास्त्रवेदिभिर्विजितः ।
लोभोऽवटं[1] प्रविष्टः कुटिलं हृदयं किराटानाम्[2] ॥ ३ ॥

क्रयविक्रयकूटतुलालाघवनिःक्षेपरक्षणव्याजैः ।
एते हि दिवसचौरा मुष्णन्ति मुदा जनं वणिजः ॥ ४ ॥

हृत्वा धनं जनानां दिनमखिलं विविधकूटमायाभिः ।
वितरति गृहे किराटः कष्टेन वैंराटकत्रितयम्[3] ॥ ५ ॥

आख्यायिकानुरागी व्रजति सदा पुण्यपुस्तकं श्रोतुम् ।
दष्ट इव कृष्णसर्पैः पलायते दानधर्मेभ्यः ॥ ६ ॥

द्वादश्यां पितृदिवसे संक्रमणे सोमसूर्ययोर्ग्रहणे ।
सुचिरं स्नानं कुरुते न ददाति कपर्दिकामेकाम् ॥ ७ ॥

दत्त्वा दिशि दिशि दृष्टिं याचकचकितोऽवगुण्ठनं कृत्वा ।
चौर इव कुटिलचारी पलायते विकटरथ्याभिः ॥ ८ ॥

न ददाति प्रतिवचनं विक्रयकाले शठो वणिङ्मौनी ।
निःक्षेपपाणिपुरुषं दृष्ट्वा संभाषणं कुरुते ॥ ९ ॥

उत्तिष्ठति नमति वणिक्पृच्छति कुशलं ददाति च स्थानम् ।
निःक्षेपपाणिपुरुषं दृष्ट्वा धर्म्यां कथां कुरुते ॥ १० ॥

---

१. गर्तम्. २. वैश्यजातिविशेषाणाम्. ३. गृहव्ययार्थमतिस्वल्पं ददातीति भावः.

कश्चिद्वदति तमेत्य द्रविणं निःक्षिप्य हन्त गन्तासि ।
भ्रातः परं प्रभाते विष्टिदिनं[1] किं करोम्यद्य ॥ ११ ॥
तच्छ्रुत्वा विकसितदृग्वदति स मिथ्यैव नाटयन्खेदम् ।
कार्ये प्रसारिताक्षः पुनः पुनः पार्श्वमवलोक्य ॥ १२ ॥
त्वदधीनं स्थानमिदं किं तु चिरं न्यासपालनं कठिनम् ।
विषमौ च देशकालौ साधोस्तव तदपि दासोऽहम् ॥ १३ ॥
भद्रा न दूषितैषा निःक्षेपक्षेमकारिणी शस्ता ।
इत्यनुभूतं बहुशः कार्यज्ञैस्त्वं तु जानासि ॥ १४ ॥
विष्टिदिने किमपि पुरा न्यस्तं केनापि मित्रेण ।
तूर्णं पुनश्च शनकैर्नीतं क्षेमेण कुशलेन[2] ॥ १५ ॥
इत्यादि मुग्धबुद्धेरसमञ्जसवर्णनं रहः कृत्वा ।
गृह्णाति कनकनिकरं नृत्यंस्तत्तन्मनोरथैः पापः ॥ १६ ॥
तत्संचूर्णनजातैः क्रयविक्रयलाभराशिभिरनन्तैः ।
भाण्डप्रतिभाण्डचयैरुपहसति धनाधिनाथं सः ॥ १७ ॥
पूर्णाः कदर्यवणिजां निःसंभोगा निधानधनकुम्भाः ।
सीदन्ति कुचतटा इव दुःखफला बालविधवानाम् ॥ १८ ॥
दानोपभोगविरहितहिरण्यरक्षाकृतक्षणाः सततम् ।
संसारजीर्णमन्दिरविषममहामूषका वणिजः ॥ १९ ॥
अटति समुत्कटवेष्टितविकटपटस्फुटफटाटोपः ।
कुटिलः कण्टकनिचितः पुरपतिनामा निधिव्यालः ॥ २० ॥
अथ पुरुषः स दिगन्तं भ्रान्त्वा केनापि दैवयोगेन ।
नष्टधनो जनरहितः प्राप्तः सुचिरान्निजं देशम् ॥ २१ ॥
पृच्छति कमपि सशङ्कः स किराटः क्व नु गतो महासत्त्वः ।
तमुपेत्य वदति कश्चित्तस्याद्य सखे विभूतिरन्यैव ॥ २२ ॥
विविधनवांशुकमृगमदचन्दनकर्पूरमरिचपूगफलैः ।
खटिकाहस्तः स सदा गणयति कोटीर्मुहूर्तेन ॥ २३ ॥

---

१. भद्रानामकदुष्टकरणयुक्तं दिनम्. २. कुशलेनेत्यधिकमिव भाति.

अस्मिन्मेरुविशाले वरभवने रुचिरभित्तिकृतचित्रे ।
पुरपतिनाप्यनुयातो वसति सुखं स हि महाजनो यत्र ॥ २४ ॥
श्रुत्वैतदतुलविस्मयलोलितमौलिः स तद्गृहं गत्वा ।
द्वारे स्थगितस्तिष्ठति निष्प्रतिभो जीर्णकर्पटः सुचिरम् ॥ २५ ॥
तं तुङ्गभवनवलभीजालान्तरतो वणिक्परिज्ञाय ।
नोच्छ्वसिति नष्टचेष्टस्ताडित इव मूर्ध्नि वज्रेण ॥ २६ ॥
उपसृत्य मन्दमन्दं कथमपि संप्राप्तनिर्जनावसरः ।
तं याचते स पुरुषो द्रविणं स्वं प्रकटिताभिख्यः ॥ २७ ॥
तं वदति सोऽन्यदृष्टिः सभ्रूभङ्गं विधूतहस्ताग्रः ।
वञ्चकवचनः पापो वृत्तिक्षीणः कुतोऽयमायातः ॥ २८ ॥
कस्त्वं कस्य कुतो वा दर्शनमपि न स्मरामि किं कथनैः ।
अहह कदा कुत्र त्वं वद कस्य किमर्पितं केन ॥ २९ ॥
पश्यत कष्टमनिष्टः कलिकालः कीदृशोऽयमायातः ।
मत्तोऽर्थमेष वाञ्छति लोको जानाति वा सर्वम् ॥ ३० ॥
हरगुप्तकुलेऽस्माकं निःक्षेपग्रहणमप्यसंभाव्यम् ।
किं पुनरपह्नवोद्गतघोरमहापातकस्पर्शः ॥ ३१ ॥
तदपि सतताभिशंसी प्रत्याख्येयो जनः कथं महताम् ।
कथय दिनं तद्दिवसे लिखितं सर्वं स्वयं पश्य ॥ ३२ ॥
वृद्धोऽहं न्यस्तभरः पुत्रे सर्वं ममास्ति लिखितं हि ।
इति तेन विनष्टधृतिः स विसृष्टस्तत्सुतान्तिकं प्राप्तः ॥ ३३ ॥
तातो जानाति सुतो जानाति पितैव लिखति सकलं यत् ।
इति तस्य भवति सुचिरं गतागतं कन्दुकस्येव ॥ ३४ ॥
राजकुलद्वारगते तस्मिन्प्राप्तप्रवासदत्तार्थे ।
सहते नरपतिकोपं त्यजति किराटो न रूपकस्यांशम् ॥ ३५ ॥
परिपीडितः स राज्ञा विविधैरपि यातनाशस्त्रैः ।
मम हस्ते निक्षिप्तं किंचिन्नास्तीति वक्त्येव ॥ ३६ ॥

एवं स्वभावलुब्धा भवन्ति धनलवणवारिबहुतृष्णाः ।
तृणलवमिव निजदेहं त्यजन्ति लेशं न वित्तस्य ॥ ३७ ॥
देवं धनाधिनाथं वैश्रवणं सकलसंपदां निलयम् ।
शुक्रः प्रोवाच पुरा वित्तार्थी बालमित्रमभ्येत्य ॥ ३८ ॥
पूर्णः सखे तवायं विभवो विजितामरासुरैश्वर्यः ।
हर्षं विदधाति परं सुहृदां शोकं च शत्रूणाम् ॥ ३९ ॥
त्वयि सुहृदि वित्तनाथे निःस्वोऽहं बहुकुटुम्बसंभारः ।
समदुःखसुखं मित्रं स्वाधीनतयोदितं प्रशंसन्ति ॥ ४० ॥
यशसि विहितादराणामर्थिभिरुपजीव्यमानविभवानाम् ।
अभिजातवंशजानां सुहृदुपभोग्याः श्रियो महताम् ॥ ४१ ॥
उपनतमतिपुण्यचयैः संपूर्णं रक्षितं च यत्नेन ।
संपदि विपदि त्राणं भवति निधानं च मित्रं च ॥ ४२ ॥
इत्युक्तः सप्रणयं दैत्याचार्येण निर्जने धनदः ।
तमुवाच विचिन्त्य चिरं संरुद्धः स्नेहलोभाभ्याम् ॥ ४३ ॥
जानामि बालमित्रं त्वामहमत्यन्तसंभृतस्नेहम् ।
किं तु न जीवितजीवं द्रविणलवं त्यक्तुमीशोऽस्मि ॥ ४४ ॥
स्नेहार्थी बन्धुजनः कार्यैर्बहुभिर्भवन्ति मित्राणि ।
दाराः सुताश्च सुलभा धनमेकं दुर्लभं लोके ॥ ४५ ॥
अतिसाहसमतिदुष्करमत्याश्चर्यं च दानमर्थानाम् ।
योऽपि ददाति शरीरं न ददाति स वित्तलेशमपि ॥ ४६ ॥
इत्याशापरिहारैः प्रत्याख्यातो धनाधिनाथेन ।
भग्नमुखो लुलितमतिर्लज्जावक्रो ययौ शुक्रः ॥ ४७ ॥
स विचिन्त्य गृहे सुचिरं सचिवैः सह मायया महायोगी ।
हर्तुं द्रविणमशेषं विवेश हृदयं धनेशस्य ॥ ४८ ॥
शुक्राविष्टशरीरो वैश्रवणः सकलमद्भुतत्यागः ।
तत्कृतसंकेतेभ्यः प्रददौ वित्तं द्विजातिभ्यः ॥ ४९ ॥

कौबेरं धनमखिलं हृत्वा यातेऽथ दानवाचार्ये ।
सुचिरं धनाधिनाथः शुशोच विज्ञाय तां मायाम् ॥ ९० ॥
हस्तन्यस्तललाटः सह शङ्खमुकुन्दकुन्दपद्माद्यैः[1] ।
संचिन्त्य शुक्रविकृतिं स जगादोष्णं विनिःश्वस्य ॥ ९१ ॥
सुहृदा मर्मज्ञेन व्याजान्मायाविनातिलुब्धेन ।
धूर्तेन वञ्चितोऽहं दैत्याश्रयदुर्जयेन शुक्रेण ॥ ९२ ॥
अधुना द्रव्यविहीनः क्षणेन तृणलाघवं प्राप्तः ।
कथयामि कस्य दुःखं करोमि किं वा क्व गच्छामि ॥ ९३ ॥
धनरहितं त्यजति जनो जनरहितं परिभवाः समायान्ति ।
परिभूतस्य शरीरे व्यसनविकारो महाभारः ॥ ९४ ॥
दयितेषु शरीरवतां बत धर्मलतालवालेषु ।
द्रविणेषु जीवितेषु च सर्वं याति प्रयातेषु ॥ ९५ ॥
विद्वान्सुभगो मानी विश्रुतकर्मा कुलोन्नतः शूरः ।
वित्तेन भवति सर्वो वित्तविहीनस्तु सद्गुणोऽप्यगुणः ॥ ९६ ॥
इति दुःसहधनविरहक्लेशानलशोषिताशयो धनपः ।
सुचिरं विमृष्य सचिवैर्देवं शर्वं ययौ शरणम् ॥ ९७ ॥
प्राक्प्रतिपन्नसखोऽसौ विश्वशरण्यो महेश्वरस्तेन ।
विज्ञाप्तो निजवृत्तं दूतं विससर्ज शुक्राय ॥ ९८ ॥
दूताहूतं सहसा प्राप्तं शुक्रं धनप्रभाशुक्रम्[2] ।
अञ्जलिविरचितमुकुटं प्रोवाच पुरःस्थितं पुरजित् ॥ ९९ ॥
मित्रमयं द्रविणपतिर्भवता बत वञ्चितः कृतज्ञेन ।
मित्रद्रोहे प्रसरति नहि नाम जनः कृतघ्नोऽपि ॥ ६० ॥
अगणितयशसा त्यक्तस्थितिना क्रियतेऽथ याकृतज्ञेन ।
स्निग्धे सुहृदि सरागे मित्रे तव वञ्चना न युक्ता सा ॥ ६१ ॥
एतत्किं श्रुतसदृशं त्वद्व्रतयोग्यं कुलानुरूपं वा ।
कृतवानसि यत्सुमते परिभूतगुणोदयं कर्म ॥ ६२ ॥

---

१. शङ्खादयो निधयः कुबेरसमीपे तिष्ठन्ति. २. धनप्राप्तिजनितकान्त्या शुक्रं शुक्लम्.

किमयं सुनयाभ्यासः प्रशमो वा गुरुजनोपदेशो वा ।
मतिविभवः सहजो वा वञ्चकतां येन यातोऽसि ॥ ६३ ॥
कस्य न दयितं वित्तं चित्तं ह्रियते न कस्य वित्तेन ।
किं तु यशोधनलुब्धा वाञ्छन्ति न दुष्कृतैरर्थान् ॥ ६४ ॥
मा मा मलिनय विमलं भृगुकुलममलं मलेन लोभेन ।
लोभजलदो हि शत्रुर्विशदयशोराजहंसानाम् ॥ ६५ ॥
त्यक्त्वा कीर्तिमनन्तामनिलाकुलतृणलवोपमानर्थान् ।
गृह्णाति यः स मध्ये धूर्तानां कीदृशो धूर्तः ॥ ६६ ॥
उत्सृज्य साधुवृत्तं कुटिलधिया वञ्चितः परो येन ।
आत्मैव मूढमतिना कृतसुकृतो वञ्चितस्तेन ॥ ६७ ॥
नियता दूषितयशसां बत किसलयकोमला प्रकृत्यैव ।
अपवादविषतरूत्थैरामोदैर्मूर्छिता लक्ष्मीः ॥ ६८ ॥
नहि नाम सज्जनानां शुद्धयशःस्फटिकदर्पणो विमलः ।
परिभवदुःखितजनतानिःश्वासैर्मलिनतामेति ॥ ६९ ॥
असमञ्जसमतिमलिनं मोहाद्यक्ति समागतं कर्म ।
तस्य विशुद्धिः क्रियतां परवित्तसमर्पणेनैव ॥ ७० ॥
अपवादधूलिधूसरममलयशो मृज्यतां स्वहस्तेन ।
असद्वचनं क्रियतां परधनमुत्सृज्यतामेतत् ॥ ७१ ॥
इत्युक्तः सानुनयं त्रिभुवनगुरुणापि देवदेवेन ।
परधननिबद्धतृष्णः प्रोवाच कृताञ्जलिः शुक्रः ॥ ७२ ॥
भगवन्भवतः शासनममरेन्द्रकिरीटकोटिविश्रान्तम् ।
लङ्घयति को नु मोहाद्दौर्गत्यं सत्त्वहारि यदि न स्यात् ॥ ७३ ॥
यस्य क्षीणस्य गृहे भृत्या दाराः सुताश्च सीदन्ति ।
कार्याकार्यविचारो द्रविणादानेषु कस्तस्य ॥ ७४ ॥
मित्रमयं धननाथो विपदि त्राणं विचिन्तितः सततम् ।
वृद्धिं यातः सुमहानाशाबन्धश्च मे हृदये ॥ ७५ ॥

अभ्येत्य याचितोऽपि त्यक्त्वा लज्जां मया विगतलज्जः ।
चिच्छेदैष ममाशां सहसा प्रतिषेधशस्त्रेण ॥ ७६ ॥
तेन प्रहतमशस्त्रं दाहोऽनग्निश्च निर्विषं मरणम् ।
विहितं शठेन मोहादाशाभङ्गः कृतो येन ॥ ७७ ॥
तस्मान्ममैष शत्रुः सुकृतसमं शत्रुवञ्चनापापम् ।
रिक्तस्य निरपवादो व्याजेनोपार्जितोऽप्यर्थः ॥ ७८ ॥
अणु धनमपि न त्याज्यं मम भवता ज्ञापिते सत्यम् ।
वित्तं जीवितमग्र्यं जीवितहानिर्धनत्यागः ॥ ७९ ॥
इति संभाषिणमसकृद्दैत्यगुरुं प्रार्थितं पुनर्बहुशः ।
कवलीचकार सहसा प्रतिषेधरुषा विरूपाक्षः ॥ ८० ॥
जठरान्तरे पुरारेः प्रलयानलविपुलभीषणाभोगे ।
प्रक्वाथ्यमानकायः शुक्रश्चुक्रोश साक्रोशः ॥ ८१ ॥
त्यज धनमिति विषमदृशा पुनः पुनः प्रेरितोऽवदच्छुक्रः ।
निधनं ममास्तु भगवन्धनदधनं न त्यजामि किंचिदपि ॥ ८२ ॥
अथ धारणाप्रवृद्धज्वलनज्वालासहस्रविकराले ।
शुक्रश्चुक्रोश भृशं घोरगभीरे हरोदरे पतितः ॥ ८३ ॥
तमुवाच देवदेवस्त्यज दुर्ग्रहदग्ध परवित्तम् ।
अस्मिन्नुदरमहोदधिवडवाग्नौ मा गमः प्रलयम् ॥ ८४ ॥
सोऽवददतिशयतापस्फुटितास्थिवसाप्रवाहबहलाग्नौ ।
परमिह मरणं श्रेयो द्रविणकणं न त्यजामि सोच्छ्वासः ॥ ८५ ॥
पुनरपि घोरतरोद्गतकालानलधारणानलज्वलितः ।
शुक्रश्चक्रे देव्याः स्तोत्रं क्षणलेशशेषायुः ॥ ८६ ॥
स्तोत्रपदाराधितया गौर्या प्रणयप्रसादिते रुद्रे ।
तद्वचसा लब्धधृतिः शुक्रद्वारेण निर्ययौ शुक्रः ॥ ८७ ॥
त्यक्त्वा स्वभावलुब्धास्तीव्रतरां यातनामपि सहन्ते ।
प्रत्युत्तरस्त्यजन्ति वित्तं कौटिल्यमिवाधमः सहजम् ॥ ८८ ॥

तस्माल्लोभसमुत्था कपटकला कुटिलवर्तिनी माया ।
लुब्धहृदयेषु निवसति नालुब्धो वञ्चनां कुरुते ॥ ८९ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे लोभवर्णनं नाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

कामः कमनीयतया किमपि निकामं करोति संमोहम् ।
विषमिव विषमं सहसा मधुरतया जीवनं हरति ॥ १ ॥
एते हि कामकलिताः परिमललीनालिवलयहुंकारैः ।
सूचितदानाः करिणो बध्यन्ते क्षिप्रमबलाभिः ॥ २ ॥
पादाघातशिताङ्कुशघटना निगडादिसंरोधम् ।
विषयमुषितः करीन्द्रः किं न स्मरवञ्चितः सहते ॥ ३ ॥
दीर्घव्यसननिरुद्धो भ्रूभङ्गज्ञो विधेयतां यातः ।
विषयविवशो मनुष्यः केलिशिखण्डीव नर्त्यते स्त्रीभिः ॥ ४ ॥
रक्ताकर्षणसक्ता मायाभिर्मोहतिमिररजनीषु ।
नार्यः पिशाचिका इव हरन्ति हृदयानि मुग्धानाम् ॥ ५ ॥
रागिमृगवागुराणां हृदयद्विपबन्धशृङ्खलौघानाम् ।
व्यसननववल्लरीणां स्त्रीणां नहि मुच्यते वशगः ॥ ६ ॥
संसारचित्रमायां शम्बरमायां विचित्तिमायां च ।
यो जानाति जितात्मा सोऽपि न जानाति योषितां मायाम् ॥ ७ ॥
कुसुमसुकुमारदेहा वज्रशिलाकठिनहृदयसद्भावाः ।
जनयन्ति कस्य नान्तर्विचित्रचरिताः स्त्रियो मोहम् ॥ ८ ॥
अनुरक्तजनविरक्ता नम्रोत्सिक्ता विरक्तरागिण्यः ।
वञ्चकवचनासक्ता नार्यः सद्भावशङ्किन्यः ॥ ९ ॥
जातः स एव लोके बहुजनदृष्टा विलासकुटिलाङ्गी ।
धैर्यध्वंसपताका यस्य न पत्नी प्रभुर्गेहे ॥ १० ॥
विजितस्य मदविकारैः स्त्रीभिर्मूकस्य नष्टसंज्ञस्य ।
गृहधूलिपटलमखिलं वदने निःक्षिप्यते भर्तुः ॥ ११ ॥

---

१ शम्बरो विचित्तिश्चातीव मायानिपुणौ दैत्यौ.

कृतकापरिस्फुटाक्षरकामकलाभिः स्वभावमुग्धेव ।
तिलकाय चन्द्रबिम्बं मुग्धपतिं याचते प्रौढा ॥ १२ ॥
स्वैरविहारगतागतखिन्नायास्तीर्थदर्शनव्याजैः ।
भर्ता विलासविजितश्चरणौ मृद्नाति चपलायाः ॥ १३ ॥
नयनविकारैरन्यं वचनैरन्यं विचेष्टितैरन्यम् ।
रमयति सुरतेनान्यं स्त्री बहुरूपा स्वभावेन ॥ १४ ॥
निजपतिचपलकुरङ्गी परतरुभृङ्गी स्वभावमातङ्गी ।
मिथ्याविभ्रमभृङ्गी कुटिलभुजंगी निजा कस्य ॥ १५ ॥
बहुविधतरुणनिरर्गलसंभोगसुखार्थभोगिनी वेश्या ।
धन्येति वदन्ति सदा सोच्छ्वासा निर्जने नार्यः ॥ १६ ॥
चपला तिष्ठति हर्म्ये गायति रथ्यावलोकिनी स्वैरम् ।
धावत्यकारणं वा हसति स्फटिकाश्ममालेव ॥ १७ ॥
पशुरिव वक्तुं कर्तुं किंचिदयं मम पतिर्न जानाति ।
उक्त्वेति गृहे स्वजनं पुरुषव्यापारमङ्गना कुरुते ॥ १८ ॥
प्रत्युत्थानं कुरुते व्यवहारगतागतैः स्वयं याति ।
उच्चैर्वदति च गेहे गृहिणी जीवन्मृतस्यैव ॥ १९ ॥
ईर्ष्यालुवृद्धभार्या सेवकपत्नी नियोगिभार्या वा ।
कारुकुशीलवनारी लुब्धवधूः सार्थवाहवनिता वा ॥ २० ॥
गोष्ठीविहरणशीला तरुणजने वत्सला प्रकृत्यैव ।
परगुणगणने सक्ता निजपतिदोषाभिधायिनी सततम् ॥ २१ ॥
अल्पधना बहुभोगा रूपवती विकृतरूपभार्या वा ।
मुग्धवधूः सकलकलामानवती नीचसंगमोद्विग्ना ॥ २२ ॥
द्यूतमधुपानसक्ता दीर्घकथागीतरागिणी कुशला ।
बहुपुंश्चलीवयस्या शूरजने प्रकृतिपक्षपातैव ॥ २३ ॥
त्यक्तगृहव्यापारा बहुविधवेषा निरर्गलाभ्यासा ।
प्रत्युत्तरसप्रतिभा सत्यविहीना स्वभावनिर्लज्जा ॥ २४ ॥

कुशलानामग्रवार्ताप्रश्नपरा प्रीतिपेशलालापा ।
विजने विविधक्रीडाडम्बरशौण्डा प्रकाशसावित्री ॥ २५ ॥
ऋतुतीर्थसुरनिकेतनगणकभिषग्बन्धुगेहगमनपरा ।
भोजनपानबहुव्यययात्रोत्सवकारिणी स्वतन्त्रेव ॥ २६ ॥
भिक्षुकतापसभक्ता स्वजनविरक्ता मनोरमासक्ता ।
दर्शनदीक्षारक्ता दयितविरक्ता समाधिसंयुक्ता ॥ २७ ॥
गोष्ठीरञ्जनमित्रा विज्ञेया नष्टचारित्रा ॥ २८ ॥ (कुलकम्)
सततानुरक्तदोषा मोहितजनता बहुग्रहाश्चपलाः ।
संध्याः स्त्रियः पिशाच्यो रक्तच्छायाहराः क्रूराः ॥ २९ ॥
कस्य न वाहनयोग्या मुग्धधियस्तुच्छसाधने लग्नाः ।
प्रीततया प्रशमरुचश्चपलासु स्त्रीषु येऽदान्ताः ॥ ३० ॥
शृङ्गारशौर्यकत्थनमसमञ्जसदानवर्णना विविधाः ।
एतावदेव तासाममन्त्रयन्त्रं वशीकरणम् ॥ ३१ ॥
कलिकालतिमिररजनीरजनिचरीणां सहस्रमायानाम् ।
स्त्रीणां नृशंसचरितैः कस्य न संजायते कम्पः ॥ ३२ ॥
निर्जितधनपतिविभवो बभूव भुवि विश्रुतो वणिङ्नाथः ।
धनदत्तो नाम पुरा रत्नानामाश्रयः पयोधिरिव ॥ ३३ ॥
तस्याभवद्विभूतिर्मूर्तेव मनोभुवः सुललिताङ्गी ।
तनया नयनविलासैर्विजिताशा वसुमती नाम ॥ ३४ ॥
प्रददौ स तामपुत्रः पुत्रपदे विनिहितां प्रियां पुत्रीम् ।
वणिजे विभवकुलोदयतुल्याय समुद्रदत्ताय ॥ ३५ ॥
रममाणः स तया सह हरिणाक्ष्या श्वशुरमन्दिरे सुचिरम् ।
प्रययौ कदाचिदग्रे द्वीपायातस्य सार्थस्य ॥ ३६ ॥
पत्यौ याते तरुणी जनकगृहे हर्म्यशिखरमारूढा ।
विललास विलासमही केलिविलोला सखीभिः सा ॥ ३७ ॥
सौधे मन्मथरूपं पृथुनयना पथि ददर्श पुरुषं सा ।
यं दृष्ट्वैव गतास्याः क्वापि धृतिः कुमतिकुपितेव ॥ ३८ ॥

सा तेन चपलनयना सहसा मुषितेव हारितविचारा ।
अभवदशक्ता नितरां संवरणे स्मरविकारस्य ॥ ३९ ॥

शीलं पालय चपले मा पातय निम्नगेव कुलकूलम् ।
इति तामवददिवोच्चैः कम्पाकुलमुखरमेखला सुचिरम् ॥ ४० ॥

सा कृत्वा विदितकथां रहसि सखीमानिनाय तं तरुणम् ।
चलितं हि कामिनीनां धर्तुं शक्नोति कश्चित्तम् ॥ ४१ ॥

कामं कामविकासैः सुरतविलासैः सुनर्मपरिहासैः ।
सहजप्रेमनिवासैर्मुमुदे सा स्वैरिणी तेन ॥ ४२ ॥

अथ कृतनिजधनकृत्यस्त्वरितं दयिताविलोकनोत्कण्ठः ।
अविशत्समुद्रदत्तः श्वशुरावासं महारम्भः ॥ ४३ ॥

विपुलमहोत्सवलीलाव्यग्रजनैर्भोगसंपदां निचयैः ।
अतिवाह्य दिनं दयितासहितः शय्यागृहं स ययौ ॥ ४४ ॥

विरचितवरतरशयने बद्धविताने मनोरमस्थाने ।
जृम्भितसौरभधूपे सुरगृहरूपे प्रदीप्तमणिदीपे ॥ ४५ ॥

तत्र स मधुमदविलुलितलोचनकमलां प्रियां समालिङ्ग्य ।
मदगज इव नवनलिनीं भेजे रतिलालसः शय्याम् ॥ ४६ ॥

सापि हृदयान्तरस्थितपरपुरुषध्यानबद्धलक्षैव ।
तस्थौ निमीलिताक्षी ध्यानपरा योगिनीव चिरम् ॥ ४७ ॥

आलिङ्गनपरिचुम्बननीविविमोक्षेषु बहुतरोच्छ्वासा ।
पत्यौ संकुचिताङ्गी सस्मार तमेव शीलहरम् ॥ ४८ ॥

प्रणयकुपितेति मत्वा मुग्धपतिस्तां समुद्रदत्तोऽपि ।
प्रणिपत्य चाटुकारैः किमपि ययाचे प्रसादाय ॥ ४९ ॥

परपुरुषरागिणीनां विमुखीनां प्रणयकामवामानाम् ।
पुरुषपशवो विमूढा रज्यन्ते योषितामधिकम् ॥ ५० ॥

किं क्रियते कामोऽयं परगतकामः स्वतन्त्रकामश्च ।
घनशतरक्तायामपि संध्यायां भास्करो रागी ॥ ५१ ॥

गूढोपवननिकुञ्जे न्यस्तं सा वल्लभं ससंकेतम् ।
संचिन्त्य चिरं स्वपतिं विषमिव संमूर्छिता मेने ॥ ९२ ॥
निद्रामुद्रितनयने प्रणयश्रान्ते समुद्रदत्ते सा ।
उत्थाय रचितवेषा शनकैर्गमनोन्मुखी तस्थौ ॥ ९३ ॥
चौरः क्षणे च तस्मिन्मधुमत्तजनं प्रविश्य तद्भवनम् ।
गमनोत्सुकामपश्यन्मुखराभरणामलक्ष्यस्ताम् ॥ ९४ ॥
अत्रान्तरे शशाङ्कः शनकैः सुरराजवल्लभां ककुभम् ।
चकित इवाशु चकम्पे मीलिततारां समालिङ्ग्य ॥ ९५ ॥
संकोचितकमलायाः कुमुदविजृम्भाविराजमानायाः ।
प्रससार तुहिनकिरणो यामिन्याः कपटहास इव ॥ ९६ ॥
रविपरितापश्रान्तां वीक्ष्य दिवं प्रसरदिन्दुसानन्दाम् ।
जहसुरिव कुमुदवृन्दैरलिकुलंहुकारनिर्भरा वाप्यः ॥ ९७ ॥
जग्राह रजनिरमणी शशिकरहृततिमिरकञ्चुकावरणा ।
लज्जान्वितेव पुरतः कुमुदामोदाकुलालिपटलपटम् ॥ ९८ ॥
सुप्तजनेऽथ निशार्धे चन्द्रालोके च विपुलतां याते ।
तमसीव निर्विशङ्का सा शनकैरुपवनं प्रययौ ॥ ९९ ॥
अथ सा विवेश विवशा विषमशरप्लोषिता निजोपवनम् ।
छन्नं भूषणलोभादनुयाता विस्मितेन चौरेण ॥ ६० ॥
तत्र ददर्श विभूषितमुज्ज्वलललितांशुकं लसत्कुसुमम् ।
शङ्काजनकं विपिने पक्षिभिरुपलक्षितं दयितम् ॥ ६१ ॥
हृदयदयितावियोगज्वलनज्वालावलीतप्तम् ।
दिङ्मुखविलसितरुचिना चन्द्रेण करानलैर्दग्धम् ॥ ६२ ॥
चिरसंकेतस्थित्या मुक्ताशं प्रियतमापुनर्मिलने ।
वृक्षालम्बितवल्लीवलयालम्बेन विगलितप्राणम् ॥ ६३ ॥
तं दृष्ट्वैव विलीना विलपन्ती व्यसनशोकसंत्रासैः ।
निपपात वल्लरीव क्वणदलिवलयाकुला तन्वी ॥ ६४ ॥

संमोहमीलिताक्षी स्थित्वा सुचिरं महीं समालिङ्ग्य।
शनकैरवाप्तजीवा विललाप लघुस्वरैः स्वैरम् ॥ ६५ ॥
हा हा नयनानन्द क्व नु ते विशदेन्दुसुन्दरं वदनम्।
द्रक्ष्यामि मन्दपुण्या किमिदं क्वाहं क्व मे कान्तः ॥ ६६ ॥
इति तरुणकरुणमबला विलप्य पाशं विमुच्य यत्नेन।
अङ्के धृत्वास्य मुखं चुचुम्ब जीवं क्षिपन्तीव ॥ ६७ ॥
सा तस्य वदनकमलं निजवदने मोहिता कृत्वा।
ताम्बूलगर्भमकरोत्प्रकटितसाकाररागेव ॥ ६८ ॥
अथ तस्याः कुसुमोत्करमृगमदधूपादिसौरभाहूतः।
आविश्य शवशरीरं नासां चिच्छेद वेतालः ॥ ६९ ॥
सा प्राप्य चापलोचितमनयफलं छिन्ननासिका गत्वा।
भवनं प्रविश्य भर्तुस्तारं हाहेति चुक्रोश ॥ ७० ॥
प्रतिबुद्धे सकलजने नादत्रस्ते समुद्रदत्ते च।
सा नासिका ममेयं भर्त्रा छिन्नेति चक्रन्द ॥ ७१ ॥
श्वशुरादिबन्धुवर्गैः पृष्टः कुपितैः समुद्रदत्तोऽपि।
विक्रीतः परदेशे मूक इवोचे न किंचिदपि ॥ ७२ ॥
अथ चास्य सुप्रभाते बन्धुभिरावेदिते नृपसभायाम्।
तत्राभून्नृपकोपो बहुधनदण्डः समुद्रदत्तस्य ॥ ७३ ॥
चौरोऽपि निखिलवृत्तं प्रत्यक्षमवेक्ष्य विस्मयाविष्टः।
आवेद्य भूपपुरतः प्राप्य च वलयादिसत्कारम् ॥ ७४ ॥
उद्याने शववदने तस्यास्तां नासिकां च संदर्श्य।
निष्कारणसुहृदुचितां शुद्धिं विदधे समुद्रदत्तस्य ॥ ७५ ॥
इत्येताः कुटिलतराः क्रूराचारा गतत्रपाश्चपलाः।
यो नाम वेत्ति रामाः स स्त्रीभिर्नैव वञ्च्यते मतिमान् ॥ ७६ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे कामवर्णनं नाम तृतीयः सर्गः।

चतुर्थः सर्गः ।

तत्रापि वेशयोषाः कुटिलतराः कूटरागहृतलोकाः ।
कपटचरितेन यासां वैश्रवणः श्रमणतामेति ॥ १ ॥
हारिण्यश्चटुलतरा बहुलतरङ्गाश्च निम्नगामिन्यः ।
नद्य इव जलधिमध्ये वेश्याहृदये कलाश्चतुःषष्टिः ॥ २ ॥
वेशकला नृत्यकला गीतकला वक्रवीक्षणकला च ।
कामपरिज्ञानकला ग्रहणकला मित्रवञ्चनकला च ॥ ३ ॥
पानकला केलिकला सुरतकलालिङ्गनान्तरकला च ।
चुम्बनकला परकला निर्लज्जावेगसंभ्रमकला च ॥ ४ ॥
ईर्ष्याकलिकेलिकला रुदितकला मानसंक्षयकला च ।
स्वेदभ्रमकम्पकला पुनरेकान्तप्रसाधनकला च ॥ ५ ॥
नेत्रनिमीलननिःसहनिस्पन्दकला मृतोपमकला च ।
विरहासहरागकला कोपप्रतिषेधनिश्चयकला च ॥ ६ ॥
निजजननीकलहकला सद्गृहगमनोत्सवेक्षणकला च ।
हरणकला जातिकला केलिकला चौरपार्थिवकला च ॥ ७ ॥
गौरवशैथिल्यकला निष्कारणदोषभाषणकला च ।
शूलकलाभ्यङ्गकला निद्राक्षिरजस्वलाम्बरकला च ॥ ८ ॥
रूक्षकला तीक्ष्णकला गलहस्तगृहार्गलार्पणकला च ।
संत्यक्तकामुकाहृतिदर्शनयात्रास्तुतिकला च ॥ ९ ॥
तीर्थोपवनसुरालयविहरणहेलाकला गृहकला च ।
वश्यौषधमन्त्रकला वृक्षकला केशरञ्जनकला च ॥ १० ॥
भिक्षुकतापसबहुविधपुण्यकला द्वीपदर्शनकला च ।
खिन्ना कलात्रिषष्ट्या पर्यन्ते कुट्टनीकला वेश्या ॥ ११ ॥
अज्ञातनामवर्णेष्वात्मापि ययार्प्यते धनांशेन ।
तस्या अपि सद्भावं मृगयन्ते मोघसंकल्पाः ॥ १२ ॥

---

१. श्रमणो बौद्धभिक्षुः. वेश्यानुरागी धनाधिनाथोऽपि भिक्षुकत्वं प्राप्नोतीति

निखिलजनवञ्चनार्जितमलिनधनं रागदग्धहृदयानाम् ।
खादति गुणगणभग्नो नग्नो हीनोऽथवा कश्चित् ॥ १३ ॥
नीचस्तुरगारोहो हस्तिपकः खलतरोऽथवा शिल्पी ।
वञ्चितसकलजनानां तासामपि वल्लभो भवति ॥ १४ ॥
राजा विक्रमसिंहो बलवद्भिर्भूमिपैः पुरा विजितः ।
मानी ययौ विदर्भान्गुणयशसा मन्त्रिणा सहितः ॥ १५ ॥
तत्र स वेश्याभवनं प्रविश्य भुवि विश्रुतां विलासवतीम् ।
भेजे गणिकां बहुधनभोग्यामप्यल्पविभवोऽपि ॥ १६ ॥
तं राजलक्षणोचितभाजानुभुजं विलोक्य पृथुसत्त्वम् ।
विविधमणिकनककोषं चक्रे सा तद्व्ययाधीनम् ॥ १७ ॥
सहजमनुरागमद्भुतमौचित्यं वीक्ष्य भूपतिस्तस्याः ।
विस्मयविवशः प्रेम्णा जगाद विजने महामात्यम् ॥ १८ ॥
चित्रमियं बहु वित्तं क्षपयति वेश्यापि मत्कृते तृणवत् ।
प्रीतिपदवीविसृष्टो वेश्यानां धननिबन्धनो रागः ॥ १९ ॥
मिथ्या धनलवलोभादनुरागं दर्शयन्ति बन्धक्यः ।
तदपि धनं विसृजति या कस्तस्याः प्रेम्णि संदेहः ॥ २० ॥
इति वचनं भूमिपतेः श्रुत्वा मन्त्री विहस्य सासूयः ।
तमुवाच कस्य राजन्वेश्याचरितेऽस्ति विश्वासः ॥ २१ ॥
एताः सत्यविहीना धनलवलीनाः सुखक्षणाधीनाः ।
वेश्या विशन्ति हृदयं मुखमधुरा निर्विचाराणाम् ॥ २२ ॥
प्रथमसमागमसुखदा मध्ये व्यसनप्रवासकारिण्यः ।
पर्यन्ते दुःखफलाः पुंसामाशाश्च वेश्याश्च ॥ २३ ॥
अद्यापि हरिहरादिभिरमरैरपि तत्त्वतो न विज्ञाताः ।
भ्रमविभ्रमबहुमोहा वेश्याः संसारमायाश्च ॥ २४ ॥
इति सचिववचो नृपतिः श्रुत्वा कृत्वा च संविदं तेन ।
मिथ्यामृतमात्मानं चक्रे वेश्यापरीक्षायै ॥ २५ ॥

तस्मिन्कुणपशरीरे[1] विन्यस्ते मन्त्रिणा चितावह्नौ ।
सहसैव विलासवती वह्निभुवं भूषिता प्रययौ ॥ २६ ॥

तां प्रबलज्वलितोज्ज्वलवह्निज्वालानिपातसावेगाम् ।
दोर्भ्यामालिङ्ग्य नृपो जीवामीत्यभ्यधान्मुदितः ॥ २७ ॥

तत्तस्याः प्रेम दृढं सत्यं च विचार्य संभृतस्नेहः ।
राजा निनिन्द मन्त्रिणमसक्तद्वेश्यागुणाभिमुखः ॥ २८ ॥

अथ वेश्याधनसंचयमात्माधीनं महीपतिर्विपुलम् ।
आदाय गजतुरंगमभटविकटामाददे सेनाम् ॥ २९ ॥

संभृतविपुलबलैर्वैर्जित्वा वसुधाधिपान्स भूपालः ।
निजमाससाद मण्डलमिन्दुरिवानन्दकृत्पूर्णः ॥ ३० ॥

सा चान्तःपुरकान्तामूर्ध्नि कृता भूभुजा विलासवती ।
शुशुभे श्रीरिव चामरपवनाकुलितालका तन्वी ॥ ३१ ॥

साथ कदाचिन्नरपतिमेकान्ते विरचिताञ्जलिः प्रणता ।
ऊचे नाथ मया त्वं कल्पतरुः सेवितश्चिरं दास्या ॥ ३२ ॥

यदि नाम कुत्रचिदहं याता ते हेतुतां विभो लक्ष्म्याः ।
तन्मम सफलामाशामर्हसि कर्तुं प्रसादेन ॥ ३३ ॥

पुण्यफलप्राप्यानां हृतपररजसां स्वभावविमलानाम् ।
तीर्थानामिव महतां नहि नाम समागमो विफलः ॥ ३४ ॥

अभवन्मम कोऽपि युवा दयितो धनजीविताधिकः प्रणयी ।
बद्धः स विदर्भपुरे दैववशाच्चोररूपेण ॥ ३५ ॥

तन्मुक्तये मया त्वं शक्ततरः सेवितो महीनाथः ।
अधुना क्रियतामुचितं सत्त्वस्य कुलस्य शौर्यस्य ॥ ३६ ॥

इति वञ्चनामवाप्तो विस्मित इव तद्वचो नृपः श्रुत्वा ।
सुचिरं विलोक्य वसुधां सस्मारामात्यवचनं सः ॥ ३७ ॥

१. शवशरीरे.

अथ तां तथैव राजाश्वास्य विदर्भेषु भूभुजं जित्वा ।
बन्धनमुक्तेनास्याश्चोरेण समागमं चक्रे ॥ ३८ ॥
इत्येवं बहुहृदया बहुजिह्वा बहुकराश्च बहुमायाः ।
तत्त्वेन सत्यरहिताः को जानाति स्फुटं वेश्याः ॥ ३९ ॥
वर्णनदयितः कश्चिद्धनदयितो दासकर्मदयितोऽन्यः ।
रक्षादयितश्चान्यो वेश्यानां नर्मदयितोऽन्यः ॥ ४० ॥

ति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे वेश्यावृत्तं नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

मोहो नाम जनानां सर्वहरो हरति बुद्धिमेवादौ ।
गूढतरः स च निवसति [1]कायस्थानां मुखे च लेखे च ॥ १ ॥
चन्द्रकला इव पूर्णा निष्पन्ना सस्यसंपत्तिः ।
ग्रस्ता क्षणेन दृष्टा निःशेषा दिविरैराहुकलयैव ॥ २ ॥
ज्ञाताः संसारकला योगिभिरपयातसंमोहैः ।
न ज्ञाता दिविरकला केनापि बहुप्रयत्नेन ॥ ३ ॥
कूटकलाशतशिबिरैर्जनधनविवरैः क्षयक्षपातिमिरैः ।
दिविरैरेव समस्ता ग्रस्ता जनता न कालेन ॥ ४ ॥
एते हि कालपुरुषाः पृथुदण्डनिपातहतलोकाः ।
गणनागणनपिशाचाश्चरन्ति [3]भूर्जध्वजा लोके ॥ ५ ॥

कायस्थपदं राज्याधिकारिमात्रोपलक्षकम्. राज्याधिकारिणो हि प्रायः प्रजाः पी-
. कायस्थाश्च विशेषेण. तथाहि याज्ञवल्क्यमुनिनाप्यभाणि—'चाटतस्करदुर्वृ-
ाहसिकादिभिः । पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः ॥' (१।३३६).
: 'कायथ' इति प्रसिद्धो जातिविशेषः. २. दिविर इति कायस्थस्यैव संज्ञान्त-
'विना मद्यं विना मांसं परस्वहरणं विना । विना परापकारेण दिविरो दिवि रो-
' इति लक्ष्यान्तरं च. ३. पूर्वकाले दक्षिणदेशेषु तालपत्रे, उत्तरद्देशेषु च भू-
राज्यव्यवहारमायव्ययादि च लिखन्ति स्म कायस्थाः. अत एव भूर्जध्वजा
नकम्. कालपुरुषहस्तेषु च ध्वजैर्भाव्यम्.

कस्तेषां विश्वासं यममहिषविषाणकोटिकुटिलानाम् ।
व्रजति न यस्य विषक्तः कण्ठे पाशः कृतान्तस्य ॥ ६ ॥

कलमाग्रनिर्गतमषीबिन्दुव्याजेन साञ्जनाश्रुकणैः ।
कायस्थलुण्ठ्यमाना रोदिति खिन्नेव राज्यश्रीः ॥ ७ ॥

अङ्कन्यासैर्विषमैर्मायावनितालकावलीकुटिलैः ।
को नाम जगति चरितैः कायस्थैर्मोहितो न जनः ॥ ८ ॥

मायाप्रपञ्चसंचयवञ्चितविश्वैर्विनाशितः सततम् ।
विषयग्रामग्रासैः कायस्थैरिन्द्रियैर्लोकः ॥ ९ ॥

कुटिला लिपिविन्यासा दृश्यन्ते कालपाशसंकाशाः ।
कायस्थभूर्जशिखरे मण्डललीना इव व्यालाः ॥ १० ॥

एते हि चित्रगुप्ताश्चित्रधियो गुप्तकारिणो दिविराः ।
रेखामात्रविनाशात्सहितं कुर्वन्ति ये रहितम् ॥ ११ ॥

लोके कलाः प्रसिद्धाः स्वल्पतराः संचरन्ति दिविराणाम् ।
गूढकलाः किल तेषां जानाति कलिः कृतान्तो वा ॥ १२ ॥

वक्रलिपिन्यासकला सकलाङ्कनिमीलनकला च ।
सततप्रवेशसंग्रहलोककला व्ययविवर्धनकला च ॥ १३ ॥

ग्राह्यपरिच्छेदकला देयधनादानकारणकला च ।
शेषस्य विवेककला संकलितराशिसर्वभक्षणकला च ॥ १४ ॥

उत्पन्नगोपनकला नष्टविशीर्णप्रदर्शनकला च ।
क्रियमाणैर्भरणकला योजनचर्यादिभिः क्षयकला च ॥ १५ ॥

निःशेषभूर्जदाहादागमनाशश्च पर्यन्ते ।
येन विना धनहारी भूर्जग्रहणे निरालोकः ॥ १६ ॥

सकलङ्कस्य क्षयिणो नवनवरूपस्य वृद्धिभाजश्च ।
दिविरस्य कलाः कुटिलाः षोडश दोषाकरस्यैताः ॥ १७ ॥

कूटस्थाः कायस्थाः सर्वनकारेण सिद्धमन्त्रेण ।
गुरुव इव विदितमाया वृत्तिच्छेदं क्षणेन कुर्वन्ति ॥ १८ ॥

हारितधनपशुवसनश्चौर्यभयाद्बन्धुभिः परित्यक्तः ।
बभ्राम महीमखिलां तीव्रव्यसनः पुरा कितवः ॥ १९ ॥
स कदाचिदाप पुण्यैरुज्जयिनीं तत्र मज्जनं कृत्वा ।
विचरन्विजने पुरहरमन्दिरमवलोकयामास ॥ २० ॥
शून्यायतने गत्वा वरदं देवं सदा महाकालम् ।
उपलेपनकुसुमफलैर्निर्व्यापारः सिषेवे सः ॥ २१ ॥
स्तोत्रजपगीतदीपैर्विपुलध्यानैर्निशासु निर्निद्रः ।
तस्थौ तत्र च सुचिरं दुःसहदौर्गत्यनाशाय ॥ २२ ॥
तस्य कदाचिद्भक्त्या शुभशतकृतया प्रसादितः सहसा ।
भवभयहारी भगवान्भूतपतिः संबभाषे तम् ॥ २३ ॥
पुत्र गृहाणेत्युक्ते देवेन कपालमालिना शिखरे ।
एकं कपालमसकृच्चक्रे संज्ञां पुरारातेः ॥ २४ ॥
अर्धोक्ते स्थगिततरः संपीडनसंज्ञया कपालस्य ।
तूष्णीं बभूव रुद्रो दारिद्र्यात्कितवपुण्यानाम् ॥ २५ ॥
स्नातुं याते तस्मिन्विजने देवः कपालमवदत्तम् ।
दन्तांशुपटलपालीं गङ्गामिव दर्शयन्नग्रे ॥ २६ ॥
अस्य कितवस्य साधोर्भक्तस्य चिरस्थितस्य वरदाने ।
कस्मात्त्वया ममैषा विहिता संपीडनैः संज्ञा ॥ २७ ॥
इति भगवता कपालं पृष्टं प्रोवाच सस्मितं शनकैः ।
विषमनयनोष्मविगलन्मौलीन्दुसुधारसैर्जीवत् ॥ २८ ॥
शृणु भगवन्येन मया विज्ञप्तोऽसि स्वभावसरलात्मन् ।
सुलभोऽपि बोध्यते वा निष्कारणमीश्वरः केन ॥ २९ ॥
एष कितवोऽतिदुःखी दारिद्र्याद्विरतसकलनिजकृत्यः ।
प्रासादेऽस्मिन्रचयति लेपनबलिकुसुमधूपार्घम् ॥ ३० ॥
दुःखी भवति तपस्वी धनरहितः सादरो भवति ।
भ्रष्टाधिकारविभवः सर्वप्रणतः प्रियंवदो भवति ॥ ३१ ॥

१. द्यूतकारः.

अर्चयति देवविप्रान्नमति गुरून्वेत्ति निर्धनो मित्रम् ।
कठिनोऽपि लोहपिण्डस्तप्तः कर्मण्यतामेति ॥ ३२ ॥
व्यसनपरितप्तहृदयस्तिष्ठति सर्वः सदाचारे ।
विभवमदमोहितानां कर्मस्मरणे कथा कैव ॥ ३३ ॥
ऐश्वर्यार्थी भगवन्नाशापाशेन लम्बमानोऽसौ ।
कुरुते परां सपर्यां प्राप्तार्थो दृश्यते न पुनः ॥ ३४ ॥
स्वार्थार्थिनः प्रयत्ताः प्राप्तार्थाः सेवकाः सदा विफलाः ।
नहि नाम जगति कश्चित्कृतकार्यः सेवको भवति ॥ ३५ ॥
देव प्रासादेऽस्मिन्फलजलकुसुमादिभोगसामग्रीम् ।
पूर्णे जाते कितवे विजने नान्ये करिष्यन्ति ॥ ३६ ॥
तस्मात्पुण्यायतने कितवं संरक्ष सेवकं सततम् ।
वरदानमस्य भगवन्निर्वासनमात्मपूजायाः ॥ ३७ ॥
श्रुत्वैतद्वक्रतरं वचनं पृथुविस्मयस्मेरः ।
तं पप्रच्छ पिनाकी कस्त्वं तत्त्वेन मे कथय ॥ ३८ ॥
इति पृष्टं पुनरूचे सपदि कपालं विचिन्त्य सद्भावम् ।
मगधेनामहमभवं कायस्थकुले स्वकर्मणो विमुखः ॥ ३९ ॥
स्नानजपव्रतनिरतस्तीर्थरतो विदितसकलशास्त्रार्थः ।
त्यक्त्वा भागीरथ्यां शरीरकं त्वत्पदं प्राप्तः ॥ ४० ॥ (युग्मम्)
आकर्ण्यैवं भगवानूचे कायस्थ एव सत्यं त्वम् ।
चित्रं कौटिल्यकलां न त्यजसि कपालशेषोऽपि ॥ ४१ ॥
इत्युक्त्वा सितकिरणैः कुर्वन्नाशालताः कुसुमशुभ्राः ।
स्नात्वागताय तस्मै कितवाय वरं ददौ वरदः ॥ ४२ ॥
कृत्वा तत्कितवहितं पश्यत एवाशु तस्य शशिमौलिः ।
निष्कासितवांस्तच्छिर उत्तमतममालिकापङ्क्तेः ॥ ४३ ॥
इत्येवं कुटिलकलां सहजां मलिनां जनक्षये निरताम् ।
यमदंष्ट्रामिव मुञ्चति कायस्थो नास्थिशेषोऽपि ॥ ४४ ॥

सुस्थः को नाम जनः सततशुचिभावदूषितकलानाम् ।
दोषकृतां शकृतामिव कायस्थानामवष्टम्भैः ॥ ४५ ॥
असुररचितप्रयत्नाद्विज्ञाता दिविरवञ्चना येन ।
संरक्षिता मतिमता रत्नवती वसुमती तेन ॥ ४६ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे कायस्थचरितं नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

एकः सकलजनानां हृदयेषु कृतास्पदो मदः शत्रुः ।
येनाविष्टशरीरो न शृणोति न पश्यति स्तब्धः ॥ १ ॥
विजितात्मनां जनानामभवद्यः कृतयुगे दमो नाम ।
सोऽयं विपरीततया मदः स्थितः कलियुगे पुंसाम् ॥ २ ॥
मौनं वदननिकूणनमूर्ध्वेक्षणमन्यलक्ष्यता चाक्ष्णोः ।
गात्रविलेपनवेष्टनमग्र्यं रूपं मदस्यैतत् ॥ ३ ॥
शौर्यमदो रूपमदः शृङ्गारमदः कुलोन्नतिमदश्च ।
विभवमदमूलजाता मदवृक्षा देहिनामेते ॥ ४ ॥
शूलारूढसमानो वातस्तब्धोपमोऽथ भूतसमः ।
बहुभोगे विभवमदः प्रथमज्वरसंनिपातसमः ॥ ५ ॥
शौर्यमदो भुजदर्शी रूपमदो दर्पणादिदर्शी च ।
काममदः स्त्रीदर्शी विभवमदश्चैव जात्यन्धः ॥ ६ ॥
अन्तः सुखरसमूर्छामीलितनयनः समाहितध्यानः ।
धनमद एष नराणामात्मारामोपमः कोऽपि ॥ ७ ॥
उन्मादयत्यविषये विविधविकारः समस्तगुणहीनः ।
मूढमदस्त्वन्योऽयं जयति विचित्रो निरालम्बः ॥ ८ ॥
स्तम्भान्न पश्यति भुवं खेचरदर्शी सदा तपस्विमदः ।
भक्तिमदोऽद्भुतकारी विस्मृतदेहश्चलः प्रकृत्यैव ॥ ९ ॥
आकोपरक्तनयनः परवाङ्मात्रासहः प्रलापी च ।
विषमः श्रुतमदनामा धातुक्षोभो नृणां मूर्तः ॥ १० ॥

सततभ्रुकुटिकरालः परुषाक्रोशी हठाभिघातपरः ।
अधिकारमदः पुंसां सर्वाशी राक्षसः क्रूरः ॥ ११ ॥
पूर्वपुरुषप्रतापप्रथितकथाविस्मृतान्यनिजकृत्यः ।
कुलमद एकः पुंसां सुदीर्घदर्शी महाज्ञानः ॥ १२ ॥
वर्जितसकलस्पर्शः सर्वाशुचिभावनानिरालम्बः ।
आकाशेऽपि सलेपः शौचमदो नित्यसंकोचः ॥ १३ ॥
सावधयः सर्वमदा निजनिजमूलक्षये विनश्यन्ति ।
वरमद एकः कुटिलो विजृम्भते निरवधिर्भोगी ॥ १४ ॥
पानमदस्तु जघन्यः सर्वजुगुप्सास्पदं महामोहः ।
क्षणिकोऽपि हरति सहसा वर्षसहस्रार्जितं शीलम् ॥ १५ ॥
विद्यावति विप्रजने गवि हस्तिनि कुक्कुरे श्वपाके च ।
मद्यमदः समदर्शी स्वपरविभागं न जानाति ॥ १६ ॥
विगलितसदसद्भेदः समकाञ्चनलोष्टपाषाणः ।
प्राप्तो योगिदशामपि नरके क्षीबः स्वयं पतति ॥ १७ ॥
रोदिति विहसति गायति विलपत्युच्चैरुपैति संमोहम् ।
भजते विविधविकारान्संसारादर्शमण्डलः क्षीबः ॥ १८ ॥
परपतिचुम्बनसक्तां पश्यति दयितां न याति संतापम् ।
क्षीबोऽतिगाढरागं पीत्वा मधु वीतरागः किम् ॥ १९ ॥
विसृजति वसनं दूरे व्यसनं गृह्णाति दुःसहं क्षीबः ।
अञ्जलिपात्रे पिबति च निजमूत्रविजृम्भितं चन्द्रम् ॥ २० ॥
च्यवनः पुरा महर्षिर्यौवनमश्विप्रयोगतो लब्ध्वा ।
यज्ञे स्वयं कृतज्ञस्तौ चक्रे सोमपानार्हौ ॥ २१ ॥
क्रुद्धस्तमेत्य शक्रः प्रोवाच मुने न जानासि ।
भिषजावपङ्क्तियोग्यौ सोमार्हावश्विनौ यज्ञे ॥ २२ ॥
इति बहुशः सुरपतिना प्रतिषिद्धोऽपि स्वतेजसा च्यवनः ।
न चचाल निश्चितात्मा निजकृत्यादश्विनोः प्रीत्या ॥ २३ ॥

तत्कोपोद्यतवज्रं जम्भारेरायतं भुजस्तम्भम् ।
अस्तम्भयन्मुनीन्द्रः प्रभावसंभावनापात्रम् ॥ २४ ॥
असृजच्च तद्वधाय प्रलम्बकालोपमं चतुर्दंष्ट्रम् ।
योजनसहस्रविपुलं कृत्यारूपं महासुरं घोरम् ॥ २५ ॥
तेनाविष्टः सहसा भीतो वज्री तमाययौ शरणम् ।
सोमोऽस्तु देवभिषजोरिति चोवाच प्रणष्टधृतिः ॥ २६ ॥
मुनिरपि करुणासिन्धुर्भीतं प्रणतं महेन्द्रमाश्वास्य ।
मदमुत्ससर्ज घोरं द्यूतस्त्रीपानमृगयासु ॥ २७ ॥
सोऽयमसुरः प्रमाथी मुनिना क्रुद्धेन निर्मितो हृदये ।
निवसति शरीरभाजां स्तम्भाकारो गुणैर्बद्धः ॥ २८ ॥
मौने श्रीमत्तानां निःस्पन्ददृशि प्रवृद्धविभवानाम् ।
भ्रूभङ्गमुखविकारे धनिकानां भ्रूयुगे विटादीनाम् ॥ २९ ॥
जिह्वासु दूतविदुषां रूपवतां दशनवसनकेशेषु ।
वैद्यानामोष्ठपुटे ग्रीवायां गुणिनियोगिगणकानाम् ॥ ३० ॥
स्कन्धतटे सुभटानां हृदये वणिजां करेषु शिल्पवताम् ।
गलपत्राङ्गुलिभङ्गे छात्राणां स्तनतटेषु तरुणीनाम् ॥ ३१ ॥
उदरे श्राद्धार्हाणां जङ्घासु च लेखहारपुरुषाणाम् ।
गण्डेषु कुञ्जराणां बर्हे शिखिनां गतेषु हंसानाम् ॥ ३२ ॥
इत्येवं मदनामा महाग्रहो बहुविकारदृढमोहः ।
अङ्गे काष्ठीभूतो वसति सदा सर्वभूतानाम् ॥ ३३ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे मदवर्णनं नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

अर्थो नाम जनानां जीवितमखिलक्रियाकलापस्य ।
तमपि हरन्त्यतिधूर्ताः श्लक्ष्णगला गायना लोके ॥ १ ॥
निःशेषं कमलाकरकोषं जग्ध्वापि कुमुदमास्वाद्य ।
क्षीणा गायनभृङ्गा मातङ्गप्रणयतां यान्ति ॥ २ ॥

घटपटशकटस्कन्धा बहुडिम्भा मुक्तकेशककलापाः ।
एते योनिपिशाचा भूपभुजो गायना लोके ॥ ३ ॥
तमसि वराकश्चौरो हाहाकारेण याति संत्रस्तः ।
गायनचौरः प्रकटं हाहाकृत्वैव हरति सर्वस्वम् ॥ ४ ॥
पापाधधनिनिगमसा धाधामामासमासगाधामा ।
कृत्वा स्वरपदपालीं गायनधूर्ताश्चरन्त्येते ॥ ५ ॥
कुटिलावर्तभ्रान्तैर्वेषविकारैश्च मुखविकारैश्च ।
गायति गायनसंघो मर्दलहस्तश्चिरं मौनी ॥ ६ ॥
आमन्त्रणजयशब्दैः प्रतिपदहुंकारघर्घरारावैः ।
स्वयमुक्तसाधुवादैरन्तरयति गायनो गीतम् ॥ ७ ॥
जलपतिते सक्तुकणे मत्स्यैर्भुक्तेऽस्ति कापि धर्माप्तिः ।
गायनदत्तासु परं कोटिष्वपि नास्ति फललेशः ॥ ८ ॥
मुग्धधनानां विधिना रुद्धानामन्धकूपकोषेषु ।
विहितो विवृतमहास्यो गायननामा प्रणालौघः ॥ ९ ॥
नैतत्प्रकटितदशना गायनधूर्ताः सदैव गायन्ति ।
एते गतानुगतिकान्हसन्ति धूर्ता गृहीतार्थान् ॥ १० ॥
प्रातर्गायनधूर्ता भवन्ति धीराः सहारकेयूराः ।
मध्याह्ने द्यूतजिता नग्ना भग्ना निराधाराः ॥ ११ ॥
स्तुतिवागुरानिबद्धैर्वचनशरैः कपटकूटरचनाभिः ।
गीतैर्गायनलुब्धा मुग्धमृगाणां हरन्ति सर्वस्वम् ॥ १२ ॥
नष्टस्वरपदगीतैः क्षणेन लक्षाणि गायनो लब्ध्वा ।
दास्याः सुतेन दत्तं किमिति वदन्दुःखितो याति ॥ १३ ॥
वर्जितसाधुद्विजवरवृद्धायाः सकलशोककलितायाः ।
शापोऽयमेव लक्ष्म्या गायनभोज्यैव यत्सततम् ॥ १४ ॥
देवः पुरा सुराणामधिनाथो नारदं चिरायातम् ।
पप्रच्छ लोकवृत्तं महीतले भूमिपालानाम् ॥ १५ ॥

सोऽवददवनिपतीनां जयिनां बहुदानधर्मयज्ञानाम् ।
चरता मया नृलोके सुरपतियोग्याः श्रियो दृष्टाः ॥ १६ ॥
ते तु त्वां स्पर्धन्ते विभवैर्वरुणं धनाधिनाथं च ।
शतमखसंज्ञामसकृद्बहुतरयज्ञा हसन्त्येव ॥ १७ ॥
श्रुत्वा तन्मुनिवचनं जातद्वेषः शतक्रतुः कोपात् ।
हर्तुं धनं पिशाचान्विससर्ज भुवं नरेन्द्राणाम् ॥ १८ ॥
ते गीतनाममन्त्राः सुरपतिदिष्टाः पिशाचसंघाताः ।
हर्तुं सकलनृपाणां धनमखिलं भूतलं प्रययुः ॥ १९ ॥
मायादासः प्रथमं डम्बरदासश्च वज्रदासश्च ।
क्षयदासलुण्ठदासौ खरहरदासः प्रसिद्धदासश्च ॥ २० ॥
वाडवदासश्चाष्टौ ते गत्वा मर्त्यलोकमतिभयदाः ।
विवृतास्यघोरकुहरा गायनसृष्टिं ससर्जुरतिविकटाम् ॥ २१ ॥
यैरेतैर्हृतविभवा दिशि दिशि हृतसकललोकसर्वस्वाः ।
यज्ञादिषु भूपतयो जाताः शिथिलोद्यमाः सर्वे ॥ २२ ॥
एते हि कर्णविवरैः प्रविश्य गीतच्छलेन भूपानाम् ।
सहसा हरन्ति हृदयं कर्णपिशाचा महाघोराः ॥ २३ ॥
तस्मादेषां राष्ट्रे न ददाति विकारिणां प्रवेशं यः ।
तस्य सकलार्थसंपद्यज्ञवतीभूमिराधीना[1] ॥ २४ ॥
नटनर्तकचक्रचराः कुशीलवाश्चारणा विटाश्चैव ।
ऐश्वर्यशालिशलभाश्चरन्ति तेभ्यः श्रियं रक्षेत् ॥ २५ ॥
गायनसंघस्यैक्यादुत्तिष्ठति गीतनिःस्वनः सुमहान् ।
अस्थाने दत्ताया लक्ष्म्या इव संभ्रमाक्रन्दः ॥ २६ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे गायनवर्णनं नाम सप्तमः सर्गः ।

अष्टमः सर्गः ।

तत्रापि हेमकारा हरणकलायोगिनः पृथुध्यानाः ।
ये धाम्नि बहुललक्ष्म्याः शून्यत्वं दर्शयन्त्येव ॥ १ ॥

१. आ समन्तादधीना.

सारं सकलधनानां संपत्सु विभूषणं विपदि रक्षा ।
एते हरन्ति पापाः सततं तेजः परं हेम ॥ २ ॥
सहसैव दूषयन्ति स्पर्शेन सुवर्णमुपहतच्छायम्[1] ।
नित्याशुचयः पापाश्चण्डाला हेमकाराश्च ॥ ३ ॥
मसृणकषाश्मनि निकषो मन्दरुचिक्रमगता कला तेषाम् ।
येषां परुषकषाश्मनि विक्रयकालेऽपि लाभकला ॥ ४ ॥
सोपस्नेहः स्वेद्यः सिक्थकमुद्रोऽपि वालुकाप्रायः ।
सोष्मा च युक्तिभेदात्तुलोपलानां कलाः पञ्च ॥ ५ ॥
द्विपुटा स्फोटविपाका सुवर्णरसपायिनी सताम्रकला ।
सीसमलकाचचूर्णग्रहणपरा षट्कला मूषा ॥ ६ ॥
वक्रमुखी विषमपुटा सुषिरतला न्यस्तपारदा मृद्वी ।
पक्षकटा ग्रन्थिमति सिक्थकला बहुगुणा पुरोनम्रा ॥ ७
वातभ्रान्ता तन्वी गुर्वी वा परुषवातधृतचूर्णा ।
निर्जीवना सजीवा षोडश हेम्नस्तुलासु कलाः ॥ ८ ॥
मन्दः सावेगो वा मध्यच्छिन्नः सशब्दफूत्कारः ।
पाती शीकरकारी फूत्कारः षट्कलस्तेषाम् ॥ ९ ॥
ज्वालावलयी धूमो विस्फोटी मन्दकः स्फुलिङ्गी च ।
पूर्वधृतताम्रचूर्णस्तेषामपि षट्कलो वह्निः ॥ १० ॥
प्रश्नः कथा विचित्रा कण्डूयनमंशुकान्तराकृष्टिः ।
दिनवेलार्कनिरीक्षणमतिहासो मक्षिकाक्षेपः ॥ ११ ॥
कौतुकदर्शनमसकृत्स्वजनकलिः सलिलपात्रभङ्गश्च ।
बहिरपि गमनं बहुशो द्वादश चेष्टाकलास्तेषाम् ॥ १२ ॥
घटितस्योपरि पाकः कृत्रिमवर्णप्रकाशनोत्कर्षी ।
तनुगोमयाग्निमध्ये लवणक्षारानुलेपेन ॥ १३ ॥
सामान्यलोहपात्राद्भूमिन्यस्तेऽपि कान्तलोहतले[2] ।
धावति वदनेन तुला रिक्तापि मुहुः सुपूर्णेव ॥ १४ ॥

---

१. सुवर्णं शोभनवर्णं ब्राह्मणादिकं कनकं च. २. कान्तिसारनाम्ना प्रसिद्धो लोहविशेषः

प्रतिबद्धे जतुयोग्ये प्रक्षिप्तनिगूढकनककणम् ।
तुलितं पूरणकाले सुखेन हर्तुं समायाति ॥ १५ ॥
उज्ज्वलनेऽपि च तेषां पातनमतिसुकरमश्मकाले च ।
सदृशविचित्राभरणे परिवर्तनलाघवप्रसारश्च ॥ १६ ॥
पूर्णादाने घटने नेक्षा माषार्पणं प्रभायोगः ।
कालाहरणविनाशः प्रतिपूरणयाचनं बहुश्लेषः ॥ १७ ॥
एकादश युक्तिकलास्तेषामेताः समासेन ।
एकैव कला महती निशि गमनं सर्वमादाय ॥ १८ ॥
एता हेमकराणां विचारलभ्याः कलाश्चतुःषष्टिः ।
अन्या गूढाश्च कलाः सहस्रनेत्रोऽपि नो वेत्ति ॥ १९ ॥
मेरुः स्थितोऽतिदूरे मनुष्यभूमिं चिरात्परित्यज्य ।
भीतोऽवश्यं चौर्याद्धोराणां हेमकाराणाम् ॥ २० ॥
कनकशिलाशतसंधिप्रसृतमहाविवरकोटिसंघातैः ।
उत्कीर्णनिखिलशिखरः पुरा कृतो मूषकैर्मेरुः ॥ २१ ॥
तत्राखिलाखुसेनानिखातनखरावलेखनोत्खातैः ।
शिथिलितमूलः सहसा बभूव मेरुः पुरा नियतम् ॥ २२ ॥
मूषकनखरोत्खातः सुमेरुरुच्चैस्तरां शुशुभे ।
उद्धतसुवर्णधूलीपटलैः कपिला बभुः ककुभः ॥ २३ ॥
तस्मिञ्जर्जरशिखरे विवरोदरदलितकनककूटतटे ।
कल्पान्तागमशङ्काभयमाविरभूदमर्त्यानाम् ॥ २४ ॥
आह च दिव्यदृशा तद्विलोक्य सर्वं सुरानथागस्त्यः ।
एते ते ब्रह्मघ्ना निशाचरास्त्रिदशसंगरे निहताः ॥ २५ ॥
जाता मूषकरूपा मेरुनिपाते कृतारम्भाः ।
वध्याः पुनरपि भवतामाश्रमभङ्गान्मुनीनां च ॥ २६ ॥
श्रुत्वैतन्मुनिवचनं धूमेन बिलावलीं समापूर्य ।
शापेन पूर्वदग्धाञ्जग्धुस्त्रिदशा महामूषान् ॥ २७ ॥

एते त एव मूषाः सुवर्णकाराः क्षितौ पुनर्जाताः ।
जन्माभ्यासादनिशं काञ्चनचूर्णं निकर्षन्ति ॥ २८ ॥
तस्मान्महीपतीनामसंभवे गरदचोरदस्यूनाम् ।
एकः सुवर्णकारो निग्राह्यः सर्वथा नित्यम् ॥ २९ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे सुवर्णकारोत्पत्तिर्नामाष्टमः सर्गः ।

नवमः सर्गः ।

वञ्चकमाया महती महीतले जलधिमेखले निखिले ।
नष्टधियां मत्स्यानां जालाली धीवरैर्विहिता ॥ १ ॥
सर्वस्वमेव परमं प्राणा येषां कृते प्रयत्नोऽयम् ।
वैद्या वेद्याः सततं येषां हस्ते स्थितास्तेऽपि ॥ २ ॥
एते हि देहदाहाद्विरहा इव दुःसहा भिषजः ।
ग्रीष्मदिवसा इवोग्रा बहुतृष्णाः शोषयन्त्येव ॥ ३ ॥
विविधौषधपरिवर्तैर्योगैर्जिज्ञासया स्वविद्यायाः ।
हत्वा नृणां सहस्रं पश्चाद्वैद्यो भवेत्सिद्धः ॥ ४ ॥
विन्यस्य राशिचक्रं ग्रहचिन्तां नाटयन्मुखविकारैः ।
अनुवदति चिराद्गणको यत्किंचित्प्राश्निकेनोक्तम् ॥ ५ ॥
गणयति गगने गणकश्चन्द्रेण समागमं विशाखायाः ।
विविधभुजंगक्रीडासक्तां गृहिणीं न जानाति ॥ ६ ॥
प्रथमं स्ववित्तमखिलं कनकार्थी भस्मसात्कृत्वा ।
पश्चात्सधनान्रसिकान्विनाशयत्येष वर्णिकानिपुणः ॥ ७ ॥
शतवेधी सिद्धो मे सहस्रवेधी रसोऽपि निर्यातः ।
इति वदति धातुवादी नग्नो मलिनः कृशो रूक्षः ॥ ८ ॥
ताम्रघटोपमशीर्षो धूर्तो हि रसायनी जराजीर्णः ।
केशोत्पादनकथया खल्वाटानेव मुष्णाति ॥ ९ ॥
प्रह्लादनशुचितारकशम्बररमणीजनेऽपि बद्धाशः ।
बिल्वादिभिरतिकामी हुत्वा धूमान्धतामेति ॥ १० ॥

प्राश्निकः कार्यार्थं प्रश्नकर्ता.

खेचर्यः सुखसाध्या यत्नाद्यदि लभ्यते नभःकुसुमम् ।
उक्ताः प्रयोगविद्भिर्मशकास्थिषु सिद्धयो बहुधा ॥ ११ ॥
कृष्णाश्वशकृद्वर्त्या पश्यति गगने सुरेन्द्रभवनानि ।
मण्डूकवसालिप्तो भवति पुमान्वल्लभोऽप्सरसाम् ॥ १२ ॥
इत्युक्त्वा पुनराशां दिशि दिशि विलसन्ति धूर्तसंघाताः ।
यैर्विविधसिद्धिलुब्धाः क्षिप्ताः शतशो नराः श्वभ्रे ॥ १३ ॥
वश्याकर्षणयोगी पथि पथि रक्षां ददाति नारीणाम् ।
रतिकामतन्त्रमूलं मूलं मन्त्रं न जानाति ॥ १४ ॥
बहवो रथ्यागुरवो लघुदीक्षाः स्वल्पयोगमुत्पाद्य ।
व्याधा इव वर्धन्ते मुग्धानां द्रविणदारहराः ॥ १५ ॥
हस्तस्था धनरेखा विपुलतरास्याः पतिश्च चलचित्तः ।
गृह्णाति कुलवधूनामित्युक्त्वा कमलकोमलं पाणिम् ॥ १६ ॥
बद्धेऽङ्गुष्ठे सलिले पश्यति विविधं जनभ्रमं कन्या ।
न प्राप्यते च चोरो मोहोऽसाविन्द्रजालस्य ॥ १७ ॥
खादति पिबति च धूर्तः प्रलापकारी नृणां तलाघातैः ।
चेटावेशं कृत्वा निर्मन्त्रक्षुद्रधूपेन ॥ १८ ॥
कक्षपुटे नागार्जुनलिखिता युक्तिर्विधीयतां धूपे ।
यो हर्तुं मोहादिति धूर्तोऽग्नौ क्षिपति परवित्तम् ॥ १९ ॥
यक्षीपुत्राश्चोरा विज्ञेयाः कूटधूपकर्तारः ।
येषां प्रत्यक्षफलं दारिद्र्यं राजभङ्गश्च ॥ २० ॥
बहुतरधनेन वणिजा पुत्री सा पुत्रवद्गृहीतैव ।
मदधीनेति कथाभिः कन्यार्थं भुज्यते धूर्तैः ॥ २१ ॥
चिन्त्यः स्वेङ्गितवादी मर्मज्ञो हृदयचौर एवासौ ।
तिष्ठति परप्रयुक्तो मिथ्याबधिरोऽथवा मूकः ॥ २२ ॥
भस्मस्मेरा वेश्या वृद्धाः श्रमणाः सदैवता गणिकाः ।
एताः कुलनारीणां चरन्ति धनशीलहारिण्यः ॥ २३ ॥

विधवा तरुणी सधना वाञ्छति दिव्यं भवद्विधं रमणम् ।
धूर्तो जडमित्युक्त्वा सर्वस्वं तस्य भक्षयति ॥ २४ ॥

प्रत्यहवेतनयुक्ताः कर्मसु ये कारुशिल्पिनो धूर्ताः ।
विलसन्ति कर्मविघ्नैर्विज्ञेयाः कालचौरास्ते ॥ २५ ॥

अक्षव्याजैर्विविधैर्गणनाहस्तादिलाघवैर्निपुणाः ।
धूर्ताश्चरन्ति गूढं प्रसिद्धकितवा विदेशेषु ॥ २६ ॥

भोजनमात्रोत्पत्तिर्बहुव्ययो द्यूतमद्यवेश्याभिः ।
विज्ञेयो गृहचौरो बन्धुजनो वेश्मदासो वा ॥ २७ ॥

कृतकं शास्त्रमसत्यं साक्षाद्दृष्टश्च केन परलोकः ।
इति वदति यः स शङ्क्यो निरङ्कुशो मत्तमातङ्गः ॥ २८ ॥

बहुलाभलुब्धमनसां हरन्ति ये दुःसहेन लाभेन ।
ऋणधनमधिकविदग्धा विज्ञेया लाभचोरास्ते ॥ २९ ॥

अधिकरणाम्बुधिमध्ये ज्वलन्ति वडवाग्नयः सततभक्षाः ।
जनधनघनमनसो ये भट्टाख्या न्यायचोरास्ते ॥ ३० ॥

विभवाम्भोरुहमधुपा दुःसहविपदनिलवेगविमुखा ये ।
सुहृदस्ते सुखचौराश्चरन्ति लक्ष्मीलताहृताः ॥ ३१ ॥

द्यत्किंचिदपूर्वं परिचरितं कल्पनादसंबद्धम् ।
र्गयति हर्षकारी बहुवचनः कर्णचौरोऽसौ ॥ ३२ ॥

ःषेषु गुणस्तुतिभिः श्रद्धामुत्पाद्य चतुरवचना ये ।
कुर्वन्त्यभिनवसृष्टिं स्थितिचौरास्ते निराचाराः ॥ ३३ ॥

आत्मगुणख्यातिपराः परगुणमाच्छाद्य विपुलयत्नेन ।
प्रभवन्ति परमधूर्ता गुणचौरास्ते विमूढहृदयेषु ॥ ३४ ॥

वल्लभतामुपयाताः परवाल्लभ्यं विचित्रपैशुन्यैः ।
ये नाशयन्ति धूर्ता मात्सर्याद्वृत्तिचौरास्ते ॥ ३५ ॥

शमदमभक्तिविहीनस्तीव्रव्रतदुर्ग्रहग्रस्तः ।
अभिभवति प्रतिपत्त्या साधुजनं कीर्तिचौरोऽसौ ॥ ३६ ॥

देशान्तरसंभवविभिर्भोगवरैर्वर्णनारम्यैः ।
येऽपि नयन्ति विदेशं पशुसदृशान्देशचौरास्ते ॥ ३७ ॥

नानाहासविकारैर्बहुवैदग्ध्यैः सनर्मवैचित्र्यैः ।
रमयति दिवसमशेषं प्रकृतिव्यापारचौरोऽसौ ॥ ३८ ॥

भक्षितनिजबहुविभवाः परविभवक्षपणदीक्षिताः पश्चात् ।
अनिशं वेश्यावेशस्तुतिमुखरमुखा विटाश्चिन्त्याः ॥ ३९ ॥

अतिशुचितया न वित्तं गृह्णाति करोति चाग्र्यमधिकारम् ।
यो नियमसलिलमत्स्यः परिहार्यो निःस्पृहनियोगी ॥ ४० ॥

रथ्यावणिजः पापाः स्वयमेत्य गृहेषु यत्प्रयच्छन्ति ।
तत्स्वकरार्पितमखिलं भवति परं काचशकलमपि ॥ ४१ ॥

छन्दानुवर्तिनो ये श्वभ्रापातेऽपि साधुवादपराः ।
सर्वस्वहारिणस्ते मधुरा विषवद्विशन्त्यन्तः ॥ ४२ ॥

तव नरपतिः प्रसादी गुणगणनपरः परं विजने ।
उक्त्वेति राजदासैः सेवकलोकः सदा मुषितः ॥ ४३ ॥

स्वप्ने मयाब्जहस्ता दृष्टा श्रीस्त्वद्गृहं प्रविष्टा सा ।
मासोपवासतुष्टा देवी श्रीः सादरा प्राह ॥ ४४ ॥

मद्भक्तस्ते दास्यति सर्वं तत्त्वं मया लब्धः ।
इत्युक्त्वा सरलानां विलसन्ति गृहे गृहे धूर्ताः ॥ ४५ ॥

पुरविप्लवनगरोदययज्ञविवाहोत्सवादिजनसंघे ।
प्रविशन्ति बन्धुवेषाः परेऽपि सर्वापहाराय ॥ ४६ ॥

परिजनपानावसरे पिबति न मद्यं निशासु जागर्ति ।
ध्यानपरः सेवार्थी किमपि च कर्तुं कृतोद्योगः ॥ ४७ ॥

न ददाति प्रतिवचनं ददाति वा गद्गदाक्षरैर्विषमम् ।
नष्टमुखः सोच्छ्वासः प्रवेपते तत्क्षणं चोरः ॥ ४८ ॥

यश्चाधिकपरिशुद्धिं प्रार्थयते रटति यश्च साटोपः ।
घोरापह्नवकारी शङ्कायतनं स पापः स्यात् ॥ ४९ ॥

प्रत्यक्षेऽपि परोक्षे कृतमकृतं कथितमप्यनुक्तं च ।
यः कुरुते निर्विकृतिः स परं पुंसां भयस्थानम् ॥ ९० ॥
कृतकृतकमुग्धभावः षण्ढ इव स्त्रीस्वभावसंलापः ।
विचरति यः स्त्रीमध्ये स कामदेवो गृहे धूर्तः ॥ ९१ ॥
सततमधोमुखदृष्टिः सति विभवे मलिनदशनवसनश्च ।
विलिखन्कोषनियुक्तः कोषगृहे मूषकश्चिन्त्यः ॥ ९२ ॥
तिष्ठति यः सकलदिनं गृहदासः प्रीतवेश्मभवनेषु ।
गृहदीर्घकथाः कथयन्स चरः सर्वात्मना त्याज्यः ॥ ९३ ॥
निन्द्ये बहुदण्डार्हे कर्मणि यः सर्वथा प्रतारयति ।
आजीवभीतिभोज्यस्तेन निबद्धः स्थिरो राशिः ॥ ९४ ॥
दृष्ट्वा गुह्यमशेषं तस्य रहस्यं च लीलया लब्ध्वा ।
धूर्तेन मुग्धलोकस्तेन शिलापट्टके लिखितः ॥ ९५ ॥

राजविरुद्धं द्रव्यं रूपं[1] वा कूटलेख्यमन्यद्वा ।
निःक्षिप्य यात्यलक्ष्यं धूर्तो धनिनां विनाशाय ॥ ९६ ॥
क्षुद्रः क्षीणोऽपि गृहे लब्धास्वादः कृतो धनैर्येन ।
शस्त्रविषपाशहस्तः स [2]पाशहस्तो धृतस्तेन ॥ ९७ ॥
लज्जाधनः कुलीनः संभावितशुद्धशीलमर्यादः ।
नारीक्रियते धूर्तैः प्रायेण सगर्भनारीभिः ॥ ९८ ॥
दृष्टाभिरदृष्टाभिः क्रूराभिः कृतकवचनमुद्राभिः ।
धूर्तो मुष्णाति वधूं मुग्धां विप्रोषिते पत्यौ ॥ ९९ ॥
सजनेऽपि साधुवेषा विधृताभरणाश्च हेलया धूर्ताः ।
धीरा हरन्ति सकलं दृष्टे हासोऽन्यथा लाभः ॥ ६० ॥
[3]देशे कृत्वा स्फीते कुम्भधनो डम्बरैर्गृहं पूर्णम् ।
निःक्षेपलक्षहारी वर्षेण पलायते धूर्तः ॥ ६१ ॥

---

१. राजकीयटङ्कशालातोऽन्यस्थले स्वगृहादौ निर्मितं रजतमुद्रादि. २. पाशहस्तो
३. यथा मरुस्थलादिदेशवासिनः केचिद्वणिजो देशान्तरे गत्वा महता डम्बरेण धनवत्त

शुचितरकनकविभूषणतनुवस्त्राः संभ्रमेण पूज्यन्ते।
रिपुभग्नराजपुत्रव्याजेन गृहे गृहे धूर्ताः ॥ ६२ ॥
आदाय देशवृषभं पुण्यं छागं च धूर्तविक्रीतम्।
मुग्धस्य दुःखपाकः समर्घलाभोदितो हर्षः ॥ ६३ ॥
साधिक्षेपत्यागो महतां संपत्सु यः कृतासूयः।
तस्मै भयेन वित्तं रिक्तोऽपि ददाति यत्नेन ॥ ६४ ॥
निःसारभूर्जसारैः कृत्वा युक्तं महासार्थम्।
धूर्तो दिशि दिशि विचरन्धनिकसहस्राणि मुष्णाति ॥ ६५ ॥
धूर्तो वसन्विदेशेषूद्दिश्य सुरापगागयायात्राम्।
मृतबन्धूनामर्थे द्रविणं गृह्णाति मुग्धेभ्यः ॥ ६६ ॥
मुष्णाति सार्थरमणी शाटीमादाय निद्रया मुग्धान्।
धूर्तेन कूटरूपं दत्त्वा निशि वञ्चयते सापि ॥ ६७ ॥
बधिरं वा मूकं वा वणिजं निःक्षिप्य भाण्डशालायाम्।
धूर्तो नयति त्वरया बहुमूल्यं वर्णकद्रव्यम् ॥ ६८ ॥
किंचित्परिचयमात्रैः किंचिद्धाष्टर्यैः सकल्पनैः किंचित्।
किंचिद्विवादकलहैः सर्वज्ञो वञ्चकश्चरति ॥ ६९ ॥
मिथ्याडम्बरधनिकः पुस्तकविद्वान्कथाज्ञानी।
वर्णनशूरश्चपलश्चतुर्मुखो जृम्भते धूर्तः ॥ ७० ॥
सर्वावयवविधूननकृतसंकेतान्विसृज्य गेहेषु।
भोक्तुं व्रजति दिगन्तान्स्वेच्छाचारी महाधूर्तः ॥ ७१ ॥
शतवार्षिकमामलकं भुक्त्वा श्रीपर्वतादहं प्राप्तः।
धूर्तो वदति गुरूणां पुरतः शकुनं स्मरामीति ॥ ७२ ॥

तां संपाद्य बहूनां निःक्षेपधनानि भक्षयित्वा कुम्भादिषु गुप्ततया संस्थाप्य पश्चात् 'दि-वाला'निष्कासनं कुर्वन्ति.

१. यथाधुनापि केचित् 'दिल्लीबादशाहशाहजादा'नामकाः, केचिच्च 'लखनऊनवाब'-तन्नूजन्मानो भूत्वा मुग्धधनिकान्वञ्चयन्तः परिभ्रमन्ति. २. वेश्या. ३. 'खोटा रुपया' इति प्रसिद्धं कांस्यादिनिर्मितं रूपकम्.

एता लेशेन मया कथिता मायाश्चतुःषष्टिः ।
को वेद वञ्चकानां मायानां शतसहस्राणि ॥ ७३ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे नानाधूर्तवर्णनं नाम नवमः सर्गः ।

दशम सर्गः ।

एता वञ्चकमाया विज्ञेया न तु पुनः स्वयं सेव्याः ।
धर्म्यः कलाकलापो विदुषामयमीप्सितो भूत्यै ॥ १ ॥
धर्मस्य कला ज्येष्ठा भूतदयाख्या परोपकारश्च ।
दानं क्षमानसूया सत्यमलोभः प्रसादश्च ॥ २ ॥
अर्थस्य सदोत्थानं नियमपरीपालनं क्रियाज्ञानम् ।
स्थानत्यागः पटुतानुद्वेगः स्त्रीष्वविश्वासः ॥ ३ ॥
कामस्य वेषशोभा पेशलता चारुता गुणोत्कर्षः ।
नानाविधाश्च लीलाश्चित्तज्ञानं च कान्तानाम् ॥ ४ ॥
मोक्षस्य विवेकरतिः प्रशमस्तृष्णाक्षयश्च संतोषः ।
सङ्गत्यागः स्वलयस्थानं परमप्रकाशश्च ॥ ५ ॥
एताश्चतुष्टयकला द्वात्रिंशत्क्रमधृताः समस्ता वा ।
संसारवञ्चकानां विद्या विद्यावतामेव ॥ ६ ॥
मात्सर्यस्य त्यागः प्रियवादित्वं सधैर्यमक्रोधः ।
वैराग्यं च परार्थे सुखस्य सिद्धाः कलाः पञ्च ॥ ७ ॥
सत्सङ्गः कामजयः शौचं गुरुसेवनं सदाचारः ।
श्रुतममलं यशसि रतिर्मूलकलाः सप्त शीलस्य ॥ ८ ॥
तेजः सत्त्वं बुद्धिर्व्यवसायो नीतिरिङ्गितज्ञानम् ।
प्रागल्भ्यं सुसहायः कृतज्ञता मन्त्ररक्षणं त्यागः ॥ ९ ॥
अनुरागः प्रतिपत्तिर्मित्रार्जनमानृशंस्यमस्तम्भः ।
आश्रितजनवात्सल्यं सप्तदशकलाः प्रभावस्य ॥ १० ॥ (युग्मम्
मौनमलौल्यमयाच्ञा मानस्य च जीवितं कलात्रितयम् ।
एताः कला विदग्धैः स्वगताः कार्याश्चतुःषष्टिः ॥ ११ ॥

शक्तविरोधे गमनं तत्प्रणतिर्वा बलोदये वैरम् ।
आर्तस्य धर्मचर्या दुःखे धैर्यं सुखेष्वनुत्सेकः ॥ १२ ॥

विभवेषु संविभागः सत्सु रतिर्मन्त्रसंशये प्रज्ञा ।
निन्द्येषु पराङ्मुखता भेषजमेतत्कलादशकम् ॥ १३ ॥

गुरुवचनं सत्यानां कार्याणां गोद्विजातिसुरपूजा ।
लोभः पापतमानां क्रोधः सर्वोपतापजनकानाम् ॥ १४ ॥

प्राज्ञः सर्वगुणानां यशस्विता विपुलवित्तविभवानाम् ।
सेवा दुःखतमानामाशा पृथुकालभुजगपाशानाम् ॥ १५ ॥

दानं रत्ननिधीनां निर्वैरत्वं सुखप्रदेशानाम् ।
याच्ञा मानहराणां दारिद्र्यं चोपतापसार्थानाम् ॥ १६ ॥

धर्मः पाथेयानां सत्यं सुखपद्मपावनकराणाम् ।
व्यसनं रोगगणानामालस्यं गृहसमृद्धिनाशानाम् ॥ १७ ॥

निःस्पृहता श्लाघ्यानां प्रियवचनं सर्वमधुराणाम् ।
दर्पस्तिमिरकराणां दम्भः सर्वोपहासपात्राणाम् ॥ १८ ॥

अद्रोहः शौचानामचापलं व्रतविशेषनियमानाम् ।
पैशुन्यमप्रियाणां वृत्तिच्छेदो नृशंसचरितानाम् ॥ १९ ॥

कारुण्यं पुण्यानां कृतज्ञता पुरुषचिह्नानाम् ।
माया मोहमतीनां कृतघ्नता नरकपातहेतूनाम् ॥ २० ॥

मदनश्छलचौराणां स्त्रीवचनं ज्ञातिभेदानाम् ।
क्रूरश्चण्डालानां मायावी कलियुगावताराणाम् ॥ २१ ॥

शास्त्रं मणिदीपानामुपदेशश्चाभिषेकाणाम् ।
वृद्धत्वं क्लेशानां रोगित्वं मरणतुल्यदुःखानाम् ॥ २२ ॥

स्नेहो विषमविषाणां वेश्यारागो विसर्पकुष्ठानाम् ।
भार्या गृहसाराणां पुत्रः परलोकबन्धूनाम् ॥ २३ ॥

शत्रुः शल्यशतानां दुष्पुत्रः कुलविनाशानाम् ।
तारुण्यं रमणीनां रूपं रुचिरोपचारवेषाणाम् ॥ २४ ॥

संतोषो राज्यानां सत्सङ्गश्चक्रवर्तिविभवानाम् ।
चिन्ता शोषकराणां विद्वेषः कोटराग्निदाहानाम् ॥ २५ ॥
मैत्री विस्रम्भानां निर्यन्त्रणता महार्हभोगानाम् ।
संकोचो व्याधीनां कौटिल्यं निर्जलान्धकूपानाम् ॥ २६ ॥
आर्जवममलकराणां विनयो वररत्नमुकुटानाम् ।
द्यूतं दुर्व्यसनानां स्त्रीजितता मरुतटीपिशाचानाम् ॥ २७ ॥
त्यागो मणिवलयानां श्रुतमुज्ज्वलकर्णरत्नानाम् ।
खलमैत्री चपलानां दुर्जनसेवा वृथाप्रयासानाम् ॥ २८ ॥
निर्वृतिरुद्यानानां प्रियदर्शनमम्तृतवर्षाणाम् ।
तत्त्वरतिर्लभ्यानां मूर्खसभा सद्विवेकनाशानाम् ॥ २९ ॥
कुलजः सफलतरूणां सौभाग्यं कृतयुगावताराणाम् ।
राजकुलं शङ्क्यानां स्त्रीहृदयं प्रकृतिकुटिलानाम् ॥ ३० ॥
औचित्यं स्तुत्यानां गुणरागश्चन्दनादिलेपानाम् ।
कन्या_शोककराणां बुद्धिविहीनोऽनुकम्प्यानाम् ॥ ३१ ॥
विभवः सौभाग्यानां जनरागः कीर्तिकन्दानाम् ।
मद्यं वेतालानां मृगया गजगहनयक्षाणाम् ॥ ३२ ॥
प्रशमः स्वास्थ्यकराणामात्मरतिस्तीर्थसेवानाम् ।
लुब्धः फलरहितानामाचारविवर्जितः श्मशानानाम् ॥ ३३ ॥
नीतिः स्त्रीरक्षाणामिन्द्रियविजयः प्रभावाणाम् ।
ईर्ष्या यक्ष्मशतानामयशः कुस्थानमरणानाम् ॥ ३४ ॥
माता मङ्गल्यानां जनकः सुकृतोत्सवोपदेशानाम् ।
घातस्तीक्ष्णतराणां छेदस्तीक्ष्णासिशस्त्राणाम् ॥ ३५ ॥
प्रणतिर्मन्युहराणां सौहार्दं कृच्छ्रयाच्ञानाम् ।
मानः पुष्टिकराणां कीर्तिः संसारसाराणाम् ॥ ३६ ॥
प्रभुभक्तिर्नीतीनां युधि निधनं सौख्यवीथीनाम् ।
विनयः कल्याणानामुत्साहः सर्वसिद्धीनाम् ॥ ३७ ॥

पुण्यं प्राप्यतमानां ज्ञानं परमप्रकाशानाम् ।
कीर्तिः संसारेऽस्मिन्सारतरा[1] सर्वलोकानाम् ॥ ३८ ॥ (कुलकम्)

ज्ञेयः कलाकलापे कुशलः सर्वार्थतत्त्वविज्ञानी ।
प्रवरतरो लोकेऽस्मिन्ब्राह्मण इव सर्ववर्णानाम् ॥ ३९ ॥

इत्युक्तं शतमेतद्यो वेत्ति शुभाशुभोदयकलानाम् ।
तस्यैव व्यवहारे दृष्टा दृष्टप्रयोजना लक्ष्मीः ॥ ४० ॥

उक्त्वेति **मूलदेवो** विसृज्य शिष्यान्कृतोचिताचारः ।
किरणकलिकाविकासां निनाय निजमन्दिरे रजनीम् ॥ ४१ ॥

केलीमयः स्मितविलासकलाभिरामः
सर्वाश्रयान्तरकलाप्रकटप्रदीपः ।
लोकोपदेशविषयः सुकथाविचित्रो
भूयात्सतां दयित एष कलाविलासः ॥ ४२ ॥

कलाविलासः **क्षेमेन्द्र**प्रतिभाम्भोधिनिर्गतः ।
शशीव मानसानन्दं करोतु सततं सताम् ॥ ४३ ॥

इति महाकविश्रीक्षेमेन्द्रविरचिते कलाविलासे सकलकलानिरूपणं नाम दशमः सर्गः ।

पण्डितराजश्रीजगन्नाथविरचितं[2]

प्राणाभरणम्[3] ।

तत्कृतयैव टिप्पण्या समेतम् ।

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।

---

१. 'सारतरा' इत्यस्य लिङ्गविपरिणामेन सर्वत्रान्वयः. २. जगन्नाथपण्डितकृता बहवो ग्रन्थाः सन्ति, तन्मध्यादद्यावधि ज्ञाता ग्रन्थास्त्वेते—(१) अमृतलहरी, (२) आसफविलासः, (३) करुणालहरी, (४) चित्रमीमांसाखण्डनम्, (५) जगदाभरणकाव्यम्, (६) पीयूषलहरी, (७) प्राणाभरणकाव्यम्, (८) भामिनीविलासः, (९) मनोरमाकुचमर्दनम्, (१०) यमुनावर्णनचम्पूः, (११) लक्ष्मीलहरी, (१२) सुधालहरी, (१३) रसगङ्गाधरः, ३. कामरूपदेशाधीशस्य प्राणनारायणमहीपस्य स्तुतिरूपोऽयं ग्रन्थः.

आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन्वाचां विलासो मम ॥ १ ॥

विद्वांस इत्यादि प्रायदर्शनाभिप्रायमेतत् । तेन सहृदयैर्न मनागपि विमनायितव्यम् । भावध्वनिश्चायम् । उत्तरार्धप्रतिपाद्यार्थालम्बनाया एतत्पद्यप्रयोगानुभावाया: कविगतचिन्ताया: प्राधान्येनाभिव्यक्तेः । अनुपात्तोभयनिमित्तको व्यतिरेकः स्फुटोऽलंकारः । कामालसत्वं वामाविशेषणमधरमाधुरीप्रकर्षकम् ॥

विद्राणैव गुणज्ञता समुदितो भूयानसूयाभरः
कालोऽयं कलिराजगाम जगतीलावण्यकुक्षिंभरिः ।
एवं भावनया मदीयकविते मौनं किमालम्बसे
जागर्तु क्षितिमण्डले चिरमिह श्रीकामरूपेश्वरः ॥ २ ॥

कविगतराजविषयकरतिभावध्वनिश्चायम् । इत ऊर्ध्वमयमेव आ चरमपद्यमनुवर्ति[illegible] अस्य चात्र मौनानुभावितो वर्णनीयालम्बनो निर्वेदो गुण इति प्रेयोलंकारास्पदम् । [illegible] चाचेतनायां कवितायां चेतनत्वाध्यवसायमूलासंबन्धे संबन्धात्मिकातिशयोक्तिर्वि[illegible] तेन भावनामौननिर्वेदानां संबोधनस्य च नानुपपत्तिः ॥

पारीन्द्राणां धुरीणैरवनितलगुहागर्भतः संपतद्भिः
स्वापभ्रंशापराधप्रचलितनयनप्रान्तमाकर्ण्यमानः ।
त्वत्प्रस्थानान्तरुद्यत्प्रलयजलधरध्वानधिक्कारधीरो
घृष्टक्षीरोदतीरो जगति विजयते दुन्दुभिद्वन्द्वनादः ॥ ३ ॥

अत्र राजालम्बनस्य तादृशनादश्रवणोद्दीपितस्य नयनप्रचलनानुभावितस्य गिरि[illegible] र्भोत्पतनाभिव्यक्तेनामर्षेण संचारिणा परिपोषितस्य पारीन्द्रगतोत्साहस्य स्व[illegible] राजविषयकरतिभावाङ्गत्वाद्रसालंकारत्वम् । यदाहुः—'प्रधानेऽन्यत्र वाक्यार्थे य[illegible] तु रसादयः । काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥ इति । तृतीयचतुर्थचरण[illegible] स्फुटावेव व्यतिरेकातिशयौ । घृष्टशब्देन तादृशनादो वेलाचलप्रतिबद्धत्वादग्रे न ग[illegible] अन्यथा लोकालोकाचलमपि स्पृशेदिति गम्यते । अत एव मृष्टेति नोक्तम् । तथा [illegible] शैथिल्यप्रत्ययापत्तेः ॥

किं ब्रूमस्तव वीरतां वयममी यस्मिन्धराखण्डल
क्रीडाकुण्डलितभ्रु शोणनयनं दोर्मण्डलं पश्यति ।

---

१. उदाहृतोऽयं श्लोको रसगङ्गाधरे प्रथमानने. 'हे पृथ्वीन्द्र, यस्मिंस्त्वयि क्रीड[illegible] तस्यां वा कुण्डलिते भ्रुवौ शोणनयने च यस्य तस्मिन्सति । दोर्मण्डलं दोर्युगं पश्यति सति । तत्कालं तस्मिन्नेव समये । रक्तमणिसमूहकान्तिमिश्रितैर्भूषणानन्तसमूहैर्विन्[illegible]

माणिक्यावलिकान्तिदन्तुरतरैर्भूषासहस्रोत्करै-
विन्ध्यारण्यगुहागृहावनिरुहास्तत्कालमुल्लासिताः ॥ ४ ॥

अत्र विन्ध्यारण्यगतानां गुहागृहाणामवनिरुहां च विन्ध्यगतानां गुहागृहाणामरण्यगतानामवनिरुहाणां वा भूषणेन कार्येणाप्रस्तुतेन त्वदरिनारीणां स्वनगराणि परित्यज्य निशि गुहागृहेषु तरुतलेषु च विन्यस्य सकलाभरणानि कृतशयनानां प्रातस्त्वदागमनसंभ्रमेण तत्कर्मकं विस्मरणं भारवशात्परित्यागो वा प्रस्तुतो गम्यत इत्यप्रस्तुतप्रशंसा । कार्यस्य यथाकथंचित्प्रस्तुतत्वे तु पर्यायोक्तमलंकारः ॥

माहात्म्यस्य परोऽवधिर्निजगृहं गम्भीरतायाः पिता
रत्नानामहमेक एवं भुवने को वापरो मादृशः ।
इत्येवं परिचिन्त्य मा स्म सहसा गर्वान्धकारं गमो
दुग्धाब्धे भवता समो विजयते श्रीप्राणनारायणः ॥ ५ ॥

अत्रोपमानस्य गुणविशेषप्रयुक्तसादृश्याभावनिबन्धनमुत्कर्षं परिहर्तुं वर्ण्यमानसादृश्यात्मकः प्रतीपालंकारभेदः । स चोपमाविशेष इत्येके । विच्छित्तिवैलक्षण्यादतिरिक्त एवेत्यपरे ॥

त्वत्तो जन्म सितांशुशेखरतनुज्योत्स्नानिमग्नात्मनो
दुग्धाम्भोनिधिमुग्धवीचिवलयैः साकं परिक्रीडनम् ।
संवासः सुरलोकसिन्धुपुलिने वादः सुधांशोः करैः
कस्मान्नोज्ज्वलिमानमञ्चतुतमां देव त्वदीयं यशः ॥ ६ ॥

अत्र यशसि धवलतातिशयस्तद्धर्मिसंबन्धप्रयुक्तत्वेन कथित इति समस्य विषयः । अंशुकृतश्चन्द्रे तत्कृतश्च भगवति भगवत्कृतश्च राजनीत्येवमुत्तरोत्तरमुपचीयमानो राजगत उत्कर्षः प्रतीयत इति सारविषयः ॥

आबध्नास्यलकान्निरस्यसितमां चोलं रसाकाङ्क्षया
ऽलङ्कायावशतां तनोषि कुरुषे जङ्घालटक्षतम् ।

द्रैर्वनगुहागृहवृक्षाश्चत्वार उल्लासिताः । अतस्तव वीरतां अमी वयं किं ब्रूम इत्यर्थः । क्रीडायां तथा कृतं श्रुत्वा शत्रवः पलाय्य विन्ध्यप्रदेशं संगता इति भावः' इति तत्र नागेशभट्टव्याख्यानम्. १. वामानां शत्रूणाम्. (तत्पक्षे) अलकां नगरीविशेषम्, चोलं देशविशेषम्, रसाया भूमेः, लङ्काया नगरीविशेषस्य, जङ्घालस्य वेगवतो लाटदेशस्य, प्रत्यङ्गमङ्गदेशं प्रति; अथ च वामानां स्त्रीणाम्. (तत्पक्षे) अलकांश्चूर्णकुन्तलान्, चोलं वस्त्रविशेषम्, रसस्य शृङ्गारस्य, अलं कायावशतामत्यर्थं तासां शरीरस्यावशताम्, जङ्घयोर्ललाटे च क्षतं नखक्षतं कुरुषे कामशास्त्रोक्तत्वात्, प्रसङ्गं सर्वाङ्गेषु.

प्रत्यङ्गं परिमर्दनिर्दयमहो चेतः समालम्बसे
वामानां विषये नृपेन्द्र भवतः प्रागल्भ्यमत्यद्भुतम् ॥ ७ ॥

अत्र प्रकृतधर्मिगतयोः प्रकृताप्रकृतयोः प्रकृतयोरेव वा वृत्तान्तयोः श्लेषः । स च षट्सु स्थलेषु शब्दनानात्वनिबन्धनो द्वयोश्चार्थनानात्वनिबन्धनः । द्वावप्येतौ शब्दा-काराविति प्राञ्चः । आद्यो जतुकाष्ठन्यायेन शब्दश्लेषणाच्छब्दालंकारः, द्वितीयस्त्वेकवृन्त-तफलद्वयन्यायेनार्थश्लेषणादर्थालंकार इति नव्याः ॥

देव त्वां परितः स्तुवन्तु कवयो लोभेन किं तावता
स्तव्यस्त्वं भवितासि यस्य तरुणश्चापप्रतापोऽनिशम् ।
क्रोडान्तः कुरुतेतरां वसुमतीमाशाः समालिङ्गति
द्यां चुम्बत्यमरावतीं च सहसा गच्छत्यगम्यामपि ॥ ८ ॥

अत्र प्रतापगतः पृथिव्यादिसंबन्धो लिङ्गविशेषावच्छिन्नतत्तत्साधारणविशेषणाभिव्य-कामुकवृत्तान्ताभिन्नतया स्थित इति समासोक्तिः कार्यरूपधर्मप्रयुक्तशुद्धसाधारण्येन वि-षणसाम्यमालम्ब्य प्रवृत्ता । सा च निन्दोत्थापकत्वाद्व्याजस्तुतौ गुणः ॥

लोकानां विपदं धुनोषि कुरुषे संपत्तिमत्युत्कटा-
मित्यल्पेतरजल्पितैर्जडधियां भूपाल मा गा मदम् ।
यत्कीर्तिस्तव वल्लभा लघुतरब्रह्माण्डभाण्डोदरे
पिण्डीकृत्य महोन्नतामपि तनुं कष्टेन हा वर्तते ॥ ९ ॥

अत्रापि प्राग्वत् । परं त्वाधाराधेयान्यतरविस्तृतत्वसिद्धिफलकान्यतरन्यूनत्वक-त्माधिकालंकारोऽपि तस्यां गुणः ॥

क्षोणीं शासति मय्युपद्रवलवः कस्यापि न स्यादिति
प्रौढं व्याहरतो वचस्तव कथं देव प्रतीमो वयम् ।
प्रत्यक्षं भवतो विपक्षनिवहैर्ध्यामुत्पतद्भिः क्रुधा
यद्युष्मत्कुलकोटिमूलपुरुषो निर्भिद्यते भास्करः ॥ १० ॥

इह त्वधिकसमासोक्तिभ्यामनालिङ्गितैव सा [व्याजस्तुतिः] ॥

आस्वादेन रसो, रसेन कविता, काव्येन वाणी, तया
लोकान्तःकरणानुरागरसिकः सभ्यः, सभा चामुना ।
दारिद्र्यानलदह्यमानजगतीपीयूषधाराधर !
क्षोणीनाथ! तथा भवांश्च भवता भूमण्डलं भासते ॥ ११ ॥

मालादीपकमेतदिति प्राञ्चः । दीपकस्य सादृश्यमूलकतानियमान्न मालादीपकमपि त्वेकावलीभेद इति तु वयम् ॥

अम्लायन्यदरातिकैरवकुलान्यम्लासिषुः सत्वरं
दैन्यध्वान्तकदम्बकानि परितो नेशुस्तमां तामसाः ।
सन्मार्गाः प्रसरन्ति साधुनलिनान्युल्लासमातन्वते
तन्मन्ये भवतः प्रतापतपनो देव प्रभातोन्मुखः ॥ १२ ॥

इह रूपकनिष्पादितलिङ्गकमनुमानं निमित्तविरहादुत्प्रेक्षाया अयोगाद्वाचकमनुमितिपरम् ॥

उत्क्षिप्ताः[1] कबरीभरं, विवलिताः पार्श्वद्वयं, न्यक्कृताः वक्रतां नीताः
पादाम्भोजयुगं, रुषा परिहृता दूरेण चेलाञ्चलम् ।
गृह्णन्ति त्वरया भवत्प्रतिभटक्ष्मापालवामभ्रुवां
यान्तीनां गहनेषु कण्टकचिताः के के न भूमीरुहाः ॥ १३ ॥

अत्र कण्टकचितत्वेन कबरीग्रहणादेः संकीर्णत्वात्कार्यधर्मान्तरा संकीर्णशुद्धसाधारण्येन विशेषणसाम्यमालम्ब्य प्रवृत्ता समासोक्तिः ॥

दृष्टिः संभृतमङ्गला बुधमयी देव त्वदीया सभा
काव्यस्याश्रयभूतमास्यमरुणा[2]धारोऽधरः सुन्दरः ।
क्रोधस्तेऽशनि[3]भूरुदारधिषेण[4] स्वान्तं तु सोमास्पदं
राजन्नूनमनूनविक्रम भवान्सर्वग्रहालम्बनम् ॥ १४ ॥

अत्रोत्प्रेक्ष्यमाणसर्वग्रहालम्बनत्वस्य समानाधिकरणेषु धर्मेषु तत्तद्ग्रहाश्रिताङ्कत्वेषु विशेषणीभूतैस्तत्तद्ग्रहैः सह विषयस्य राज्ञो कल्याणाश्रयत्वादिषु विशेषणानां कल्याणादीनां श्लेषेणाभेदसंपादनद्वारा तादृशधर्मसाधारणतासंपत्तौ तन्निमित्तकोत्प्रेक्षासिद्धिः ॥

सृष्टः सृष्टिभुवा पुरा किल परित्रातुं जगन्मण्डलं
त्वं चण्डातप[5] निर्दयं तपसि यज्ज्वालाजटालैः करैः ।
संरम्भः = क्रोधः । संरम्भारुणलोचनो रणभुवि प्रस्थातुकामोऽधुना
जानीमो भवता न हन्त विदितः श्रीकामरूपेश्वरः ॥ १५ ॥

---

१. उदाहृतोऽयं श्लोको रसगङ्गाधरे प्रथमानने. 'उत्क्षिप्ता उन्नतीकृताः । विवलिता वक्रीकृताः । न्यक्कृता अधरीकृताः । ग्रहणे हेतुगर्भं विशेषणं कण्टकचिता इति कण्टकव्याप्ता इत्यर्थः' इति तत्र टीका. २. अरुणः सूर्यः. ३. अशनिर्वज्रम्. ग्रहगणनायां तु शनिरित्येव. ४. धिषणा बुद्धिः, धिषणो गुरुः. ५. हे सूर्य.

अत्र राजवर्णनाङ्गत्वेन रवेर्भयोत्पादने वर्ण्यत्वेन प्रस्तुते साक्षात्तदननुगुणत्वेनाप्रस्तुतेन प्रस्थानेन साक्षात्तदनुगुणं रिपुकर्तृकं सूर्यमण्डलभेदनं कार्यं गम्यते ॥

आयाता कमलासनस्य भवनाद्द्रष्टुं त्रिलोकीतलं
गीर्वाणेषु दिनानि कानिचिदहो नीत्वा पुनः कौतुकात् ।
भ्रान्त्वा भूवलये महाकविकुलोपास्या तवास्याम्बुजे
राजन्संप्रति सत्यधामनि गिरां देवी सुखं वर्तते ॥ १६ ॥

अत्रैकस्याधेयस्यानेकाधारसंबन्धात्पर्यायः । तत्र प्रथमचरणगतमधिकरणमार्थं विश्लेषावधिकपञ्चम्या विश्लेषस्योपश्लेषापेक्षत्वेनौपश्लेषिकाधिकरणस्याक्षेपगम्यत्वात् । सत्यधामनीति श्लेषभित्तिकाभेदाध्यवसानेन मुखस्य सत्यलोकतासिद्धौ सुखवर्तनसिद्धिः ॥

विद्वद्दैन्यतमस्त्रिमूर्तिरथवा वैरीन्द्रवंशाटवी-
दावाग्निः किमहो महोज्ज्वलयशःशीतांशुदुग्धाम्बुधिः ।
किं वानङ्गभुजंगदष्टवनिताजीवातुरेवं नृणां
केषामेष नराधिपो न जनयत्यल्पेतराः कल्पनाः ॥ १७ ॥

अत्र कोटीनामारोपान्तरमूलकत्वात्परम्परितसंशयः स चाहार्यः, मूलारोपस्य तथात्वात् । कवाविव कविनिबद्धप्रमात्रन्तरेऽप्याहार्यबुद्धेरविरोधात् ॥

नदन्ति मददन्तिनः परिलसन्ति वाजिव्रजाः
पठन्ति बिरुदावलीमहितमन्दिरे बन्दिनः ।
इदं तदवधि प्रभो यदवधि प्रवृद्धा न ते
युगान्तदहनोपमा नयनकोणशोणद्युतिः ॥ १८ ॥

अत्र मुख्यार्थस्य राजविषयायाः कविरतेरुपकारकस्य यदैव तव कोपोदयस्तदैव तव रिपूणां संपदो भस्मसाद्भविष्यन्तीति वस्तुन उपकारिका नयनकोणशोणद्युतेर्युगान्तदहनोपमा ॥

मयि त्वदुपमाविधौ वसुमतीश वाचंयमे
न वर्णयति मामयं कविरिति क्रुधं मा कृथाः ।
चराचरमिदं जगज्जनयतो विधेर्मानसे
पदं न विदधेतरां तव समो द्वितीयो नरः ॥ १९ ॥

अत्र त्वत्समोऽन्यो नास्तीति प्रत्ययादुपमानलुप्तोपमा व्यङ्ग्येति प्राञ्चः । सर्वथैव सा-

---

१. सूर्यः. २. जीवनौषधम्.

म्यस्याप्रतिष्ठानान्नेयमुपमा । अन्यथा व्यतिरेकस्यापि तत्त्वापत्तेः । '[1]ढुंढोल्लन्तो मरिससि कंटककलिआइं केअइवणाइं । मालइकुसुमसरिच्छं भमर भमंतो ण पाविसि ॥' इत्यत्र तु न प्राप्स्यसीत्युक्त्वा क्वचित्त्वदगोचरे स्थले भविष्यतीति प्रतीतेः सादृश्यप्रतिष्ठानाल्लुप्तोपमास्तु । तस्मादसमालंकार एवायमिति तु नव्याः ॥

भुजभ्रमितपट्टिशोद्दलितदृप्तदन्तावलं
भवन्तमरिमण्डलक्कथन पश्यतः संगरे ।
करालकुलिशाहतिस्फुटविभिन्नविन्ध्याचलो
न कस्य हृदयं झटित्यधिरुरोह [2]जम्भाहितः ॥ २० ॥

अत्र स्मरणालंकारः परंतु लक्ष्यः ॥

यमः प्रतिमहीभृतां हुतवहोऽसि तन्नीवृतां[3]
सतां खलु युधिष्ठिरो [4]धनपतिर्धनाकाङ्क्षिणाम् ।
गृहं शरणमिच्छतां कुलिशकोटिभिर्निर्मितं
त्वमेक इह भूतले बहुविधो विधात्रा कृतः ॥ २१ ॥

अत्र कविना यमत्वादिना रूपेण राज्ञो रूपवतः करणाद्रूपकेण विपक्षभूपालादीनामेतस्मिन्नागते यमत्वादिना भ्रान्तेरपि संभवाद्भ्रान्तिमता तैरेवानेकैर्ग्रहीतृभिरनेकैर्धर्मैरुल्लेखनादुल्लेखविशेषेण च सह संकीर्णोऽपि संबन्धिषष्ठयन्तभेदप्रयुक्तवर्ण्यानेकविधत्वक उल्लेखः ॥

द्विनेत्र इव वासवो मितकरो विवस्वानिव
द्वितीय इव चन्द्रमाः श्रितवपुर्मनोभूरिव ।
नराकृतिरिवाम्बुधिर्गुरुरिव क्षमामागतो
नुतो निखिलभूसुरैर्जयति कामरूपेश्वरः ॥ २२ ॥

अत्र राजगतानां द्विनेत्रत्वादीनां वासवादितादात्म्यविरोधिनां विरोधनिवर्तनाय विषयिषु वासवादिष्वारोपेण साधारणीकरणात्तन्निमित्तकोत्प्रेक्षा । सा चेह मालारूपा । न चात्रोपमा शक्यरूपणा । द्विनेत्रत्वाद्युक्तेर्निष्प्रयोजनकत्वापत्तेः । न चोपमानिष्पादकं तेषां साधारण्यं तदभावेऽपि परमैश्वर्यादिभिः प्रतीयमानैस्तस्या निष्पत्तेः । असुन्दरत्वेनोपमानिष्पादकतया कवेरनभिप्रेतत्वाच्च । एवं द्वितीयादीनां चन्द्रादिष्वारोपोऽप्युपमायां सत्यामनर्थक एव स्यात् ॥

---

१. 'अन्विष्यन्मरिष्यसि कण्टककलितानि केतकीवनानि । मालतीकुसुमसदृशं भ्रमर भ्रमन्न प्राप्स्यसि ॥' इत्यस्य छाया. २. इन्द्रः. ३. देशानाम्. ४. कुबेरः.

दीनव्राते दयार्द्रा, निखिलरिपुकुले निर्दया, किं च मृद्वी-
काव्यालापेषु, तर्कप्रतिवचनविधौ कर्कशत्वं दधाना ।
लुब्धा धर्मेष्वलुब्धा वसुनि, परिविपद्दर्शने कांदिशीका,
राजन्नाजन्मरम्य! स्फुरति बहुविधा तावकी चित्तवृत्तिः ॥ २३ ॥

अत्र विषयानेकत्वप्रयुक्तचित्तवृत्तेरनेकविधत्वमित्युल्लेखः । तत्र च तदीयचित्तवृत्तेर-नैकत्वाध्यवसानं तन्त्रम् ॥

देवाः के पूर्वदेवाः[1] समिति मम नरः[2] सन्ति के वा पुरस्ता-
देवं जल्पन्ति तावत्प्रतिभटपृतनावर्तिनः क्षत्रवीराः ।
यावन्नायाति राजन्नयनविषयतामन्तकत्रासिमूर्ते-
र्मुग्धारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणो भुजंगः ॥ २४ ॥

अत्र शुद्धपरम्परितरूपकम् ॥

प्राचीसंध्यासमुद्यन्महिमदिनमणेर्मानमाणिक्यकान्ति-
र्ज्वालामाला कराला कवलितजगतः क्रोधकालानलस्य ।
आशाकान्तापदाम्भोरुहतलविगलन्मञ्जुलाक्षारसाभा
सा भाति क्षोणिशोभाकरण तव दृशोः संगरे शोणिमश्रीः ॥ २५ ॥

अत्रापि तदेव परंतु मालात्मकम् ॥

त्वां सुन्दरीनिवहनिष्ठुरधैर्यगर्व-
निर्वासनैकरसिकं समरे निरीक्ष्य ।
का वा रिपुक्षितिभृतां बत राजलक्ष्मीः
स्वामिव्रतत्वमपरिस्खलितं बभार ॥ २६ ॥

अत्र शत्रूणां राज्यलक्ष्मीस्त्वां प्राप्तेति विवक्षितोऽर्थः पातिव्रत्यस्खलितरूपेणाभिहि- इति पर्यायोक्तम् । तच्च राज्यलक्ष्म्या नायिकात्वसिद्ध्यर्थं समासोक्तिमपेक्षत इति द तत्र गुणः ॥

नासत्ययोगो[3] वचनेषु कीर्तौ तथार्जुनः[4] कर्मणि चापि धर्मः[5] ।
चित्ते जगत्प्राणभवो[6] यदास्ते वशंवदास्ते किमु पाण्डुपुत्राः ॥ २७ ॥

---

१. दैत्याः. २. बहुवचनम्. ३. असत्यस्य योगो न; (पक्षे) नासत्यौ नकुलसह-देवौ. ४. शुभ्रो मध्यमपाण्डवश्च. ५. युधिष्ठिरोऽपि. ६. परमेश्वरः; (पक्षे) जगत्प्राणस्य पवनस्य सूनुर्भीमः.

अत्र पाण्डुपुत्रेषु विषयेषु राजवशंवदतादात्म्योत्प्रेक्षायां राजाश्रितत्वरूपो विषयिधर्मः श्लेषेण विषयाणां तदाश्रितानां चासत्याभावशुक्लगुणपुण्यपरमेश्वराणामभेदसंपादनद्वारा विषयसाधारणीकृतः ॥

मन्थाचलभ्रमणवेगवशंवदा ये
दुग्धाम्बुधेरुदपतन्नणवः सुधायाः।
तैरेकतामुपगतैर्विविधौषधीभि-
र्धाता ससर्ज तव देव दयादृगन्तान् ॥ २८ ॥

अत्र दृगन्तेषु न केवलं संजीवकत्वादयोऽमृतमात्रगुण एव कवेर्बुबोधयिषिता अपि तु निखिलजनवशीकारत्वादयोऽन्येऽपीति सुधाकणेष्वोषधीसंसर्गोऽतिशयार्थमुपात्तः ॥

केशैर्वधूनामथ सर्वकोषैः प्राणैश्च साकं प्रतिभूपतीनाम्।
त्वया रणे निष्करुणेन गाढं चापस्य जीवा चकृषे जवेन ॥ २९ ॥

अत्र चापकर्षणकार्याणां केशाकर्षणादीनां पौर्वापर्यविपर्ययात्मनातिशयेनानुप्राणिता सहोक्तिः ॥

महेन्द्रतुल्यं कवयो भवन्तं वदन्तु किं तानिह वारयामः।
भवान्सहस्रैः समुपास्यमानः कथं समानस्त्रिदशाधिपेन ॥ ३० ॥

अत्र श्लेषोत्थापितत्रिदशत्वसंख्यामादाय व्यतिरेक उपात्तोभयनिमित्तकः ॥

स तु वर्षतु वारि वारिदस्त्वमुदाराशय रत्नवर्षणः।
स कुहूरजनीमलीमसस्त्वमिहान्तर्बहिरेव निर्मलः ॥ ३१ ॥

अत्रापि स एव परं तु श्लेषोऽत्रानुत्थापको निषिद्ध्यमानं साम्यं च न शाब्दमिति विशेषः ॥

कतिपयैर्निरणायि जनाधिपस्तदपरैरुदटङ्कि धनाधिपः।
अजनि केवलमेष गिरां पतिर्भुवि मदेकमते कमतेश्वरः ॥ ३२ ॥

'कामरूप' देशस्य 'कमत' इत्यपि नाम भवति

अत्र नायं राजा किं तु गिरां पतिरित्याकारापह्नुतिः। तत्र निषेधभागः परमतत्वोक्त्या पूर्वार्धेन गम्यते। आरोपांशस्तूत्तरार्धेन ॥

मकरप्रतिमैर्महाभटैः कविभी रत्ननिभैः समन्वितः।
कवितामृतकीर्तिचन्द्रयोस्त्वमिहोर्वीरमणासि भाजनम् ॥ ३३ ॥

अत्र राज्ञो जलध्युपमायाः शब्देनाभिधानेऽप्यङ्गोपमाभिराक्षेपादेकदेशविवर्तिन्युपमा। तेनोत्तरार्ध उपमितसमास एव। विशेषणसमासवेद्यस्य तादात्म्यस्य प्रकृतेऽनुपयोगात् ॥

---

१. बोधयितुमिष्टाः.

पुरः पुरस्तादरिभूपतीनां भवन्ति भूवल्लभ भस्मशेषाः ।
अनन्तरं ते भ्रुकुटीविटङ्कात्पतन्ति रोषानलविस्फुलिङ्गाः ॥ ३४ ॥

अत्र प्रयोजकातिशयकृतः प्रयोज्यशैघ्र्यातिशयो गम्यः । कार्यकारणपौर्वापर्यविपर्ययरूपा चेयमतिशयोक्तिः ॥

भुवनत्रितयेऽपि मानवैः परिपूर्णे विबुधैश्च दानवैः ।
न भविष्यति नास्ति नाभवन्नृप यस्ते भजते तुलास्पदम् ॥ ३५ ॥

अत्रोपमानलुप्तोपमेति प्राञ्चः । असमाख्यमलंकारान्तरमिति तु वयम् ॥

पीयूषयूषकल्पामल्पामपि ते गिरं निपीतवताम् ।
तोषाय कल्पते नो योषाधरबिम्बमधुरिमोद्रेकः ॥ ३६ ॥

अत्र संबन्धेऽप्यसंबन्ध इत्यतिशयोक्तिभेदः । उपमेयोपमानविशेषणाभ्यामल्पत्वोद्रिक्तत्वाभ्यामल्पयापि सह भूयानपि मधुरिमा साम्यं कर्तुं यत्रानीशस्तत्र किं वाच्यं भूयस्येति वैलक्षण्यात्मा व्यतिरेकश्च ॥

भासयति व्योमस्था जगदखिलं कुमुदिनीर्विकासयति ।
कीर्तिस्तव धरणिगता सगरसुतायासमफलतां नयते ॥ ३७ ॥

अत्र व्यज्यमानचन्द्रिकारूपकसंकीर्ण उल्लेखध्वनिः ॥

भाग्येन सह रिपूणामुत्तिष्ठसि विष्टरात्क्रुधाविष्टः ।
सहसैव पतसि तेषु क्षितिशासन मृत्युना साकम् ॥ ३८ ॥

'केशैर्वधूनाम्' (२९) इत्यत्र कर्मणः सहोक्तिः । इह तु कर्तुरिति विशेषः ॥

त्वयि पाकशासनसमे शासति सकलं वसुंधरावलयम् ।
विपिने वैरिवधूनां वर्षन्ति विलोचनानि च दिनानि ॥ ३९ ॥

अत्र वर्षवदाचरन्तीत्याचारक्विबन्तेन श्लेषाच्छ्लेषमूलिका तुल्ययोगिता । रिपुकामिनीवर्णनविषयत्वेनोपमानोपमेययोर्द्वयोरपि प्रकृतत्वात् ॥

अहितापकरणभेषज नरनाथ भवान्करस्थितो यस्य ।
तस्य कुतोऽहिभयं स्यादखिलामपि मेदिनीं चरतः ॥ ४० ॥

अत्र श्लेषनिवेदितस्य सर्पभयाभावस्योपपादकतयोपात्तस्य राजनि भेषजतादात्म्यारोपस्याप्युपपादकतया स्थितं राजसंबन्धिनि द्विषदपकरणरूपे धर्मे श्लेषनिवेदितसर्पतापकरणतादात्म्यमिति प्रथमचरणे श्लिष्टपरम्परितरूपकं तृतीये तु श्लेष एव ॥

कुवलयलक्ष्मीं हरते तव कीर्तिस्तत्र किं चित्रम् ।
यस्मान्निदानमस्या लोकनमस्याङ्घ्रिपङ्कजो हि भवान् ॥ ४१ ॥

अत्रोत्पादकसमानगुणत्वादुत्पाद्यस्योत्पादकभावसंसर्गानुरूपः समालंकारविशेषः । श्लेषश्चास्मिन्गुणः ॥

दृष्टः सदसि चेदुग्राश्चन्द्रचन्दनचन्द्रिकाः ।
अथ त्वं संगरे सौम्याः शेषकालानलासयः ॥ ४२ ॥

अत्र दृष्टः सदसीति वाक्ये त्वमित्यस्यापकर्षणात्, अथ त्वं संगर इत्यत्र च त्वमित्यस्यानुवर्तनाद्वाक्ययोः पदविनिमयात्मालंकारः पूर्वार्धे । उत्तरार्धे प्रकृतानेकधर्मसंबन्धात्तुल्ययोगिता । उपमेयस्योत्कृष्टगुणत्वसिद्धय उपमानस्य तद्विरुद्धगुणकल्पनात्मकेनालंकारान्तरेण शबलिता ॥

अपारे खलु संसारे विधिनैकोऽर्जुनः कृतः ।
कीर्त्या निर्मलया भूप त्वया सर्वेऽर्जुनाः कृताः ॥ ४३ ॥

इह श्लेषमूलो व्यतिरेकः ॥

दधीचिबलिकर्णेषु हिमहेमाचलाब्धिषु ।
अदातृत्वमधैर्यं च दृष्टे भवति भासते ॥ ४४ ॥

अत्रापि सैव तथाविधा । यथासंख्यसंकरस्तु विशेषः ॥

शासति त्वयि हे राजन्नखण्डावनिमण्डलम् ।
न मनागपि निश्चिन्ते मण्डले शत्रुमित्रयोः ॥ ४५ ॥

इहापि तुल्ययोगिता मित्रशब्दश्लेषोत्थापिता व्याजस्तुतिश्च ॥

भानुरग्निर्यमो वायं बलिः कर्णोऽथवा शिबिः ।
प्रत्यर्थिनोऽर्थिनश्चेत्थं त्वयि यान्ति विकल्पनाम् ॥ ४६ ॥

इह तु संशय उल्लेखालिङ्गितः ॥

कमला[1]वासकासारः क्षमा[2]धृतिफणीश्वरः ।
भवान्कुवलय[3]स्येन्दुरानन्दयति मानवान् ॥ ४७ ॥

इह श्लिष्टपरम्परितं रूपकं मालारूपम् ॥

गगने चन्द्रिकायन्ते हिमायन्ते हिमाचले ।
पृथिव्यां सागरायन्ते भूपाल तव कीर्तयः ॥ ४८ ॥

इह मालोपमालिङ्गित उल्लेखः ॥

---

१. कमला लक्ष्मीः, पद्मानि च. २. क्षमा भूमिः, क्षान्तिश्च. ३. कुवलयं भूमण्डलम्, उत्पलं च.

मृगतां हरयन्मध्ये वृक्षतां च पटीरयन् ।
नक्षत्रतां महीपानां त्वमिन्दवसि भूपते ॥ ४९ ॥

इह शुद्धपरम्परिता मालारूपोपमा । आचारक्विबन्ताच्छतरि रूपाणि तिङि चैकम् [इन्दवसि] ॥

मध्ये सुधासमुद्रस्य सितामयगृहोदरे ।
पूर्णेन्दुविष्टरे देव स्थातुं योग्यास्तवोक्तयः ॥ ५० ॥

अत्र त्रयाणां सुधासमुद्रादीनां विशेषणविशेष्यभावेन मधुरिमणि परां काष्ठामधिरूढे त्वदीयोक्तिपदसंबन्धो युक्तो न तु विशकलित इत्यतिशायकासद्विशेषणनिबन्धना प्रौढोक्तिः ॥

अमृतलहरीचन्द्रज्योत्स्नारमावदनाम्बुजा-
न्यधरितवतो निर्मर्यादप्रसादमहाम्बुधेः ।
उदभवदयं देव त्वत्तः कथं परमोल्बणः
प्रलयदहनज्वालाजालाकुलो महसां गणः ॥ ५१ ॥

[अत्र] कारणगुणविरुद्धस्वगुणस्य कार्यस्योत्पत्तेर्विषमालंकारः । अमृतलहर्यादीनां त्रया[णा]मधरीकरणात्मना व्यतिरेकेण संजीवकत्वपरमशीतलत्वविशुद्धत्वसौन्दर्याणामतिशयो गम्यते । एवमेषु पद्येषु संभवन्तोऽप्यन्येऽलंकाराः स्फुटत्वान्न विवेचिताः । सहृदयानां प्रीत्यावश्यकं किंचिद्व्याख्यातमन्यत्तु तैरेवोल्लासनीयमित्यलं पल्लवितेन ॥

तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटंतपः ।
संतुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनं
श्रीमत्पण्डितराजपण्डितजगन्नाथो व्यधासीदिदम् ॥ ५२ ॥[1]

दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमिह त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ॥ ५३ ॥

अत्र स्मरणालंकारः । भाव इति तु न भ्रमितव्यम् । सादृश्यमूलकत्वातन्मूलकत्वाभ्यां भावत्वालंकारत्वयोरिह व्यवस्थितेः शब्दवेद्यत्वाच्च ॥

इति पण्डितराजश्रीजगन्नाथविरचितं प्राणाभरणं तत्कृतयैव टिप्पण्या समेतं समाप्तम् ।

---

१. ग्रन्थसमाप्त्यनन्तरमयं श्लोकोऽनुचित इवाभाति. भामिनीविलासादाकृष्यात्र केनचित्प्रक्षिप्तः स्यात्.

श्रीमदप्पयदीक्षितविरचितं[1]
वैराग्यशतकम् ।

आस्ते कश्चन भिक्षुः संगृह्णन्नव्ययानि देश[2] ।
न ममेत्यव्ययुगलं याचामस्तं किमस्त्यन्यत् ॥ १ ॥
धीसचिवं धैर्यबलं संकल्पविरोधि शान्तिधनम् ।
विश्वत्रयविषयमिदं वैराग्यं नाम साम्राज्यम् ॥ २ ॥
राज्ञो बिभेति लोको राजानः पुनरितोऽपि वैरिभ्यः ।
आ ब्रह्मणः कृतान्तादकुतोभयमस्पृहाराज्यम् ॥ ३ ॥

---

१. अप्पयदीक्षितसहोदरस्याप्पयदीक्षितस्यैव वा पौत्रेण नारायणदीक्षितपुत्रेण नीलकण्ठदीक्षितेन नीलकण्ठचम्पूप्रारम्भे 'अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु (४७३८) । कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम् ॥' इति स्वग्रन्थनिर्माणसमयो लिखितः. अर्थात् १६३७ मिते ख्रिस्तसंवत्सरे नीलकण्ठचम्पू रचिता. तस्मात्ख्रिस्तसंवत्सरीयषोडशशतकसमाप्त्यासन्नसमये श्रीमदप्पयदीक्षित आसीदिति ज्ञायते. नीलकण्ठचम्पूप्रारम्भे 'लीलालीढपुराणसूक्तिशकलावष्टम्भसंभावनापर्यस्तश्रुतिसेतुभिः कतिपयैर्नीते कलौ सान्द्रताम् । श्रीकण्ठोऽवततार यस्य वपुषा कल्क्यात्मना वाच्युतः श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः ॥' इत्यप्पयदीक्षितप्रशंसापरं पद्यं वर्तते. अप्पयदीक्षितकृता बहवो ग्रन्थाः सन्ति, तन्मध्याद्यावधि ज्ञाता ग्रन्थास्त्वेते—(१) आत्मार्पणस्तुतिः, (२) उपक्रमपराक्रमः, (३) कुवलयानन्दः, (४) चतुर्मतसारसंग्रहः (नयमञ्जरी), (५) चन्द्रकुलास्तुतिः, (६) चित्रमीमांसा, (७) दशकुमारचरितसंक्षेपः, (८) नामसंग्रहमाला, (९) ब्रह्मतर्कस्तवः, (१०) भक्तिशतकम्, (११) भारततात्पर्यसंग्रहः, (१२) मध्वमतविध्वंसः, (१३) रत्नत्रयपरीक्षा, (१४) रसिकरञ्जनी (कुवलयानन्दटीका), (१५) रामायणसारस्तवः, (१६) वरदराजशतकम्, (१७) वादनक्षत्रमालिका, (१८) विधिरसायनसुखोपजीविनी, (१९) वीरशैवम्, (२०) वृत्तिवार्तिकम्, (२१) वैराग्यशतकम्, (२२) शब्दप्रकाशः, (२३) शारीरकन्यायरक्षामणिः, (२४) शिवकर्णामृतं सटीकम्, (२५) शिवतत्त्वविवेकः, (२६) शिवादित्यमणिदीपिका, (२७) शिवाद्वैतनिर्णयः, (२८) शिवार्चनचन्द्रिका, (२९) सिद्धान्तलेशसंग्रहः (३०) हरिवंशसारचरितम्. आचारनवनीतकर्ता अप्पयः, गौरीमायूरमाहात्म्यकर्ता अप्पादीक्षितः, शब्दरत्नावलीकर्ता अप्पासूरिः, एते त्रयोऽप्यप्पयदीक्षिताद्भिन्नाः. २. 'ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः । द्रष्टृत्वमात्मसंबन्धो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे ॥' अत एव 'दशाव्ययः' इति शिवस्य नामापि. 'कङ्कटीकजटाटीररेरिहाणदशाव्ययाः' इति शिवपर्यायेषु शब्दार्णवः.

भिक्षाप्रदा जनन्यः पितरो गुरवः कुमारकाः शिष्याः ।
एकान्तरमणहेतुः शान्तिर्दयिता विरक्तस्य ॥ ४ ॥
ये न किमपि चेष्टन्ते कार्यप्रतिकार्ययोर्विरहात् ।
सन्तस्त एव मुक्ताः संदेहे गौतमः साक्षी ॥ ५ ॥
पततु नभः स्फुटतु मही चलन्तु गिरयो मिलन्तु वारिधयः ।
अधरोत्तरमस्तु जगत्का हानिर्वीतरागस्य ॥ ६ ॥
के चोराः के पिशुनाः के रिपवः केऽपि दायादाः ।
जगदखिलं तस्य वशे यस्य वशे स्यादिदं चेतः ॥ ७ ॥
विषया उपतिष्ठन्तां विषयैर्वा समवयन्तु करणानि ।
आन्तरमेकं करणं शान्तं यदि का ततश्चिन्ता ॥ ८ ॥
किं विषयान्परिहर्तुं वस्तव्यं मेरुकंदरेष्वबुधैः ।
नह्यद्भिरनासेक्तुं धातुषु रोहन्ति पद्मानि ॥ ९ ॥
अज्ञानमिह निदानं प्राग्रूपं जननमेव भवरोगे ।
परिपाकः संसरणं भैषज्यं नैष्ठिकी शान्तिः ॥ १० ॥
स्वेनोपभुक्तमर्थं सूकरजातिस्सरो मनुष्य इव ।
दूरे जुगुप्समानो धीरो वैराग्यमाद्रियते ॥ ११ ॥
शैशवमिव कौमारे तत्तरुणिम्नीव स इव वृद्धत्वे ।
न स्वदते धीराणां कामस्य विचेष्टितं शान्तौ ॥ १२ ॥
शतशः परीक्ष्य विषयान्सद्यो जहति क्वचित्क्वचिद्धन्याः ।
काका इव वान्ताशनमन्ये तानेव सेवन्ते ॥ १३ ॥
चरमौ मातापितरौ चरमा गृहिणी सुताश्चरमाः ।
कर्तव्येऽपि प्रेमणि कथमिह धीरा विरज्यन्ते ॥ १४ ॥
तृणवद्भ्रमन्ति चपलाः स्त्रीनामनि चण्डमारुते चलति ।
धरणिधरा इव सन्तस्तत्र न किंचित्प्रकम्पन्ते ॥ १५ ॥

---

१. 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायादपवर्गः' (१।१।२) इति गौतमसूत्रम्. २. मनः.

कामिजनपरमभोग्ये कामसुखे धारयन्ति बीभत्सम् ।
सन्तः शमसुखरसिकाः सुधाशनाः सूकरान्न इव ॥ १६ ॥
विक्षेपमात्रभाजो विकासकाष्ठागतज्ञानाः ।
स्वस्यापि चेष्टितानि स्वयमीक्षन्ते परस्येव ॥ १७ ॥
अस्थानेऽभिनिविष्टान्मूर्खानस्थान एव संतुष्टान् ।
अनुवर्तन्ते धीराः पितर इव क्रीडतो बालान् ॥ १८ ॥
पुष्णति पुरुषे सलिलैर्मुष्णति पुष्पं फलं च तरव इव ।
वर्तन्ते सन्तः सममुपकर्तरि चापकर्तरि च ॥ १९ ॥
नित्यानित्यविवेकः सर्वेषां घटघटत्वयोरास्ते ।
स विवेको यः शान्तिकृदविवेकोऽन्यः समस्तोऽपि ॥ २० ॥
अनधिगते कामसुखे कालेन यथा प्रवर्तते तरुणः ।
एवं ब्रह्मसुखेऽपि प्रवर्तते कोऽपि भाग्यवशात् ॥ २१ ॥
पुत्रगुणाः स्वातन्त्र्ये दारगुणाश्चाधिवेदनावसरे[1] ।
भ्रातृगुणा दायविधौ[2] द्रष्टव्या मोक्ष्यमाणेन ॥ २२ ॥
का मे गतिरिति पृच्छति चरमश्वासेऽपि यः स्वार्थम् ।
तस्य जनस्यापि कृते पापाः पापानि कुर्वन्ति ॥ २३ ॥
पितृभिः कलहायन्ते, पुत्रानध्यापयन्ति पितृभक्तिम् ।
परदारानुपयन्तः पठन्ति शास्त्राणि दारेषु ॥ २४ ॥
शान्तिरलभ्यादुपरतिरपात्रभावः प्रतिग्रहनिवृत्तिः ।
क्षान्तिर्दुर्बलतेति च निवृत्तिधर्माः कलावेते ॥ २५ ॥
नीतिज्ञा नियतिज्ञा वेदज्ञा अपि भवन्ति शास्त्रज्ञाः ।
ब्रह्मज्ञा अपि लभ्याः स्वाज्ञानज्ञानिनो विरलाः ॥ २६ ॥
कलिकलुषे मनसि स्वे कथमिव जगदार्जवं लभते ।
चक्षुर्दोषे जाग्रति चन्द्रद्वित्वं कुतो यातु ॥ २७ ॥

---

१. तस्याः सपत्नीसंपादनावसरे. विवाहान्तरकरणकाल इति यावत्. २. विभागावसरे.

विषयाननुकूलयितुं विषयिणि हृदये विधीयतां यत्नः ।
दृशि देयमौषधं को दृश्ये दत्त्वा सुखी भवति ॥ २८ ॥

दाराः पुत्रेषु रताः पुत्राः पितृधनपरिग्रहव्यग्राः ।
रोदनशरणा जननी परलोकगतस्य को बन्धुः ॥ २९ ॥

पश्यन्ति म्रियमाणान्मरिष्यतोऽनुमिमते स्मरन्ति मृतान् ।
कथयन्ते चैवमसच्चेष्टन्ते नित्यवत्तु परम् ॥ ३० ॥

कलहायन्ते मूढाः कः प्रतिभूः श्वः प्रभात इति ।
तस्यामेव रजन्यां कः प्रतिभूः स्वस्य सत्तायाम् ॥ ३१ ॥

कुल्याः कृता विशालाः कुड्यान्युपलैर्निबद्धानि ।
क्रीता बलिनो महिषाः कृतकृत्याः स इति मन्यन्ते ॥ ३२ ॥

आ प्रपदमा शिरस्कं चान्तः कलिमलमलीमसे वपुषि ।
विफलं गङ्गाजलमपि मद्यघटे दर्भमुष्टिरिव ॥ ३३ ॥

दण्ड्यं यत्सुखहेतोः पुष्णन्ति जनाः कथं तदेव वपुः ।
नहि शर्कराभिलाषिभिरिक्षोः काण्डानि पूज्यन्ते ॥ ३४ ॥

प्रायो मुह्यति चेतः प्राणभृतः प्राणनिर्गमावसरे ।
पुण्येन यदि न मुह्यति पुत्रानेव स्मरन्म्रियते ॥ ३५ ॥

शमयितुमौदरमग्निं संसाराख्याम्बुधौ निमज्जन्ति ।
तुहिनव्यथानिवृत्त्यै नहि वेश्मनि पावको देयः ॥ ३६ ॥

आहत्य परित्यक्ता जनयन्त्यर्थाः सुखाभासम् ।
अत्यन्तपरित्यक्ताः परमानन्दाय कल्पन्ते ॥ ३७ ॥

अर्थानामधिकानां राज्ञा चौरेण वा नाशः ।
अन्ने खल्वतिभुक्ते वमनं वा स्याद्विरेको वा ॥ ३८ ॥

प्रणमति परिसान्त्वयति [प्रणि]पतति सदा परिभ्रमति ।
आविष्ट इव पिशाच्या पुरुषस्तृष्णावशं यातः ॥ ३९ ॥

जननादृष्टात्पितरौ पुत्रा जामातरोऽप्ययादृष्टात् ।
कलहादृष्टाज्ज्ञातय इति निर्णीते किमेष्टव्यम् ॥ ४० ॥

स्वपितुः परलोकाय स्वयमनुदिवसं यदाचरति ।
क्रियतामिदमुपमानं किं नालं पुत्रवैराग्ये ॥ ४१ ॥
अननुगते दारिद्र्ये किमनुगतं लक्षणं दृष्टम् ।
कामस्यापूर्तिर्यदि कृपणं जगदा चतुर्वदनात् ॥ ४२ ॥
न खलु धनत्वं जातिर्यस्य यदिष्टं तदेव तस्य धनम् ।
तत्तदिव पामराणामाकिंचन्यं धनं विदुषाम् ॥ ४३ ॥
स्वीक्रियते यदि तृष्णा स्वीकर्तव्यं जगत्समस्तमपि ।
स्वीक्रियते यदि शान्तिः स्वात्मापि स्वस्य भवति न वा ॥ ४४ ॥
यद्दातारं वशयति यत्परिजनमस्य सान्त्वयति ।
यदपत्रपते नान्तर्भावालाभः स कस्य समः ॥ ४५ ॥
प्रादेशमात्रमुदरं परिपूरयितुं कियानयं यत्नः ।
चुलकेनाम्भः पातुं खनितव्यः किं तटाकोऽपि ॥ ४६ ॥
यामार्धमसंस्काराद्यामद्वयमनशनाच्च सुव्यक्ते ।
शारीरे सौन्दर्येऽप्यभिनिविशन्ते कियन्मूढाः ॥ ४७ ॥
वन्ध्येत्याहुस्तरुणीं जरतीति परित्यजन्ति बहुपुत्राम् ।
अभिनिन्दत्यल्पसुतां का गृहिणी कामिनो हृद्या ॥ ४८ ॥
यान्ति शुचमकृतदारा द्वे भार्ये नेति कृतदाराः ।
ते परदारा नेति स्त्रीभिस्तृप्तान्न पश्यामः ॥ ४९ ॥
मदनस्याज्ञाकरणे मन्ये जगदखिलमेकरूपमिदम् ।
तिर्यञ्च इति नरा इति देवा इत्यन्यतो भेदः ॥ ५० ॥
शुक्रविमोकस्थानं मलमूत्रत्यागदेशवत्किमपि ।
स्त्रिय इति विहितं विधिना कियदत्र जना निमज्जन्ति ॥ ५१ ॥
वेदानधीत्य विधिवन्मीमांसित्वा तदर्थं च ।
दाराः कर्तव्या इति केनेदं प्रहसनं कथितम् ॥ ५२ ॥
दुःखेनोपार्ज्यन्ते पाल्यन्ते प्रत्यहं च लाल्यन्ते ।
वामाः स्त्रियो विमूढैरुपभुज्ञानाः सुखं विगुणम् ॥ ५३ ॥

अश्नीत पिबत खादत जाग्रत संविशत तिष्ठत वा ।
सकृदपि चिन्तयताह्नः सावधिको देहबन्ध इति ॥ ५४ ॥
किं विजितया पृथिव्या किं काञ्चनभूभृता करस्थेन ।
किं दिव्याभिः स्त्रीभिर्मर्तव्ये ब्रह्मणा लिखिते ॥ ५५ ॥
जीवति कतिचिन्निमिषान्कतिचित्तेषु श्रुतीरधीत इव ।
तावत्सैवाकुलयति तन्त्राणि नवानि चातनुते ॥ ५६ ॥
स्वल्पो जीवनकालः स्वल्पा धीः परिचयः स्वल्पः ।
तदपि तरेम कथंचिच्छ्रुतयो यदि नोपजायन्ते ॥ ५७ ॥
कुत आगतं न जाने क्व नु वा गन्तव्यमिदमपि न जाने ।
संचरसि क्वेदानीं संसारपथे महातमसि ॥ ५८ ॥
तमसावृताश्चरन्तः सविधे दूरे च नावयन्त्यर्थान् ।
अवयन्ति तु विस्पष्टं तडिताभिहते शिरसि मूढाः ॥ ५९ ॥
निमिषन्त्यत्र तरुण्यस्तत्र तरुण्यो न निमिषन्ति ।
ईदृक्षो हि विशेषः स्वर्गः स्वर्ग इति किं तत्र ॥ ६० ॥
कोपो मै[1]त्रावरुणेः शापो वा ता[2]र्किकस्य मुनेः ।
संसर्यते यदि सकृच्छत्रोरपि मास्तु शक्रपदम् ॥ ६१ ॥
गच्छत्वमरावत्यां गच्छतु चतुराननस्य वा नगरे ।
पुनरागन्तव्यं यदि पुंसा किं साधितं भवति ॥ ६२ ॥
भुक्ता बहवो दारा लब्धाः पुत्राश्च पौत्राश्च ।
नीतं शतमप्यायुः सत्यं वद मर्तुमस्ति मनः ॥ ६३ ॥
विश्लेषणस्वभावान्पश्यन्विषयान्करोति को ममताम् ।
नश्यदवस्थापन्नं कः क्रीणीते धनैरश्वम् ॥ ६४ ॥
अन्नाभावे मृत्युः शालिभिरन्नानि शालयो वृष्ट्या ।
वृष्टिस्तपसेति वदन्नमृत्यवे तत्तपश्चरतु ॥ ६५ ॥
किं न निगृह्णन्ति मनः किं न भजन्ते जनाः शिवं शरणम् ।
अभिसंधिभेदमात्रान्मोक्षोपायेन बध्यन्ते ॥ ६६ ॥

---

१. अगस्त्यस्य. २. गौतमस्य.

भोगाय पामराणां योगाय विवेकिनां शरीरमिदम् ।
भोगाय च योगाय च न कल्पते दुर्विदग्धानाम् ॥ ६७ ॥

ब्राह्मणचण्डाला इत्याह मुनिर्यन्महापथिकान् ।
भवमार्गमहापथिकानधिकृत्यैव प्रवर्तितं चैतत् ॥ ६८ ॥

एकद्वाः क्षितिपतिषु द्वित्रा देवेषु पञ्चषा द्रुहिणे ।
एतावन्तो जगति ब्रह्मानन्दार्णवस्य कणाः ॥ ६९ ॥

अज्ञानेनापिहिते विज्ञाने कर्म किं कुरुते ।
विकले चक्षुषि तमसा व्यादाय मुखं किमीक्षेत ॥ ७० ॥

अतिकलुषमाशुनश्वरमापातस्फुरणमनभिलाषकरम् ।
अपि हृष्यन्ति जनाः कथमवलम्ब्य ज्ञानखद्योतम् ॥ ७१ ॥

अयुतं नियुतं वापि प्रदिशन्तु प्राकृताय भोगाय ।
क्रीणन्ति न बिल्वदलैः कैवल्यं पञ्चषैर्मूढाः ॥ ७२ ॥

यावत्किल चेष्टन्ते तावत्पाशे निबध्यते ग्रन्थिः ।
निभृतं यदि वर्तन्ते कालेन स्रंसते पाशः ॥ ७३ ॥

उपरुन्धन्ति श्वासान्मुनयो नाश्नन्ति न पिबन्ति ।
स्तूयन्ते सुजनैः किं कण्ठे कुर्वन्ति कनकपाशमिमे ॥ ७४ ॥

कामं जनाः स्मयन्ते कैलासविलासवर्णनावसरे ।
साधनकथनावसरे साचीकुर्वन्ति वक्त्राणि ॥ ७५ ॥

वङ्गाः कथमङ्गाः कथमित्यनुयुङ्क्ते वृथा देशान् ।
कीदृक्कृतान्तपुरमिति कोऽपि न जिज्ञासते लोकः ॥ ७६ ॥

त्यक्तव्यो ममकारस्त्यक्तुं यदि शक्यते नासौ ।
कर्तव्यो ममकारः किं तु स सर्वत्र कर्तव्यः ॥ ७७ ॥

पुत्रा इति दारा इति पोष्यान्मूर्खो जनान्ब्रूते ।
अन्धे तमसि निमज्जन्नात्मा पोष्य इति नावैति ॥ ७८ ॥

यच्चिन्तितमधिगर्भे यच्च चिरं चिन्तितं नरके ।
विषयानिलसंसर्गान्ममृजे तत्सर्वमेकपदे ॥ ७९ ॥

बाह्यगतागतशीला प्राणस्य श्वासलक्षणा वृत्तिः ।
कर्षति मनसो वृत्तिं कुलटेव कुलस्त्रियं मुग्धाम् ॥ ८० ॥
अतिगम्भीरमनाविलमक्षोभ्यमदृष्टपारमविलङ्घ्यम् ।
अविरलतरङ्गसंकुलमैक्षिषि विज्ञानसागरं महताम् ॥ ८१ ॥
घोरं भवमपहातुं केचिदघोरं प्रपद्यन्ते ।
संसरणकातराणां संशरणं शांभवी शक्तिः ॥ ८२ ॥
पाशो यदि मोक्तव्यः पशुपतिरेवोपसर्तव्यः ।
न खलु व्यतिमुच्यन्ते पशवः पाशेन संबद्धाः ॥ ८३ ॥
अलमलमनुभूताभिर्मातृभिरलमस्तु पितृभिश्च ।
भवितव्यं यदि नित्यवदर्थे मातुः पितुश्चास्तु ॥ ८४ ॥
धन्यास्ते बहुदेवाः स्वामिनि येषां न दुर्भिक्षम् ।
जातु न जानीमो वयमेकं तं स्वामिनं पूर्णम् ॥ ८५ ॥
सन्तु बृहन्तो देवाः किं तु न तान्नन्तुमीहते चेतः ।
आढ्यवदान्यन्यायादन्तकजितमेव चिन्तये मनसि ॥ ८६ ॥
निध्यायसि विषयसुखं न ध्यायसि विषममस्य परिपाकम् ।
बन्धुं तमेव चिन्तय बद्धुं मोक्तुं च यः क्षमते ॥ ८७ ॥
सदनं गुरूपसदनं शरणं पञ्चाक्षरीपुरश्चरणम् ।
धनमभिलाषनिरोधनमन्त्याश्रमवर्तिनां पुंसाम् ॥ ८८ ॥
कौ पितरौ कः पुत्रः कः स्वामी यः प्रपञ्चस्य ।
प्रत्यस्तमिते भेदे किमिदं किमिदमिति विप्रश्नः ॥ ८९ ॥
स विधिर्यत्ते विदधति स प्रतिषेधो यतो निवर्तन्ते ।
सोपनिषद्यद्ब्रुवते शैवाश्रमवर्तिनो धीराः ॥ ९० ॥
त्यज संसारमसारं भज शरणं पार्वतीरमणम् ।
विश्वसिहि श्रुतिशिखरं विश्वमिदं तव निदेशकरम् ॥ ९१ ॥
भव्यमभव्यं वा नः प्रलिखतु वेधाः सुदुर्मेधाः ।
सव्यमसव्यं वा नः शरणं चरणं महेशस्य ॥ ९२ ॥

वेधाः कथं हरिः कथमिति तु प्रश्ने वयं मूकाः ।
शिवमेकं जानीमो न शिवादन्यं विजानीमः ॥ ९३ ॥
दारुणमसिपत्रवनं दारुणतममन्धतामिस्रम् ।
का वा ततः क्षतिर्नः शैवा वयमा चतुर्वदनात् ॥ ९४ ॥
कृतदीक्षो घोरमखे कुलकूटस्थो भरद्वाजः ।
विद्येश्वरेषु कश्चन पितामहो न इति विस्रम्भः ॥ ९५ ॥
कलहः कदापि मास्त्विति कलितशरीरैक्ययोः शिवयोः ।
अहमस्म्यहमस्मीति प्राप्तः कलहो मम त्राणे ॥ ९६ ॥
नरकायापि न भोगान्नराधमायापि नान्यसुरान् ।
मन्यन्ते कतिचिदमी माहेश्वरमाश्रिता योगम् ॥ ९७ ॥
ज्ञातुं हातुं विषयं श्रोतुं मन्तुं गृहीतुमात्मानम् ।
वत्सा यदि न हि घटते तत्साधयताविमुक्ताय ॥ ९८ ॥
सांख्यं योगं निगमा भक्तिः कर्म प्रतीतिरिति ।
एकत्र सकलमेतत्केवलमविमुक्तमेकत्र ॥ ९९ ॥
बद्धः कस्ते वक्ष्यति मुक्तो मुक्तिं विजानाति ।
यास्यसि चेदविमुक्तं ज्ञास्यसि विश्वेश्वरस्य मुखात् ॥ १०० ॥
न गृहीतं श्रुतिहृदयं न चन गृहीतं परिप्लवं हृदयम् ।
इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरीम् ॥ १०१ ॥

इति श्रीमदप्पयदीक्षितविरचितं वैराग्यशतकं संपूर्णम् ।

पण्डितराजश्रीजगन्नाथकृता

अमृतलहरिः[1] ।

मातः पातकपातकारिणि तव प्रातः प्रयातस्तटं
यः कालिन्दि महेन्द्रनीलपटलस्निग्धां तनुं वीक्षते ।
तस्यारोहति किं न धन्यजनुषः स्वान्तं नितान्तोल्लस-
न्नीलाम्भोधरवृन्दवन्दितरुचिर्देवो रमावल्लभः ॥ १ ॥

---

१. यमुनास्तुतिरूपोऽयं ग्रन्थः.

नित्यं पातकभङ्गमङ्गलजुषां श्रीकण्ठकण्ठत्विषां
तोयानां यमुने तव स्तवविधौ को याति वाचालताम् ।
येषु द्राग्विनिमज्ज्य सज्जतितरां रम्भाकराम्भोरुह-
स्फूर्जच्चामरवीजितामरपदं जेतुं वराको नरः ॥ २ ॥
दानान्धीकृतगन्धसिन्धुरघटागण्डप्रणालीमिल-
द्भृङ्गालीमुखरीकृताय नृपतिद्वाराय बद्धोऽञ्जलिः ।
त्वत्कूले फलमूलशालिनि मम श्लाघ्यामुरीकुर्वतो
वृत्तिं हन्त मुनेः प्रयान्तु यमुने वीतज्वरा वासराः ॥ ३ ॥
अन्तर्मौक्तिकपुञ्जमञ्जिम[1] बहिः स्निग्धेन्द्रनीलप्रभं
मातर्मे मुदमातनोतु करुणावत्या भवत्याः पयः ।
यद्रूपद्वयधारणादिव नृणामा चूडमामज्जतां
तत्कालं तनुतेतरां हरिहराकारामुदारां तनुम् ॥ ४ ॥
तावत्पापकदम्बडम्बरमिदं तावत्कृतान्ताद्भयं
तावन्मानसपद्मसद्मनि भवभ्रान्तेर्महानुत्सवः ।
यावल्लोचनयोः प्रयाति न मनागम्भोजिनीबन्धुजे
नृत्यत्तुङ्गतरङ्गभङ्गिरुचिरो वारां प्रवाहस्तव ॥ ५ ॥
कालिन्दीति कदापि कौतुकवशात्त्वन्नामवर्णानिमा-
न्व्यस्तानालपतां नृणां यदि करे खेलन्ति संसिद्धयः ।
अन्तर्ध्वान्तकुलान्तकारिणि तव क्षिप्तामृते वारिणि
स्नातानां पुनरन्वहं स महिमा केनाधुना वर्ण्यते ॥ ६ ॥
स्वर्णस्तेयपरानपेयरसिकान्पाथःकणास्ते यदि
ब्रह्मघ्नान्गुरुतल्पगानपि परित्रातुं गृहीतव्रताः ।
प्रायश्चित्तकुलैरलं तदधुना मातः परेताधिप-
प्रौढाहंकृतिहारिहुंकृतिमुचामग्रे तव स्रोतसाम् ॥ ७ ॥
पायं पायमपायहारि जननि स्वादु त्वदीयं पयो
नायं नायमनायनीमकृतिनां[2] मूर्तिं दृशोः कैशवीम् ।

१. मौक्तिकसमूहवन्मञ्जुलम्. अतिशुभ्रमित्यर्थः. २. अकृतिनां पापिनामनायनीम्-

सारं सारमपारपुण्यविभवं कृष्णेति वर्णद्वयं
चारं चारमितस्ततस्तव तटे मुक्तो भवेयं कदा ॥ ८ ॥
मातर्वारिणि पापहारिणि तव प्राणप्रयाणोत्सवं
संप्राप्तेन कृतां नरेण सहतेऽवज्ञां कृतान्तोऽपि यत् ।
यद्वा मण्डलभेदनादुदयिनीश्चण्डद्युतिर्वेदना-
श्चित्रं तत्र किमप्रमेयमहिमा प्रेमा [1]यदौत्पत्तिकः ॥ ९ ॥
संज्ञाकान्तसुते कृतान्तभगिनि श्रीकृष्णनित्यप्रिये
पापोन्मूलिनि पुण्यधात्रि यमुने कालिन्दि तुभ्यं नमः ।
एवं स्नानविधौ पठन्ति खलु ये नित्यं गृहीतव्रता-
स्ता[2]नामन्त्रितसंख्यजन्मजनितं पापं क्षणादुज्झति ॥ १० ॥
अयं पण्डितराजेन श्रीजगन्नाथशर्मणा ।
स्तवः कलिन्दनन्दिन्या निर्मलो निरमीयत ॥ ११ ॥

इति पण्डितराजश्रीजगन्नाथकृतामृतलहरिः समाप्ता ।

---

[3]महाकविश्रीरत्नाकरविरचिता
वक्रोक्तिपञ्चाशिका ।

[4]वल्लभदेवकृतया पञ्चिकया समेता ।

वागीश्वरीं नमस्कृत्य गणानां च तथेश्वरम् ।
वक्रोक्तिवर्णने रात्ने पञ्चिका क्रियते लघुः ॥

नयनविषयाम्. परोक्षामित्यर्थः. केशवीं मूर्तिं दृशोर्गोचरे नायं नायं नीत्वा नीत्वा.

१. यमुनाया यमो भ्राता, सूर्यश्च पिता. तस्मात्ताववज्ञां पीडां च सहेते. २. आमन्त्रितानि 'संज्ञाकान्तसुते' इत्यादीनि संबोधनपदानि. तत्संख्यजन्मजनितम्. सप्तजन्मकृतमिति यावत्. संज्ञा सूर्यस्य पत्नी. ३. अयं रत्नाकरमहाकविः कश्मीरदेशेऽवन्तिवर्मणो राज्यकाले समुत्पन्नः. 'मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः । प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः ॥' इति राजतरङ्गिणी (५।३९). अवन्तिवर्मराज्यकालस्तु ८५५ मितात्खिस्तसंवत्सरादारभ्य ८८४ पर्यन्तमासीत्. रत्नाकरप्रणीतं हरविजयाभिधं पञ्चाशत्सर्गात्मकं महाकाव्यं कश्मीरेषु प्रसिद्धमस्ति. ४. मल्लिनाथाद्बहुतरप्राचीनो वल्लभदेवस्तु खिस्तसंवत्सरीयदशमशतकस्य पूर्वार्धे बभूव. यत एतत्पौत्रेण चन्द्रादित्यपुत्रेण कय्यटेनानन्दवर्धनकृतदेवीशतकस्य टीकायां समाप्तौ 'वल्लभदेवायनितश्चन्द्रादित्यादवाप्य जन्मेमाम् । कय्यटनामारचयद्विवृतिं दे-

सव्यालम्बनमेतदद्य भवतो निःस्नेह मुञ्चाम्यहं
सव्यालं विजहीहि सुन्दरि वनं निःस्नेहता नास्ति मे ।
मैवं वक्ष्यसि किं वनं ननु जलं मूर्ध्ना मयैवोह्यते
वक्रोक्त्येति हिमाद्रिजामवचसं कुर्वन्हरः पातु वः ॥ १ ॥

सव्यालम्बनं वामभागावस्थानम्, सव्यालं व्यालैर्दुष्टसत्त्वैः सहितं वनं च। दन्त्यौष्ठ्ययोर्हि शब्दालंकारेषु यमकवक्रोक्त्यादिषु न तथा कवयो भेदग्राहिणः । मैवम् । कुटिल कस्य वनविवक्षेत्यर्थः । वक्ष्यसि कथयिष्यसि, धारयिष्यसि च । 'वह प्रापणे' धातोः । वनं काननम्, जलं च। अवचसं जित्वा निर्वचनाम् ॥

त्वं हालाहलभृत्करोषि मनसो मूर्छां ममालिङ्गितो
हालां नैव बिभर्मि नैव च हलं मुग्धे कथं हालिकः ।
सत्यं हालिकतैव ते समुचिता सक्तस्य गोवाहने
वक्रोक्त्येति जितो हिमाद्रिसुतया स्मेरो हरः पातु वः ॥ २ ॥

हालाहलं विषविशेषम्, हालां सुराम्, हलं सीरं च । आलिङ्गितस्त्वं मम मनसो मूर्छां करोषीति संबन्धः । गौरेव वाहनं गोवाहनम्, गोश्च वृषभस्य वाहनं प्रेरणम् । हलं वहतीति हालिकश्च । 'हलसीराट्ठक्' । स्मेरः सहासः ॥

त्वं मे नाभिमतो भवामि सुतनु श्वश्र्वा अवश्यं मतः
साधूक्तं भवता न मे रुचित इत्यत्र ब्रुवेऽहं पुनः ।
मुग्धे नासि नमेरुणा ननु चितः प्रेक्षस्व मां पातु वो
वक्रोक्त्येति हरो हिमाचलभुवं स्मेराननां मूकयन् ॥ ३ ॥

मे नाभिमतो मे मम नाभिमतो न रुचितः, मेनायाश्च निजश्वश्र्वाभिमतः । मेना हिमाचलस्त्री । न मे रुचितो न मे मम रुचितोऽभिमतः, नमेरुणा वन्यफलविशेषेण च चितो व्याप्तः ॥

वीशतकस्तोत्रे ॥ वसुमुनिगगनोदधि(४०७८)समकाले याते कलेस्तथालोके । द्वापञ्चाशे वर्षे रचितेयं भीमगुप्तनृपे ॥' इत्यलेखि. भीमगुप्तश्च ९७५ मितखिस्तसंवत्सरादारभ्य सपादं वर्षचतुष्टयं कश्मीरान्बुभोज. कश्मीरदेशप्रसिद्धो लोकाब्दश्च तदानीं द्विपञ्चाशन्मित आसीदित्यर्थः. लोकाब्दश्च सदा शतसंख्यातो न्यून एव तिष्ठति. वल्लभदेवकृता रघुवंश-कुमारसंभव-मेघदूत-शिशुपालवध-सूर्यशतकादिटीकाः समुपलभ्यन्ते. देवीशतकस्यापि संक्षिप्तं टिप्पणं वल्लभदेवेन कृतम्. सुभाषितावलीसंग्रहकर्ता वल्लभदेवस्त्वन्यः. स च खिस्तसंवत्सरीयपञ्चदशशतकपूर्वार्धतो न प्राचीनः.

नो संध्याहितमत्सरा तव तनौ वत्स्याम्यहं संधिना
न प्रीतासि वरोरु चेत्कथय तत्प्रस्तौमि किं विग्रहम् ।
कार्यं तेन न किंचिदस्ति शठ मे वीनां ग्रहणेति वो
दिश्याद्वः प्रतिबद्धकेलिशिवयोः श्रेयांसि वक्रोक्तयः ॥ ४ ॥

संध्याया दिनरात्र्यो रात्रिदिनयोश्च मध्यस्थायाः पितृप्रस्वाः, संधिना संयोगेन चाहितो ममत्सरो यस्याः सा संध्याहितमत्सरा । विग्रहो विरोधः, वीनां पक्षिणां च ग्रहो ग्रहणम् । शिवश्च शिवा च शिवौ । एकशेषः । तयोः शिवयोः ॥

न त्वं संप्रतिभासि वातरशनस्त्यक्ता त्वया किं त्रपा
मुग्धे संभविनी न वातरशना को मेखलाया विभो ।
संबन्धोऽत्र किमेतदाह भवती स्यात्ते खलत्वं कुतः
श्रेयांसीति करोतु वः प्रियतमां सूक्त्या हरो हासयन् ॥ ५ ॥

वाता गता रशना यस्य, वातरशनो दिगम्बरः । वातो वायुश्च रशना मेखला यस्य । मेखलाया रशनायाः, मे मम च खलाया दुष्टायाः । हासयन्सहासां कुर्वन् ॥

नासूयाम्यहमस्थिराजय इह त्वद्देहभागे कथं
मुग्धे संयुगभग्नदानवगणा नैव स्थिरा त्वं जये ।
मूढेनेव जया वदेति भवताकस्मात्किमामन्त्र्यते
वक्रोक्त्येति पुनातु वो गिरिभुवा मूकीकृतः शंकरः ॥ ६ ॥

असूयाम्युद्विजे । अस्थिराजयेऽस्थ्नां कीकसानां राजिः पङ्क्तिस्तस्यै कीकसश्रेणये, पदभङ्गे, जये जयविषयेऽस्थिरा चटुला च । हे मुग्धे रणभग्नदैत्यगणा त्वं जयेऽनभिभवे नैव स्थिरा । काक्वा स्थिरैवासीत्यर्थः । जये जयाभिधाने, प्रतीहारिणि च । अत एव त्वया मूढेनेव त्वं वदेति जया जयाभिधा प्रतीहार्यकस्मादेव निर्हेतु किमामन्त्र्यते किमाहूयते । इति गिरिभुवा पार्वत्या वक्रोक्त्या मूकीकृतो निर्वचनीकृतः ॥

सालंकारतया त्वया मम कथं नेन्दोः कला दृश्यते
पश्यामीन्दुकलां स्फुटं पुनरिदं लङ्कारता नास्मि यत् ।
नो भूषाविषयं मयोदितमिदं स्वामिन्क भूः क्वाप्युषा
दिश्याददिसुतानृजूक्तिविजितः शूली स वः संपदः ॥ ७ ॥

सा प्रसिद्धालंकारतया भूषणत्वेन, लङ्कायां च रावणपुर्यां रतया सक्तया । भूषालंकारः । वक्रोक्तौ तु भश्च भूमिश्च, उषा बाणसुता च भूषा तद्विषयम् ॥

कोपं संप्रति मुञ्च देवि विनते मय्येष बद्धोऽञ्जलि-
नैवाहं विनता निरागसममुं बध्नासि किं न्वञ्जलिम् ।
मुग्धे नोक्तमिदं मया स्फुटमिदं त्वं मुग्ध इत्थं ब्रुव-
न्सूक्त्या शैलभुवा विनिर्जित इति त्र्यक्षः शिवायास्तु नः ॥ ८ ॥

विनते प्रह्वे मयि, विनता गरुडमाता च तस्या आमन्त्रणं हे विनते । मुग्धे इत्यामन्त्रणं हे मुग्धे, नेति निषेधे मया नोक्तमिदम् । वक्रोक्तौ तु मुग्धेनेति तृतीया । मुग्धेन मूढेन ॥

द्वीपिन्यत्र तवेश मूर्धनि न मे जाताधुना निर्वृति-
र्यो मूर्धा दयिते कथं स भवति द्वीपीति नावैषि किम् ।
स्यान्नावा स्थल एव ता यदिह किं कार्यं ययैमीति वो
दिश्यान्मङ्गलमद्रिजानृजुगिरा स्मेरः स्मरारिर्जितः ॥ ९ ॥

द्वीपिनी नदी गङ्गा । 'स्रोतस्वती द्वीपवती' इत्यमरः । वक्रोक्तौ तु गङ्गाधारणाद्द्विधा गता आपो यत्र स द्वीपी मूर्धा, द्वीपी शार्दूलश्च । 'शार्दूलद्वीपिनौ' इत्यमरः । निर्वृतिः सुखम् । नावैषि न जानासि । नावा च तरण्या एष्यागच्छसि । यया नावा एम्यागच्छामि । अद्रिजया पार्वत्या । अनृजुगिरा वक्रोक्त्या जितः । स्मेरः सहासः ॥

द्युते मां प्रति देव कीदृशमिहाकार्षीः पणं देवकी-
दृष्टा किं क्रियतेऽत्र नाभिहितवत्यस्मीति किं भाषसे ।
स्यात्किं सुन्दरि नाभये वद हितं यत्तेऽस्ति गौरीमिति
त्र्यक्षः स्मेरमुखीं जयन्कुटिलया वाचास्तु वः श्रेयसे ॥ १० ॥

देव कीदृशमिति हे देव कीदृशं कथंभूतम्, देवक्याश्च श्रीकृष्णमातुर्दृशं दृष्टिम् । नाभिहितवती नोक्तवती, नाभये च हितवत्यनुकूला ॥

त्वामालिङ्गितुमादृतं बहुभुजं जानामि धन्यं चिरा-
दात्मानं दयिते किमेष बहुभुक्तन्वीति मैवाभिधाः ।
ख्यातैवास्ति यतो ममानशनता सत्यं न नश्यत्यसा-
वाधेयादिति नः शिवं गिरिसुतासूक्त्या शशाङ्की जितः ॥ ११ ॥

बहुभुजं सहस्रबाहुम्, बहु भुनक्तीति बहुभुक्तं प्रभूताशिनं च । एषोऽहं हे तन्वि इति मैवाभिधाः । अनशनता नाशनं भोजनं यस्य सोऽनशनः, न नशनं नाशो यस्यासावनशनस्तद्भावोऽनशनता । आधेयात्क्रियात् । सूक्तिः सुभाषितोक्तिः । वक्रोक्तिरित्यर्थः ॥

अस्मिन्सानुमति प्रिये न रमसे कस्मान्मुधा खेदिनी
नाहं सानुमती प्रिया सुभग ते येनेत्थमामन्त्रिता ।
सज्जानास्यभिभाषितुं सुवदने सज्जा स्थितैवास्मि ते
वक्तुं पृच्छ यदीच्छसीति विजितो गौर्यावताद्वो हरः ॥ १२ ॥

मुधा व्यर्थं खेदिनी सानुमति पर्वते । परत्र हे सानुमति । सानुमती नामाप्सराः । सत्साधु जानासि वेत्सि । वक्रोक्तौ तु सज्जा सावधाना नासि न भवसि । वक्तुं सज्जा सावधानैवास्मि यदि त्वं पृच्छसीति गौर्या विजितः ॥

इष्टा गौरवशालिनी त्वमधिकं तन्वङ्गि मे सर्वदा
नेष्टाहं शठ गौः कदाचिदवशा नैवालिनी च क्वचित् ।
वक्रोक्तौ तव जृम्भते कुशलता स्याद्दर्भवल्ल्यात्र किं
देव्या वोऽनृजुवाक्यनिर्जित इति त्र्यक्षः क्षिणोतु द्विषः ॥ १३ ॥

गौरवशालिनी बहुमानश्लाघिनी । परत्र । गौः, अवशा, अलिनी च । अलिनी भ्रमरी । कुशलता कौशलम्, कुशानां च लता वल्ली । अनृजुवाक्येन वक्रोक्त्या विजितः । क्षिणोतु क्षपयतु ॥

नो दीव्यामि सहामुनाहमधुना द्यूते प्रवीणो हरः
सत्यं देवि हरोऽस्मि नैव तु पुनर्वीणा प्रकृष्टास्ति मे ।
केनागादि तवेदृशं शिरसि मे नास्त्येव नागादि भोः
पार्वत्येति हतोत्तरो हरतु वः सूक्त्या विभुः कल्मषम् ॥ १४ ॥

अधुनामुना शंभुना सह नो दीव्यामीति सखीं प्रति पार्वत्युक्तिः । अत्र हेतुमाह— द्यूत इत्यादि । प्रवीणः कुशलः, प्रकृष्टवीणश्च । हरः शिवः, हर्ता च पणम् । अगादि कथितम् । 'गद व्यक्तायां वाचि' । वक्रोक्तौ तु के शिरसि नागादि नागः सर्प आदिर्यस्य तन्नागादि मे नास्त्येव । भोः शंभो ॥

नो शक्तासि पतत्रिमार्गमधुना मूर्धानमेतं तव
द्रष्टुं नैव पतत्रिणां प्रियतमे मार्गोऽस्ति मूर्धा क्वचित् ।
नन्वेतद्विगलत्सुरापगमहं द्वेष्मि प्रिये नो सुरा-
नद्यस्मिन्गलतीति वक्रमुदितं देव्या विभोः पातु वः ॥ १५ ॥

पतत्रिमार्गं पतन्ती त्रिमार्गा गङ्गा यस्मात्तं वहद्गङ्गम्, पतत्रिणां पक्षिणां मार्गं पन्थानं च । ननु निश्चये । अहमेतत्त्वच्छिरो विगलत्सुरापगं गलद्गङ्गं द्वेष्मीति

पार्वत्युक्तिः। सुराणां देवानामापगा नदी गङ्गा। वक्रोक्तौ तु सुराया हालायाश्चापगा नदी सुरापगा॥

उच्चैः किं न दधास्युषाकरकृते केशग्रहे त्वं शिरो
मुग्धे नात्र कृतः कचग्रह उषाहस्तेन मे कुत्रचित्।
सोमं वच्मि शठ त्वया विरहितः सोमोऽसि नेत्यन्यथा
मा ब्रूहीति हतोत्तरामगभुवं कुर्वन्हरः पातु वः॥ १६॥

उच्चैरित्यादि पार्वत्युक्तिः। उषाकरकृत उषां रात्रिं करोतीत्युषाकरश्चन्द्रस्तेन कृते केशग्रह उच्चैरुन्नतं शिरः किं न दधासीत्युपहासः। वक्रोक्तौ तु। उषायाश्च बाणदुहितुः करो हस्तः। हे शठ सोमं वच्मि। वक्रोक्तौ तु सोमम्, उमासहितं च। त्वया विरहितो वियुक्तोऽहमेव सोमः। सहोमया वर्तते योऽसौ सोमः। सोमो नास्मीत्यन्यथा मा ब्रवीः। त्वया युक्त एव सोमोऽस्मीति। शठेति मा वदेत्यर्थः॥

जेतुं नाथ न वक्रतावहितया शक्यो गिरा त्वं मया
प्रत्यग्रः सुतनु क्रतुः कथय को यत्राहितत्वं तव।
किं तत्स्यादहितत्त्वमत्र दयिते नागेश्वरः पृच्छ्यता-
मित्यव्यात्कुटिलोक्तिनिर्जितहिमक्ष्माभृत्सुतो वः शिवः॥ १७॥

वक्रतावहितया वक्रतायां वक्रोक्ताववहितया सावधानया मया न त्वं जेतुं शक्यः। परत्र। नवक्रतौ नवयज्ञेऽहितया विपक्षभूतया। अहितत्वमहितस्य भावोऽहितत्वम्, अहीनां सर्पाणां तत्वमहितत्त्वम्। अत्राहितत्त्वमित्यस्याहितत्त्वार्थे व्यञ्जनद्वयभावेऽपि न दोषः। हलः परस्यैकस्य व्यञ्जनत्वाद्द्वयोर्वा यमकचित्रवक्रोक्त्यादौ विशेषभावस्मृतेः। यथा 'शुक्ले शुक्लेशनाशम्' इत्यादौ 'शुक्ले शुक्ले' इति यमके सति शुक्ले शुक्लगुणयुक्ते शुचः क्लेशस्य च नाशं शुक्लेशनाशं दिशतीत्यर्थः संपद्यते। यदुक्तम्—'यमकश्लेषचित्रेषु दन्त्योष्ठवबकारयोः। न भेदो रलयोश्चैव न नकारमकारयोः॥ हलः परस्य चैकस्य व्यञ्जनस्य द्वयोरपि। न विशेषो विसर्गस्य भवेच्च सदसत्त्वयोः॥' इति॥

खिन्नाहं बहुनागसा तव विभो गङ्गानुबद्धस्थिते-
र्नागस्त्वय्यपि मे नताङ्गि मयि ते नागोऽस्ति नो कुत्रचित्।
सुभ्रूर्नाहमिति ब्रवीम्यवितथं ना त्वं यतोऽनुत्तम-
स्त्रासीष्टेत्यनृजूक्तिहासितहरानिष्टाद्भवानी जगत्॥ १८॥

बहुनागसापराधेन। 'आगोऽपराधो मन्तुश्च' इत्यमरः। परत्र बहवो नागा यस्य बहुनाग इत्यामन्त्रणम्। सा गौरीपरामर्शः। साहं बहु खिन्नेत्यन्वयः। अत्र हेतुमाह—गङ्गेत्यादि। मे नागः सर्पस्त्वय्यपि नो। काका त्वय्यपीत्यर्थः। ते नागः सर्पो मय्यपीति

गी । काका अपि त्वस्तीति । अथ च । न नो आगोऽस्ति नापराधोऽस्ति । अपि त्व-
त्तीति । हे सुभ्रूः, अवितथं सत्यं नाहं ब्रुवे । काका अपि तु सत्यं ब्रुवे । अपरत्राविद्यमान
त्तमो यस्मात्स तादृशोऽनुत्तमो ना पुरुषः । परमपुरुष इत्यर्थः ॥

संध्यायामिह सन्नताङ्गि भवती कस्मान्मुधा खेदिनी
साधु ध्यायसि कां हसन्कुटिलता नाङ्गेषु मे कुत्रचित् ।
हन्ताहं भवतीं न किंचिदथवा वामस्वभावां ब्रुवे
मां हन्तासि किमर्थमित्यभिहितो देव्या हरः पातु वः ॥ १९ ॥

इहासां संध्यायां प्रेयसीति भ्रान्त्या संनताङ्गि कस्मान्निरर्थकं खेदिनी । अपरत्र हे
नताङ्गि, हसन्स्मयन्नहं संध्यायामि सम्यक्चिन्तयामि । संशब्दस्य सम्यगर्थः । नतता
कौटिल्यम् । हन्त इति खेदे । वक्रोक्तौ तु हन्ताहम् ॥

संसक्तो बहुलक्षपाटनविधौ किं त्वं श्मशानेऽधुना
पात्यन्ते न मया बहूनि दयिते लक्षाणि ते कुत्रचित् ।
सूक्तौ ते कृतपुङ्खता कथय किं पुङ्खेन तस्यां भवे-
दित्यद्रीन्द्रसुतां गिरा शशिकलामौलिर्जयन्पातु नः ॥ २० ॥

बहुलक्षपाटनविधौ बहुलक्षपायां कृष्णपक्षनिशायामटनविधौ भ्रमणे । अपरत्र
बहूनां लक्षाणां शरव्यानां पाटने भेदे । 'लक्षं लक्ष्यं शरव्यं च' इत्यमरः । कृतपुङ्खः
शिक्षितः, विहितपुङ्खश्च ॥

बिभ्रन्नाकुलयस्यतीव भयदां कङ्कालमालामिमा-
मेकत्वात्त्रिजगत्यपि प्रियतमे कालस्य पङ्क्तिः कुतः ।
कङ्कालोचितमेतदत्र वचनं कङ्कैः किमालोचितं
पायादित्यवचाः कृतेन्दुकलिकोत्तंसेन काली जगत् ॥ २१ ॥

कङ्कालमालां शवशरीरास्थिमालाम् । 'स्याच्छरीरास्थि कङ्कालं' इत्यमरः । बिभ्रत् ।
वक्रोक्तौ तु कालमालां बिभ्रत् । कं नाकुलयसि । कङ्कालानामुचितं योग्यम्, कङ्कैश्च
पक्षिविशेषैरालोचितम् । अवचा मूका । काली भवानी ॥

विसष्टां श्रियमेति ते हिमकराक्रान्तं जटामण्डलं
नैवास्मिन्नहयो न चापि मकराः सन्ति प्रिये कुत्रचित् ।
ऋक्षाणामधिपं ब्रुवे तदधुनैवाहूयतां जाम्बवा-
न्नन्दिन्नद्रिसुतां जयन्निति विभुः सूक्त्या चिरं पातु वः ॥ २२ ॥

हिमकराक्रान्तं हिमकरेण शशिनाक्रान्तम् । परत्र त्वकारप्रश्लेषेणाहिमकराक्रान्त-

महयश्च मकराश्च तैराक्रान्तम् । ऋक्षाणां नक्षत्राणामधिपः शशी, ऋक्षाणामच्छभल्लानां चाधिपो जाम्बवान् । ब्रुवे कथयामि । आहूयतामामन्त्र्यताम् । हे नन्दिन् ॥

सद्धर्म्यस्थितिमत्र कूटसकुले द्यूते भवानीक्षते
प्रेतावासरतेः कुतो मम सती तन्वङ्गि हर्म्यस्थितिः ।
नागारं कितव ब्रुवेऽनृतमिदं नागोऽस्मि नैव द्रुतं
ब्रूहीति प्रगुणोत्तरोत्तरवचा गौर्या हरः पातु नः ॥ २३ ॥

संश्चासौ धर्म्यो धर्मादनपेतः, सच्च तद्धर्म्यं प्रासादश्च तत्र स्थितिः सद्धर्म्यस्थितिः । कूटानि सकलान्यक्षाणि यत्र तत्र द्यूते । नागारमिति । नेति निषेधे, अगारं गृहम् । वक्रोक्तौ तु हे नाग सर्प, अरं शीघ्रम् । प्रगुणमर्थान्तरयुक्तत्वादनुरूपमुत्तरोत्तरं वचो यस्य स प्रगुणोत्तरोत्तरवचाः ॥

सुभ्रूस्त्वं कुपिता ममेति हृदयं पर्याकुलं वर्तते
नैवाहं शठ कुत्सितस्तव पिता भार्येति नावैषि किम् ।
ऋक्षाणां पतिरस्मि नेत्यसदृशं कस्मात्त्वयामन्त्रितः
पायाद्वो गिरिजां जयन्निति गिरा व्याजिह्मया धूर्जटिः ॥ २४ ॥

हे सुभ्रूः, कुपिता क्रुद्धा, कुत्सितः पिता च । नावैषि न जानासीति किम् । अवैषीत्यर्थः । भार्या गृहिणी । वक्रोक्तौ भानां नक्षत्राणामार्य प्रभो भार्य । हे भार्येति ॥

ख्याता ते हर वल्लभोडुवरता जानासि का वा प्लवे
सक्ता बालमृगाक्षि मे प्रियतमा पोतो मया नोदितः ।
कार्यं मुग्धमुखि प्लवेन तव किं स्यात्खण्डितेनेति वो
वाचा वञ्चितशैलराजतनयश्चन्द्रावतंसोऽवतात् ॥ २५ ॥

वल्लभ उडुवरः शशी यस्य तस्य भावो वल्लभोडुवरता, उडुवे प्लवे या रता सा ते वल्लभा । उडुवशब्दस्य वकारान्तत्वं चिन्त्यम् । ओष्ठ्यान्तता हि प्रसिद्धा । नोदित इति न उदित उक्तः । अपरत्र नोदितः खण्डितः ॥

व्यर्थं किं तनुषे दुरोदरमिदं न स्वापतेयं तव
द्यूतं किं न तनोमि तन्व्यकृतिना दुष्प्रापतात्रास्ति मे ।
नावाप्यस्त्वमसीति सत्यमुदितं नावा न लभ्योऽसि किं
त्रासीष्टेति निरुत्तरां गिरिभुवं कुर्वञ्जगत्र्यम्बकः ॥ २६ ॥

स्वापतेयं धनम्, इयं स्वापता सुप्रापत्वं च । नावाप्यो न लभ्यः, नावा तरण्या चाप्यः प्राप्यः ॥

दृष्टिस्ते शिखिना विभाति घटिता दृष्टौ न बर्हीं क्वचि-
द्वक्रोक्तिर्भवतो नितान्तदयिता सत्यं ममान्तो गतः।
न ब्रह्मादिभिरप्यपारवपुषः किं शब्दशून्यान्विभो
पुष्णासीति हतोत्तरं विदधती शंभुं शिवा पातु वः॥ २७॥

शिखी वह्निः, मयूरश्च। नितान्तमत्यर्थं दयिता नितान्तदयिता। अपरत्रानितान्त नेतो लब्धोऽन्तो यस्य तस्यामन्त्रणं हे अलभ्यावसान। वक्रोक्तिर्भवतो दयितेति। अपारवपुषः पाररहितदेहस्य। अनन्तदेहस्येति यावत्। अपगत आरवः शब्दो येषां तानपगतारवान्पुष्णातीति यस्तस्यापारवपुषः॥

तेनैवं त्रिदशेश मां न कुरुषे वश्या यतोऽहं तव
प्राप्ता प्रीतिमनुत्तमां प्रियतमेवश्यायप्रीतिः[1] कुतः।
मैवं ब्रूहि निगद्यतेऽत्र न निशातोयं निशातः स कः
शंसन्वक्रमिति क्षमाधरसुतां त्र्यक्षः शिवं वः क्रियात्॥ २८॥

वश्या यतो वशगता यस्मात्। उत्तरे त्वकारप्रश्लेषेऽवश्यायतो निशाजलात्प्रीतिः कुतः। निशातोयं रात्रिजलम्, अयं च निशातस्तीक्ष्णः॥

कृत्वा त्वां पणवञ्चितं नहि मया द्यूतेन न प्रीयते
नैवाहं पणवः कृशोदरि चितः शक्यो विधातुं त्वया।
किं वादित्रविवक्षयात्र दयिते को वादिनस्त्रायते
सूक्त्या निर्जितशैलराजसुत इत्यव्याज्जगद्धूर्जटिः॥ २९॥

पणेन वञ्चितं रहितम्, पणवं पटहं चितं संभूतं च। वादित्रं वाद्यभाण्डम्, यश्च वादिनस्त्रायते स वादित्रस्त्वं च॥

आद्यूनोऽसि सभस्मकः सुरभिषक्श्चिन्न किं पृच्छयते
सत्यं देवि ममास्ति नादिरपरो भूतिस्तु देहस्थिता।
केनागादि तवात्र भूतिरवनेर्गुप्तिः स्थिता पादयो-
र्दिश्यान्निर्जितपार्वतीक इति वः सूक्त्या श्रियं शंकरः॥ ३०॥

आद्यूनो लम्पटः। 'आद्यूनः स्यादौदरिके विजिगीषाविवर्जिते' इत्यमरः। आदिनोनो रहितश्च। भस्मको व्याधिविशेषः, सह भस्मना वर्तते यः स सभस्मकः। भूतिर्भस्म, भुवश्च पृथिव्या ऊतिरवनं भूतिः॥

---

[1] १. 'प्रहेवा' इति पिङ्गलसूत्रात्प्रकारपूर्वाक्षरस्य विकल्पेन गुरुत्वे नात्र च्छन्दोभङ्गशङ्का.

ही नाहं भवतोऽतिवक्रवचसा दातुं प्रवीणोत्तरं
का ते सुन्दरि हीनता ननु नता सर्वा त्रिलोक्येव ते।
नासत्योक्तिरियं कुतोऽत्र घटते दस्राभिधानागमो
मुष्णीतादघमद्रिजामवचसं कुर्वन्पिनाकीति वः ॥ ३१ ॥

हीति दोषसूचनेऽव्ययम्। नेति निषेधे। उत्तरत्र हीनोना। यस्याः सर्वा त्रिलोकी प्रणता स्यात्तस्या हीनता न संभाव्यते। न असत्यस्यानृतस्योक्तिर्नासत्योक्तिः, नासत्यौ च अश्विनौ॥

द्यूतेऽस्मिन्विजितो मया ननु भवानूर्ध्वं मुहूर्ताद्ध्रुवं
कोऽत्र स्यात्कथयर्क्षसङ्ग उदितः शैलो न वेत्सीति किम्।
प्रत्यग्रे किमिवाद्मि शंस दयिते भिक्षां कपालेऽधुना
सूक्त्येत्यद्रिजया जितोऽनृजुवचास्त्रासीष्ट वः शंकरः॥ ३२ ॥

ध्रुवं निश्चितम्, ध्रुवं च नक्षत्रम्। भवान्मया जित इत्युत्तरे जयतिर्द्विकर्मकः। ऋक्षसङ्गो नक्षत्रसङ्गः। उत्तरे शैलस्यर्क्षैरच्छभल्लैः सङ्गः। न वेत्सि न जानासि, नवे नूतने चात्सि भक्षयसि। 'अद भक्षणे'। अद्मि भक्षयामि। भिक्षां कपालेऽधुनेति पार्वत्युक्तिः॥

सन्नागारहिता तनोति भवतो भीतिं ममैषा तनु-
र्भग्नं सुन्दरि सद्म किं भवति मे यस्मै हितैषा तनुः।
चिन्ता मेऽत्र न वेश्मनि प्रियतमे किं चिन्तयास्यान्नव-
ग्राव्णीत्यद्रिसुतां जयन्नवतु वः सूक्त्या गिरीशोऽनिशम्॥ ३३ ॥

सन्नागारहिता सद्भिर्नागैररहिता सन्नागारहिता, सन्ने भग्ने चागारे गृहे हितानुकूला। न वेश्मनि न निषेधे वेश्मनि गृहे, नवे नूतनेऽश्मन्युपले च ॥

आ संसारमसौ शिरस्यविरतं गङ्गा वहत्येव ते
नेष्वासं च बिभर्ति सारमिति किं जानासि नाभ्रान्तिकम्।
स्यादभ्रस्य किमन्तिकेन कितव ज्ञातेन ते सांप्रतं
संपत्त्यै गिरिशोऽस्तु वः कुटिलया वाण्या भवान्या जितः॥ ३४॥

आ संसारादासंसारम्, अस्यन्तेऽनेन शरा इत्यासं धनुः, सारमुत्कृष्टम्। अभ्रान्तिकं भ्रान्तिरहितं निःसंशयम्, अभ्रस्यान्तिकं समीपं च ॥

न क्रीडामहमुत्सहेऽत्र भवता सार्धं पयोधेर्नव-
प्रस्तावः क इवात्र नूतनमथ प्रत्नं न जानाम्यहम्।

नव्यं कः कथयेत्किमत्र भवता व्यङ्केन साङ्केन वा
गौर्यात्तप्रतिपत्तिरुत्तरगिरा शंभुः कृतः पातु वः ॥ ३९ ॥

न क्रीडामिति नेति निषेधेक्रीडां खेलाम्, नक्रा मकरा विद्यन्ते यस्य स नक्री समुद्रस्तस्येडा स्तुतिर्न क्रीडा तां च। नवः स्तवः, नूतनश्च। प्रत्नं पुराणम्। 'पुराणप्रतनप्रत्नपुरातनचिरंतनाः' इत्यमरः। सविपक्षा ह्येषा लौकिकी वाचो युक्तिः। एवं व्यङ्केन साङ्केनेति। नव्यं क इति नव्यं नूतनं को जातु कथयेत्, उत्तरे नेति निषेधः। विगतोऽङ्को यस्यासौ व्यङ्कः॥

एषा सागरसंगताभिमततां याता न मे कर्हिचि-
न्मुग्धे कण्ठभुवं ब्रवीषि मम किं सक्ष्वेडतामीयुषीम्।
क्ष्वेडाराव इहोचितस्तव गणव्रातैः सह क्रीडतो
युष्मान्नीलगलोऽवतादिति गिरा गौर्या कृतोऽनुत्तरः ॥ ३६ ॥

सागरसंगतेति सागरेण समुद्रेण संगता। अर्थाद्गङ्गा। उत्तरे तु सेति सर्वनामपदम्, गरो विषम्। तदाह—सक्ष्वेडेति सह क्ष्वेडेन विषेण, क्ष्वेडया शब्दविशेषेण च सक्ष्वेडम् क्ष्वेडं विषम्, क्ष्वेडा जनस्य शब्दविशेषः॥

ख्यातं सज्जगतीह किं नु चरितं विष्वग्विनोदीव ते
सज्जास्ति क्व गतिर्न मेऽत्र रुचितः कश्चिद्विहारः क्वचित्।
नेष्टं ते जिनसद्म चेद्व्रस ततः सार्धं श्मशाने मया
मायां वो दहतादिति त्रिनयनः सूक्त्या जयन्पार्वतीम् ॥ ३७ ॥

सज्जगतीति सच्छोभनं जगति भुवने, उत्तरे तु सज्जा सावधाना गतिर्यस्य तत्सज्जगति। विष्वक्समन्तात्। विहारो विहरणम्, बुद्धवेश्म च। 'बुद्धानां च विहारोऽस्त्री' इति कोषः॥

सुभ्रूर्मूर्धनि मेऽत्र पावनतया नूनं स्थितं गङ्गया
ह्रीरस्या बत का भवेदवनता कास्ति त्वयेत्युच्यताम्।
मन्दाक्षाभिमता न मे भवति ते पट्विन्द्रियैव प्रिया
नूनं स्यादिति वो विनिर्जितशिवा शर्वाण्यघौघच्छिदे ॥ ३८ ॥

अत्र पावनतयात्र मूर्धनि पावनतया पवित्रत्वेन, परत्र त्रपया लज्जयावनता तया। मन्दाक्षं लज्जा, वक्रोक्तौ तु मन्दाक्षापट्विन्द्रिया॥

मूर्धानं हर संश्रिता किल हलश्रेणी वितस्तार ते
संबन्धः क इवात्र लाङ्गलततेर्नाहं वितस्तारतिः।

किं नद्याश्रयमेतदत्र वचनं द्यामाश्रयेत्किं वचो
दिश्याद्वः शितिकण्ठ इत्यगभुवि स्पष्टोत्तरोक्तिः श्रियम् ॥ ३९ ॥

हलं अस्थि, सीरं च । वितस्तार विततान ते तव, अपरत्र वितस्तायां [कश्मीरदेशप्रसिद्धायां] नद्यां रतिर्यस्य तस्यामन्त्रणं वितस्तारते । नद्याश्रयो यस्य तन्नद्याश्रयम् अपरत्र न निषेधे द्यौराश्रयो यस्य स द्याश्रयः ॥

गण्डे दानवनाशिनो गणपतेः कुर्वन्ति कोलाहलं
रोलम्बा दनुसूनुनाशनविधौ सक्ताः स्युरेते कथम् ।
ब्रूयात्कः खलु दानवान्गजमुखः शंसत्यसौ पृच्छयता-
मुक्त्या साध्विति नित्यमस्तु कुशलायोमां जयन्वो विभुः ॥ ४० ॥

दानवनाशिन इति दानवनं मदपुञ्जमश्नन्तीति दानवनाशिनः । परत्रासुरक्षेपकाश्च । रोलम्बा भ्रमराः । दानवान्दानयुक्तश्च ॥

को हि स्यादहितान्तकस्त्वदपरः सत्यं ममैवाहिना
तान्तं वीक्ष्य शिरो भवेदभिमतः किं स्यान्न चक्री श्रियः ।
वक्रोक्तौ कुशलो भवानिति कुशे लोभोऽस्ति कस्येति वै
वक्रोक्त्या भवतो भवो जितभवानीकोऽभवायास्तु वः ॥ ४१ ॥

अहितानामन्तको मृत्युरहितान्तकः । अपरत्राहिना तान्तं खिन्नं कं शिरो यस्य... हितान्तकः । एतदेवोद्दिश्याह—सत्यमेतत् । अहिना तान्तं सदैव शिरो वीक्ष्य चक्री विष्णुः श्रियो लक्ष्म्या अभिमतः प्रियः किं न स्यात् । अपि तु स्यादेव । मद्वच्छिरस्यहि-स्तेन धारित इति यत्ततो लक्ष्म्या अभिमतो विष्णुर्जात इत्यर्थः । कुशलो भवान्निपुणस्त्वम्, कुशेषु दर्भेषु च लोभो विद्यते यस्य ॥

दुर्गाहं भवतोऽवगाह्यत इदं चेतः कथं वा मया
दुर्गाहं स्फुटमस्मि गाहनविधौ वामा पुनर्नास्म्यहम् ।
नालीकाश्रयमेतदत्र वचनं बाणाश्रयं किं वचः
स्यादित्यस्तु भवच्छिदेऽद्रितनयां सूक्त्या जयन्वो विभुः ॥ ४२ ॥

दुःखेन गाह्यत इति दुर्गाहम्, अहं च दुर्गाभिधाना । मया कथं वा तव चेतोऽवगाह्यत इति, वामा स्त्री वामया स्त्रिया च, वामा कुटिला च । नालीकाश्रयमलीकाश्रयमनृतस्थानं न । सत्यमेतदित्यर्थः । नालीकश्च शरविशेषः । भवच्छिदे जन्मोच्छित्तये ॥

मुञ्चामीश्वर कुञ्जराजिनमहं ते विस्रगन्धाकुलं
कुञ्जे राजितमस्य शैलमिह ते सुभ्रूः पिता पर्वतः ।

नोक्तिर्मज्जनकाश्रया तव भवेत्किं मज्जनेनात्र मे
शंसन्नित्यजितोऽद्रिराजतनयां नेयाद्द्विषो वः क्षयम् ॥ ४३ ॥

कुञ्जराजिनं कुञ्जरस्याजिनं कुञ्जराजिनं गजचर्म, कुञ्जेन लतादिपिहितोदरेण शोभिनं च। एतदेवाह—कुञ्जे राजितं शैलमस्य दूरीकुरु। 'असु क्षेपणे'। परंतु हे सुभ्रूः, तव पिता पर्वत एव। विस्रं दुर्गन्धि। मज्जनको मम जनकः पिता, मज्जनं च स्नानम् ॥

स्पष्टाखण्डलयज्ञया विजयया नृत्ये ममोच्चावचं
गीतं सुन्दरि तन्यते सुरपतेर्योगो मखस्यात्र कः।
कस्येष्टा सवसंकथा स्फुटमसौ यः पानशौण्डो नरः
सूक्त्या खण्डितपार्वतीवचन इत्यव्याद्वृषाङ्को जगत् ॥ ४४ ॥

स्पष्टाखण्डलयज्ञया। 'लयः साम्यम्' इत्यमरः। स्पष्टोऽखण्डलयज्ञा, परत्र स्पष्ट आखण्डलयज्ञ इन्द्रयज्ञो यस्याः। उच्चावचं नानाविधम्। सवो यज्ञः संहितया आसवः पानं च। पाने शौण्डो व्यसनी ॥

धत्ते चन्द्रकलाञ्छितस्तव जटाजूटः श्रियं हारिणीं
बर्हेणैष न लाञ्छितो न च रुचिं मार्गीं बिभर्ति क्वचित्।
उक्तिस्ते विषमा तनोति मनसः क्षोभं ममोक्तिः कथं
क्ष्वेडं ते तनुयादुमामिति जयन्सूक्त्या हरो वोऽवतात् ॥ ४५ ॥

चन्द्रकलाञ्छितश्चन्द्रकलयाञ्छित आकृष्टः। परत्र चन्द्रकेण च बर्हेण लाञ्छितश्चिह्नितः। हरतीति हारिणी ताम्, हरिणसंबन्धिनीं च। विषमा क्रूरा, तनोति कुरुते, विषं चातनोति। क्षोभमित्यत्र चार्थो बोद्धव्यः। उत्तरे क्षोभ एव दुर्जरत्वाद्विषम् ॥

शक्ता वक्तुमिहोत्तरं न खलु ते तद्दक्षिणामाश्रयेः
किंचिन्मे वद सर्वदस्य भवतः का दक्षिणा लभ्यते।
संजाता सततं त्वमेव सरला नाहं लता तारवी
स्मेरः शंभुरिति श्रियं दिशतु वः शैलात्मजानिर्जितः ॥ ४६ ॥

उत्तरं प्रतिवाक्यम्, उत्तरदिक्स्थं च। दक्षिणानुकूला, अपसव्या च, यज्ञादौ पात्रेषु देया च। सरला शुद्धा, देवदारुलता च ॥

सुभ्रूः संप्रति मे न कापि दयिता त्वत्तो ममायं ग्रहः
प्राप्ता ते शठ मेनका दयिततां नाकाङ्गनापाश्रया।
नोक्तिर्मे गगनाजिराश्रयवती कस्योक्तिरित्यस्तु वः
सूक्त्या निर्जितशैलजानृजुवचाः शीतांशुमौलिः श्रिये ॥ ४७ ॥

मेनका इति मे न का इति पदत्रयम् । मे मम न कापि सुभ्रूर्वराङ्गना दयिता प्रिया, मेनकानामाप्सराः । अङ्गना नारी, अङ्गनं चाजिरम् ॥

कर्ता शूलपराजितां रिपुचमूमेकस्त्वमेवोद्धतां
नो शीघ्रं तृणमण्डितारिपृतना केनापि काचित्कृता ।
वक्तुं ते कुशला कया तव गिरा स्यां दुःशलाका न वा-
गस्तीशो वचसाद्रिजामिति जयन्निष्टं विधासीष्ट वः ॥ ४८ ॥

शूलपराजितां शूलेन त्रिशूलेन पराजिताम्, उत्तरत्राशु शीघ्रमुलपेन तृणविशेषेण राजितां शोभमानाम् । कुशला निपुणा कया गिरा स्यामहम्, उत्तरत्र कुत्सितया शलाकया सूच्या । विधासीष्ट क्रियात् ॥

दृष्टिस्ते न कृशानुतापरहिता सत्यं न तन्वी स्तुता
सुभ्रूरन्यहिता च मे मतिरपि प्रज्ञोच्यते नो मया ।
ख्यात्वैव त्वमुमात्मनास्यभिहितं कस्मादपह्नूयते
मुष्णीतादघमद्रिजामभिभवन्सूक्त्या कपर्दीति वः ॥ ४९ ॥

कृशानुतापरहिता कृशानोरग्नेस्तापस्तेन रहिता । अपरत्र कृशा तन्वी, नुता स्तुता, परहितान्यानुकूला । नोमया, नो, मयेति नो निषेधे, न उमया इति च ॥

वक्रोक्त्या यदसत्कृतोऽसि भगवंस्तत्क्षम्यतां मेऽधुना
कस्माद्भौमगिरा न खेदितमना नोक्तः कुपुत्रो मया ।
स्यात्किं सुन्दरि कुत्सितेन तनयेनोक्तेन जित्वेत्युमां
स्ताद्धस्तत्परिरम्भसान्द्रपुलकः शंभुः शिवप्राप्तये ॥ ५० ॥

वक्रोक्तिर्वक्रा कुटिला चासावुक्तिः कुटिला गीः, उत्तरत्र वक्रस्य भौमस्योक्तिर्वाक्च । कुपुत्र इति कुः भूमिस्तस्याः पुत्रः कुपुत्रो भौमः, कुत्सितः पुत्रस्तनयश्च । परिरम्भ आश्लेषस्तेन सान्द्राणि पुलकानि रोमाञ्चा यस्य ॥

वक्रोक्तिपञ्चाशतिमित्थमेनां यो भावयेन्मत्सररिक्तबुद्धिः ।
स्पष्टोत्तरासूक्तिषु काव्यबन्धे भवेत्स रत्नाकरवत्प्रवीणः ॥ ५१ ॥

भावयेद्विचारयेत् । स्पष्टोत्तरास्विति स्पष्टमुत्तरं यासु तादृशीषूक्तिषु वक्रोक्तिषु काव्यबन्धे सुभाषितविषये रत्नाकरः कविवरो हरविजयकारस्तद्वत्प्रवीणः कुशलः स्यात् ॥

सूनुरानन्ददेवस्य रणभूव्योम्नि भास्वतः ।
वक्रोक्तिवर्णने रात्ने टिप्पणं वल्लभो व्यधात् ॥

इत्यमात्यवरानन्ददेवसूनुशिशुपालवधाद्यनेककाव्यटीकाकर्तृश्रीवल्लभदेवकृतया टिप्पण्या समेता श्रीबालबृहस्पत्यनुजीविनो वागीश्वराङ्कस्य विद्याधिपत्यपरनाम्नो हरविजय-महाकाव्यकर्तुः कश्मीरदेशोद्भवराजानकश्रीरत्नाकरमहाकवेः कृतिर्वक्रोक्तिपञ्चाशिका समाप्ता ।

महाकविश्रीक्षेमेन्द्रकृता[1]
औचित्यविचारचर्चा ।

कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीनसा ।
अच्युताय नमस्तस्मै परमौचित्यकारिणे ॥ १ ॥
कृत्वापि काव्यालंकारां क्षेमेन्द्रः कविकर्णिकाम्[2] ।
तत्कलङ्कं विवेकं च विधाय विबुधप्रियम् ॥ २ ॥
औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥ ३ ॥ (युग्मम्)
काव्यस्यालमलंकारैः किं मिथ्यागणितैर्गुणैः ।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ॥ ४ ॥
अलंकारास्त्वलंकारा गुणा एव गुणाः सदा ।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥ ५ ॥

परस्परोपकारकरुचिरशब्दार्थरूपस्य काव्यस्योपमोत्प्रेक्षादयो ये प्रचुरालंकारास्ते कटककुण्डलकेयूरहारादिवदलंकारा एव, बाह्यशोभाहेतुत्वात् । येऽपि काव्यगुणाः केचन तल्लक्षणविचक्षणैः समाम्नातास्तेऽपि श्रुतसत्यशीलादिवद्गुणा एव, आहार्यत्वात् । औचित्यं त्वग्रे वक्ष्यमाणलक्षणं स्थिरमविनश्वरं जीवितं काव्यस्य, तेन विनास्य गुणालंकारयुक्तस्यापि निर्जीवत्वात् । रसेन शृङ्गारादिना सिद्धस्य प्रसिद्धस्य काव्यस्य धातुवादरससिद्धस्येव तज्जीवितं स्थिरमित्यर्थः ।

उक्तार्थस्यैव विशेषमाह—

उचितस्थानविन्यासादलंकृतिरलंकृतिः ।
औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः ॥ ६ ॥

---

१. कलाविलासप्रारम्भलिखितक्षेमेन्द्रकृतग्रन्थनाममालिकातिरिक्ताः क्षेमेन्द्रकृता ग्रन्थास्त्वेते—(१) अवसरसारः, (२) नीतिलता, (३) मुनिमतमीमांसा, (४) ललितरत्नमाला, (५) विनयवल्ली. अथ च तत्र क्षेमेन्द्रकृतग्रन्थेषु 'हस्तिजनप्रकाशः' इति ग्रन्थनाम लिखितम्, तत्कर्ता कश्चिदर्वाचीनो गुर्जरदेशोद्भवो यदुशर्मसूनुरन्यः क्षेमेन्द्र इति ज्ञेयम्. अयमनेकग्रन्थकर्ता महाकविः क्षेमेन्द्रस्तु प्रकाशेन्द्रात्मजः कश्मीरदेशोद्भूतश्चेति सुप्रसिद्धमेव. २. कस्यचित्क्षेमेन्द्रकृतग्रन्थस्यैव नाम भाति.

अलंकृतिरुचितस्थानविन्यासादलंकर्तुं क्षमा भवति, अन्यथा त्वलंकृतिव्यपदेशमेव न लभते । तद्वदौचित्यादपरिच्युता गुणा गुणतामासादयन्ति, अन्यथा पुनरगुणा एव ।

यदाह—

'कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
मौचित्येन विना रुचिं प्रतनुते नालंकृतिर्नो गुणाः ॥'

किं तदौचित्यमित्याह—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥ ७ ॥

यत्किल यस्यानुरूपं तदुचितमुच्यते, तस्य भावमौचित्यं कथयन्ति ।

अधुना सकलकाव्यशरीरजीवितभूतस्यौचित्यस्य प्राधान्येनोपलभ्यां स्थितिं दर्शयितुमाह—

पदे वाक्ये प्रबन्धार्थे गुणेऽलंकरणे रसे ।
क्रियायां कारके लिङ्गे वचने च विशेषणे ॥ ८ ॥
उपसर्गे निपाते च काले देशे कुले व्रते ।
तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे ॥ ९ ॥
प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि ।
काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम् ॥ १० ॥

एतेषु पदप्रभृतिषु स्थानेषु मर्मस्विव काव्यस्य सकलशरीरव्यापि जीवितमौचित्यं स्फुटत्वेन स्फुरदवभासते ।

तेषूदाहरणानि क्रमेण दर्शयितुमाह—

तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम् ।
चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम् ॥ ११ ॥

एकमेवोचितं पदं तिलकायमानं बिभ्राणा सूक्तिः समुचितपरभागशोभातिशयेन रुचिरतामावहति ।

यथा परिमलस्य[1]—

‘मग्नानि द्विषतां कुलानि समरे त्वत्खड्गधाराकुले
नाथास्मिन्निति बन्दिवाचि बहुशो देव श्रुतायां पुरा ।
मुग्धा गुर्जरभूमिपालमहिषी प्रत्याशया पाथसः
कान्तारे चकिता विमुञ्चति मुहुः पत्युः कृपाणे दृशौ ॥’

अत्र मुग्धापदेनार्थौचित्यचमत्कारकारिणा सूक्तिः शरदिन्दुवदनेव श्यामतिलकेन श्यामेव शुभ्रविशेषकेण विभूषिता सकलकविकुलललामभूतां विच्छित्तिमातनोति ।

न तु यथा धर्मकीर्तेः[2]—

‘लावण्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः
स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्ताज्वरो निर्मितः ।
एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥’

अत्र ‘तन्व्याः’ इति पदं केवलशब्दानुप्रासव्यसनितया निबद्धं न कांचिदर्थौचित्यचमत्कारकणिकामाविष्करोति । ‘सुन्दर्याः’ इत्यत्र पदमनुरूपं स्यात् । अन्यानि वा निरतिशयरूपलावण्यव्यञ्जकानि । तन्वीपदं तु विरहविधुररमणीजने प्रयुक्तमर्थौचित्यशोभां जनयति ।

यथा श्रीहर्षस्य[3]—

‘परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमलनमप्राप्य हरितम् ।

---

१. पद्मगुप्तापरनामा परिमलकविः साहसाङ्कचरितनामकेऽष्टादशसर्गात्मके महाकाव्येऽवन्तिभूपालस्य चरितं वर्णितवान्. २. अयं बौद्धो धर्मकीर्तिर्वासवदत्ताकर्तुः सुबन्धुकवेरपि प्राचीन आसीत्. वासवदत्तायां वासवदत्तावर्णनप्रकरणे ‘बौद्धसंगतिमिवालंकारभूषिताम्’ इत्यस्ति. ‘बौद्धसंगतिमिवालंकारो धर्मकीर्तिकृतो ग्रन्थविशेषस्तेन भूषिताम्’ इति तट्टीकायां शिवरामः. आनन्दवर्धनाचार्येणायमेव श्लोको धर्मकीर्तिनामोल्लेखपूर्वकं ध्वनिग्रन्थ उदाहृतः. सुभाषितावलावपि बहवो भदन्तधर्मकीर्तिश्लोकाः सन्ति. भदन्तशब्दो बौद्धभिक्षुवाचकः. ३. रत्नावलीप्रियदर्शिकानागानन्दानां कर्ता कोऽयं श्रीहर्ष इति न नि-

इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम् ॥'

अत्र सागरिकाया विरहावस्थासूचकम् 'कृशाङ्ग्याः' इति पदं परममौचित्यं पुष्णाति।

वाक्यगतमौचित्यं दर्शयितुमाह—

औचित्यरचितं वाक्यं सततं संमतं सताम्।
त्यागोदग्रमिवैश्वर्यं शीलोज्ज्वलमिव श्रुतम् ॥ १२ ॥

औचित्यरचितं वाक्यं काव्यविवेकविचक्षणानामभिमततमम्।

यथा मम विनयवल्ल्याम्—

'देवो दयावान्विजयो जितात्मा यमौ मनःसंयममाननीयौ।
इति ब्रुवाणः स्वभुजं प्रमार्ष्टि यः कीचकाकालिककालदण्डम् ॥
धीरः स किर्मीरजटासुरारिः कुबेरशौर्यप्रशमोपदेष्टा।
दृष्टो हिडिम्बादयितः कुरूणां पर्यन्तरेखागणनाकृतान्तः ॥ (युग्मम्)'

अत्र भीमस्य भीमचरितोचितकीचकाकालिककालदण्डहिडिम्बादयितादिभिः पदैरुन्निद्ररौद्ररसस्वरूपानुरूपो वाक्यार्थः सजीव इवावभासते।

यथा वा राजशेखरस्य—

'संबन्धी पुरुभूभुजां मनसिजव्यापारदीक्षागुरु-
र्गौराङ्गीवदनोपमापरिचितस्तारावधूवल्लभः।

श्रयः. बाणभट्ट एव स्वप्रभोः श्रीहर्षस्य नाम्ना रत्नावल्यादिग्रन्थान्कृतवानिति काश्मीरकाः. पठन्ति च काव्यप्रकाशेऽपि 'श्रीहर्षादेर्बाणादीनामिव धनम्' इति. अन्यदेशीयास्तु धावककविः श्रीहर्षनाम्ना रत्नावलीं कृत्वा बहुधनं लब्धवानिति वदन्ति. अन्यदेशीयकाव्यप्रकाशपुस्तकेष्वपि 'श्रीहर्षादेर्धावकादीनामिव धनम्' इत्येव पाठः. काश्मीरकमते तु धावककविः शशशृङ्गायते. अन्यदेशीयपुस्तकपाठापेक्षया काश्मीरपुस्तकस्थपाठस्य किंचिदधिकं प्रामाण्यम्, काव्यप्रकाशकर्तू राजानकमम्मटस्य काश्मीरदेशोत्पन्नत्वात्. रत्नावलीश्लोका आनन्दवर्धनाचार्येणापि ध्वनिग्रन्थ उदाहृताः सन्ति. ख्रिस्तसंवत्सरीयाष्टमशतकमध्यभागसमुत्पन्नेन कश्मीरमहीपतेर्जयापीडस्य मन्त्रिणा दामोदरगुप्तेनापि कुट्टनीमतग्रन्थे रत्नावलीनाटिका विस्तरेण वर्णितास्ति. रत्नावलीप्रथमाङ्कस्था 'उदयनगान्तरितमियम्' इत्याद्यार्यापि प्रसङ्गागता तत्र गृहीतास्ति.

सद्योमार्जितदाक्षिणात्यतरुणीदन्तावदातद्युति-
श्चन्द्रः सुन्दरि दृश्यतामयमितश्चण्डीशचूडामणिः ॥'

अत्रापि चन्द्रमसः शृङ्गारान्तरङ्गैरनङ्गोद्दीपनैः पदैर्निर्वर्तितो वाक्यार्थः सदर्थौचित्यसामर्थ्येनात्यर्थमर्थनीयतां प्राप्तः ।

न तु यथास्यैव—

'नाले शौर्यमहोत्पलस्य विपुले सेतौ समिद्वारिधेः
शश्वत्खड्गभुजंगचन्दनतरौ क्रीडोपधाने श्रियः ।
आलाने जयकुञ्जरस्य सुदृशां कंदर्पदर्पे परं
श्रीदुर्योधनदोष्णि विक्रमपरे लीनं जगन्नन्दतु ॥'

अत्रातिशयपरकर्कशसोत्कर्षसुभटभुजस्तम्भस्यासमुचितेन कुवलयनालतुलाधिरोपणेन वाक्यार्थः सोपहासतयेव निबद्धः परिज्ञायते ।

प्रबन्धार्थौचित्यं दर्शयितुमाह—

उचितार्थविशेषेण प्रबन्धार्थः प्रकाश्यते ।
गुणप्रभावभव्येन विभवेनेव सज्जनः ॥ १३ ॥

अम्लानप्रतिभाप्रकर्षोत्प्रेक्षितेन सकलप्रबन्धार्थाप्यायिपीयूषवर्षेण समुचितार्थविशेषेण महाकाव्यं स्फुरदिव चमत्कारकारितामापद्यते ।

यथा कालिदासस्य—

२. कालिदासः कविः

'जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥'

अत्राचेतनस्य चेतनाध्यारोपेण मेघस्य दौत्ययोग्यताधानाय प्रथितपुष्करावर्तकपर्जन्यवंश्यत्वममात्यप्रकृतिपुरुषत्वं च यदुपन्यस्तं तेन समस्तप्रबन्धस्याभिधानतोत्प्रेक्षितेतिवृत्तरुचिरतरस्य निरतिशयमौचित्यमुद्द्योतितम् ।

यथा वा भवभूतेः—

६. भवभूतिः कविः

'(नेपथ्ये ।)

योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥

लवः—(सगर्वमिव ।) अहो संतापनान्यक्षराणि । भो भोः, किमक्षत्रिया पृथिवी यदेवमुद्धुष्यते । (विहस्य ।) आः, किं नाम स्फुरन्ति शस्त्राणि । (धनुरारोपयन् ।)

ज्याजिह्वया वलयितोत्कटकोटि दंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥'

अत्रार्थे रामायणकथातिक्रमेण नूतनोत्प्रेक्षिता रामतनयस्य सहजविक्रमानुसारिणी शौर्योत्कर्षभूमिः परप्रतापस्पर्शासहिष्णुता प्रबन्धस्य रसबन्धुरामौचित्यच्छायां प्रयच्छति ॥

न तु यथा राजशेखरस्य—

'**रावणः**—यत्पार्वतीहठकचग्रहणप्रवीणे
पाणौ स्थितं पुरभिदः शरदां सहस्रम् ।
गीर्वाणसारकणनिर्मितगात्रमत्र
तन्मैथिलीक्रयधनं धनुराविरस्तु ॥

जनकः—आविरस्तु सममगर्भसंभवया सीतया ।'

अत्र 'आविरस्तु समं सीतया' इति जनकराजेन यदुच्यते तेनास्य पिशिताशनाय तनयाप्रतिपादनमभिमतमिवोपलक्ष्यते । न चैतद्विद्मः कथं भक्ष्यभूता कुसुमकोमलाङ्गी पुरुषादाय प्रतिपाद्यते । इत्यनौचित्येन प्रसिद्धेन वृत्तवैपरीत्यं परं हृदयविसंवादमादधाति ।

यथा वा कालिदासस्य—

'ऊरुमूलनखमार्गपङ्क्तिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥'

अत्राम्बिकासंभोगवर्णने पामरनारीसमुचितनिर्लज्जसज्जनखराजिविराजितोरुमूलहृतविलोचनत्वं त्रिलोचनस्य भगवतस्त्रिजगद्गुरोर्यदुक्तं तेनानौचित्यमेव परं प्रबन्धार्थः पुष्णाति ।

गुणौचित्यं दर्शयितुमाह—

प्रस्तुतार्थोचितः काव्ये भव्यः सौभाग्यवान्गुणः ।
स्यन्दतीन्दुरिवानन्दं संभोगावसरोदितः ॥ १४ ॥

प्रस्तुतस्यार्थस्यौचित्येनौजःप्रसादमाधुर्यसौकुमार्यादिलक्षणो गुणः काव्ये भव्यः सौभाग्यवत्तामवाप्तः सहृदयानन्दसंदोहमिन्दुरिव स्यन्दति ॥

यथा भट्टनारायणस्य[1]— ७. भट्टनारायणः कविः

'महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकंदरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥'

अत्रौजस्विनः सुभटमुकुटमणेरश्वत्थाम्नः स्फूर्जदूर्जितप्रतापानुरूपं वक्यमोजसा काव्यगुणेनोदग्रतामवाप्तं सहस्रगुणमिव विक्रमौचित्यगौरवमावहति ॥

यथा वा भट्टबाणस्य[2]— ८. भट्टबाणः कविः

'हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥'

अत्र विप्रलम्भभरभग्नधैर्यायाः कादम्बर्या विरहव्यथावर्णना माधुर्यसौकुमार्यादिगुणयोगेन पूर्णेन्दुवदनेव प्रियंवदत्वेन हृदयानन्ददायिनीं दयिततमतामातनोति ॥

---

१. अयं वेणीसंहारकर्ता नारायणभट्टः ९९९ शके अर्थात् १०७७ मिते खिस्तसंवत्सरे कान्यकुब्जदेशाद्वङ्गदेशं गत इति वङ्गदेशीयानां निश्चयः. परंतु खिस्तसंवत्सरीयनवमशतकमध्यभागसमुद्भूतेनानन्दवर्धनाचार्येण बहवो वेणीसंहारश्लोकाः स्वकीये ध्वनिग्रन्थे समुदाहृताः, तस्मान्नवमशतकमध्यभागादपि पूर्वमासीद्वेणीसंहारकर्ता भट्टनारायणः. अतो वङ्गदेशीयानां मतमत्र नादरणीयम्. २. बाणभट्टः खिस्तसंवत्सरीयसप्तमशतकस्य पूर्वभाग आसीत्. एतत्कृता त्वियं श्लोकबद्धा कादम्बरीकथा नाद्याप्युपलब्धा.

न तु यथा चन्द्रकस्य¹—

'युद्धेषु भाग्यचपलेषु न मे प्रतिज्ञा
दैवं नियच्छति जयं च पराजयं च।
एषैव मे रणगतस्य सदा प्रतिज्ञा
पश्यन्ति यन्न रिपवो जघनं हयानाम्॥'

अत्र क्षत्रवृत्तिरिवौजसा काव्यगुणेनास्पृष्टा सुभटोक्तिरुचितार्थापि तेजोजीवितविरहिता दुर्गतगृहदीपशिखेव मन्दायमाना न विद्योतते॥

यथा वा राजशेखरस्य—

'एतस्याः स्मरसंज्वरः करतलस्पर्शैः परीक्ष्यो न यः
स्निग्धेनापि जनेन दाहभयतः प्रस्थंपचः पाथसाम्।
निर्वीर्यीकृतचन्दनौषधविधौ तस्मिंस्तडत्कारिणो
लाजस्फोटममी स्फुटन्ति मणयः सर्वेऽपि हारस्रजाम्॥'

अत्र विरहविधुररमणीमनोभवावस्थानुरूपं माधुर्यमुत्सृज्य तडत्कारिणो लाजस्फोटं स्फुटन्तीत्योजःस्फूर्जितोर्जितस्वभावाधिवासिता सूक्तिर्लावण्यपेशलतनुर्ललितललनेव परुषभाषिणी झटित्यनौचित्यं चेतसि संचारयति॥

अलंकारौचित्यं दर्शयितुमाह—

अर्थौचित्यवता सूक्तिरलंकारेण शोभते।
पीनस्तनस्थितेनेव हारेण हरिणेक्षणा॥ १५॥

प्रस्तुतार्थस्यौचित्येनोपमोत्प्रेक्षारूपकादिनालंकारेण सूक्तिश्चकास्ति। कामिनीवोच्चकुचचुम्बिना रुचिरमुक्ताकलापेन॥

---

१. अयं चन्द्रककविः कश्मीरदेशे तुञ्जीनस्य राज्यकाले बभूव. 'नाट्यं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः। द्वैपायनमुनेरंशस्तत्काले चन्द्रकोऽभवत्॥' इति राजतरङ्गिणी (२।१६). तुञ्जीनश्च ख्रिस्तसंवत्सरप्रारम्भात् १०३ मितवर्षपूर्वं राज्यसिंहासनमारूढोऽभूदिति बहूनां मतम्. कनिङ्ह्याममते तु ३१९ मिते ख्रिस्तसंवत्सरे तुञ्जीनो राज्यसिंहासनमारूढः. अत्र बहूनां मतमेव ग्राह्यम्.

यथा श्रीहर्षस्य—

'विश्रान्तविग्रहकथो रतिमाञ्जनस्य
चित्ते वसन्प्रियवसन्तक एव साक्षात् ।
पर्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचाप इवाभ्युपैति ॥'

अत्र वत्सेश्वरस्य कुसुमचापेनोपमा शृङ्गारावसरसरसचारुतरतामौचित्येन कामपि चेतश्चमत्कारिणीमाविष्करोति ॥

न तु यथा चन्दकस्य—

'खगोत्क्षिप्तैरन्त्रैस्तरुशिरसि दोलेव रचिता
शिवा तृप्ताहारा स्वपिति रतिखिन्नेव वनिता ।
तृषार्तो गोमायुः सरुधिरमसिं लेढि बहुशो
बिलान्वेषी सर्पो हतगजकराग्रं प्रविशति ॥'

अत्रानुचितस्थानस्थितायाः पुरुषपिशिततृप्तसुप्तायाः शिवायाः सुरतकेलिक्लान्तकान्तया विच्छायैवोपमा परं वैपरीत्यं प्रकाशयति ॥

यथा वा मालवरुद्रस्य—

'अभिनववधूरोषस्वादः करीषतनूनपा-
दसरलजनाश्लेषक्रूरस्तुषारसमीरणः ।
गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवे-
र्विरहिवनितावक्त्रौपम्यं बिभर्ति निशाकरः ॥'

अत्र कोमलकामिनीकोपेन करीषकृशानोः सादृश्यं शीतसमयस्वादुतया हृदयसंवादसुन्दरमप्यनुचितत्वेन सहसैव चेतसः संकोचमिवादधाति॥

यथा वा राजशेखरस्य—

'चिताचक्रं चन्द्रः कुसुमधनुषो दग्धवपुषः
कलङ्कस्तत्रत्यः स्पृशति मलिनाङ्गारकलनाम् ।
यदेतत्सज्योतिर्दरदलितकर्पूरधवलं
मरुद्भिर्भस्मैतत्प्रसरति विकीर्णं दिशि दिशि ॥'

१. सुभाषितहारावलावयं श्लोको भासकवेः.

अत्राप्यानन्दिसुधावस्यन्दसुन्दरस्येन्दोश्चिताचक्रत्वमनुचिततया कर्णकटुकमातङ्कमिवातनोति । योऽर्थस्तु हृदयसंवादी स यद्यनौचित्यस्पर्शलेशरहितस्तदधिकतरामलंकारशोभां पुष्णाति ॥

यथा कार्पटिकस्य[1]—

'शीतेनोद्धृषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः
शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा क्वापि विमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥'

अत्रानौचित्यस्पर्शपरिहारेण केवलं हृदयसंवादसौन्दर्यमेव स्वादुतामादधाति ॥

रसौचित्यं दर्शयितुमाह—

कुर्वन्सर्वाशये व्याप्तिमौचित्यरुचिरो रसः ।
मधुमास इवाशोकं करोत्यङ्कुरितं मनः ॥ १६ ॥

औचित्येन भ्राजिष्णुः शृङ्गारादिलक्षणो रसः सकलजनहृदयव्यापी वसन्त इवाशोकतरुमङ्कुरितं मनः करोति ॥

यथा श्रीहर्षस्य—

'उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥'

अत्रेर्ष्याविप्रलम्भरूपस्य शृङ्गाररसस्य वासवदत्तायामवेक्ष्यमाणस्य नवमालिकालताया ललितवनितातुल्यतया विरहावस्थारोपणेन नितरामौचित्यरुचिरचमत्कारकारिणी दीप्तिरुपपादिता ॥

यथा वा कालिदासस्य—

'बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥'

---

१. राजतरङ्गिण्याम् (३।१८१) अयं श्लोको मातृगुप्तस्य.

अत्र पार्वत्यां परमेश्वरस्याभिलाषशृङ्गारे वक्ष्यमाणे प्रथममुद्दीपनविभावभूतस्य वसन्तस्य वर्णनायां कामुकाध्यारोपेण वनस्थलीललनानां कुटिललोहितपलाशकलिकाभिर्नवसंगमयोग्यनखक्षतान्युत्प्रेक्षितानि परमामौचित्यचारुतां प्रतिपादयन्ति ॥

न तु यथास्यैव—

'वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥'

अत्र केवलकर्णिकारकुसुमवर्णनमात्रेण विधातृवाच्यतागर्भेणैव प्रस्तुतशृङ्गारानुपयोगिना तदुद्दीपनविभावोचितं न किंचिदभिहितम् ॥

हास्यरसे यथा मम लावण्यवतीनाम्नि काव्ये—

'सीधुस्पर्शभयान्न चुम्बसि मुखं किं नासिकां गूहसे
रे रे श्रोत्रियतां तनोषि विषमां मन्दोऽसि वेश्यां विना ।
इत्युक्त्वा मदघूर्णमाननयना वासन्तिका मालती
लीनस्यात्रिवसोः करोति बकुलस्येवासवासेचनम् ॥'

अत्र श्रोत्रियस्यात्रिवसोरपवित्रसीधुस्पर्शशङ्कासंकोचनिलीनस्य शुष्कबकुलवृक्षस्येव सरसतापादनाय वेशविलासिन्या यदासवासेचनं तदङ्गभूतशृङ्गाररसाभासस्पर्शेन हासरसस्य वरासवस्येव सहकाररसवेधेन सचमत्कारमौचित्यमाचिनोति ॥

यथा वा मम लावण्यवत्यामेव—

'मार्गे केतकसूचिभिन्नचरणा सीत्कारिणी केरली
रम्यं रम्यमहो पुनः कुरु विटेनेत्यर्थिता सस्मिता ।
कान्ता दन्तचतुष्कबिम्बितशशिज्योत्स्नापटेन क्षणं
धूर्तालोकनलज्जितेव तनुते मन्ये मुखाच्छादनम् ॥'

अत्रापि हास्यरसस्य कुटिलविटनर्मोक्तिवचनौचित्येन शृङ्गाररसाभासाधिवासितस्य सचमत्कारः परः परिपोषः समुन्मिषति ॥

न तु यथा श्यामलस्य—

'चुम्बनसक्तः सोऽस्या दशनं च्युतमूलमात्मनो वदनात् ।
जिह्वामूलप्राप्तं खाडिति कृत्वा निरष्ठीवत् ॥'

अत्र हास्यरसस्य बीभत्सरसाधिवासितस्य लशुनलिप्तस्येव कुसुमशेखरस्यातिजुगुप्सितत्वादनीप्सितस्य परमानौचित्येन चमत्कारस्तिरोहितः । वृद्धापरिचुम्बने जिह्वामूलप्राप्तस्य च्युतदशनस्य कण्ठलोठिनः ष्ठीवनेन बीभत्सस्यैव प्राधान्यम्, न तु हास्यरसस्य ॥

करुणो यथा मम मुनिमतमीमांसायाम्—

'प्रत्यग्रोपनताभिमन्युनिधने हा वत्स हा पुत्रके-
त्यश्मद्रावि सुभद्रया प्रलपितं पार्थस्य यत्तत्पुरः ।
येनोद्बाष्पविमुक्तशष्पकवलैः सेनातुरंगैरपि
न्यञ्चत्पार्श्वगतैककर्णकुहरैर्निःस्पन्दमन्दं स्थितम् ॥'

अत्र प्रत्यग्रोपनतप्रियतरतनयवियोगोपजनितशोकाख्यस्थायिभावोचितं दृषदामपि हृदयद्रावणं सुभद्रया यत्प्रलपितं तदर्जुनचेतसि प्रतिफलितं न केवलमुद्दीप्ततामुपगतं यावत्तिरश्चां तुरंगमाणामप्यन्तः संक्रान्तमुद्बाष्पविमुक्तशष्पकवलनिःस्पन्दस्थितादिभिरनुभावैरुदीर्णतरुणकरुणरसप्रतिपत्तिं किमप्यादधाति ॥

न तु यथा परिमलस्य—

'हा शृङ्गारतरङ्गिणीकुलगिरे हा राजचूडामणे
हा सौजन्यसुधानिधान हहहा वैदग्ध्यदुग्धोदधे ।
हा देवोज्जयिनीभुजंग युवतिप्रत्यक्षकंदर्प हा
हा सद्बान्धव हा कलामृतकर क्वासि प्रतीक्षस्व नः ॥'

अत्र हाहेति हतमहीपतिविरहे तद्गुणामन्त्रणपदैर्वक्तृवक्त्रगत एव शोकः केवलमुपलक्ष्यते । न तु विभावानुभावव्यभिचारिसंयोगेन शोकाख्यस्य स्थायिभावस्योचितं रसीकरणं किंचिन्निष्पन्नम् ॥

रौद्रे यथा भट्टनारायणस्य—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपं
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥'

अत्र क्रूरक्रोधस्थायिभावात्मकस्योन्निद्ररौद्ररसस्योचिता शिशुस्थविर-गर्भगतविशसननिस्त्रिंशकर्माध्यवसायाधिरोहणसंवादिनी द्रोणवधविधुरामर्षविषविषमव्यथाकश्मलशिथिलमश्वत्थाम्नः स्थेमानं प्रतिज्ञापयति ॥

न तु यथा श्रीप्रवरसेनस्य[1]—

'दैणुइन्दरुहिरलग्गे[2] जस्स फुरन्ते णहप्पहाविछड्डे ।
गुप्पन्ती विवलाआ गलिअब्बत्थणंसुए महासुरलच्छी ॥'

अत्र क्रोधव्यञ्जकपदविरहिततया 'दनुजेन्द्ररुधिरलग्ने यस्य नरसिंहस्य स्फुरति नखप्रभासमूहे व्याकुलीभवन्ती विपलायिता गलितस्तनांशुका महासुरलक्ष्मीः' इति वर्णनया रुधिरलग्न इति बीभत्सरससंस्पर्शो व्याकुलीभवन्ती दैत्यश्रीः पलायितेति भयानकरससंकरेण प्रकृतोचितप्रधानभूतस्य रौद्ररसस्य क्वचिन्मुखमपि न दृश्यते ॥

वीरे यथा मम नीतिलतायाम्—

'शौर्याराधितभर्गभार्गवमुनेः शस्त्रग्रहोन्मार्गिणः
संक्षेपेण निवार्य संक्षयमयीं क्षत्रोचितां तीक्ष्णताम् ।
आकर्णायतकृष्टचापकुटिलभ्रूभङ्गसंसर्गिणा
येनान्यायनिषेधिना शममयी ब्राह्मी प्रदिष्टा स्थितिः ॥'

अत्र 'सोऽयं रामः' इति रावणाग्रे शुकसारणाभ्यां दूरान्निर्दिश्यमानस्य रामस्य निःसंरम्भगम्भीरावष्टम्भसंभाव्यमानप्रभावोचितायां शस्त्रसंग्रहोन्मार्गगामिनो भार्गवस्य मुनेः स्वजातिसमुचितस्थित्युपदेशे सति प्रभविष्णुतायां चापरूपभङ्ग्या भ्रूभङ्गः प्रदर्शितः, न तु स्वाभाविकः,

---

१. अयं रावणवधापरनामकसेतुबन्धाख्यप्राकृतकाव्यस्य कर्ता प्रवरसेनः कश्मीरमहाराज आसीत्. १२३ मिते खिस्तसंवत्सरेऽस्य राज्यप्रारम्भ इति बहूनां मतम्. कनिङ्हाममते तु ४३२ मिते खिस्तसंवत्सरे प्रवरसेनराज्यप्रारम्भः. 'कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला । सागरस्य परं पारं कपिसेनेव सेतुना ॥' इति हर्षचरितप्रारम्भे बाणभट्टः. 'महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः । सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥' इति काव्यादर्शे (१।३४) आचार्यदण्डी. २. सेतुबन्धकाव्ये (१।२) 'दनुजेन्द्ररुधिरलग्ने यस्य स्फुरति नखप्रभासमूहे । व्याकुलीभवन्ती विपलायिता गलितस्तनांशुका महासुरलक्ष्मीः ॥' इति च्छाया.

वीरस्य क्रोधे विकारासंभवात् । प्रसन्नमधुरधीरा हि वीरवृत्तिः । तदुचितमत्राभिहितम् । भार्गवाभिभवेन च प्रधाननायकस्योत्कर्षः प्रतिपादितः ॥

यथा वा राजशेखरस्य—

'स्त्रीणां मध्ये सलीलं भ्रमितगुरुगदाघातनिर्नष्टसंज्ञः
सद्यो वध्योऽभवस्त्वं पशुरिव विवशस्तेन राज्ञार्जुनेन ।
तस्य च्छेत्तापि योऽसौ सकलनृपरिपुर्जामदग्न्यो भुजानां
जित्वोच्चैः सोऽपि येन द्विज इति न हतस्तापसस्त्वेष रामः ॥'

अत्र रावणकार्तवीर्यजामदग्न्योत्कर्षोत्किर्षतरसोपानपरम्पराधिरोहणक्रमेण प्रधाननायकस्य प्रतापः परां कोटिमारोपितः ॥

न तु यथा भवभूतेः—

'वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्ततां
युद्धं स्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते ।
यानि त्रीणि कुतोमुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुदमने तत्राप्यभिज्ञो जनः ॥'

अत्राप्रधानस्य रामसूनोः कुमारलवस्य परप्रतापोत्कर्षासहिष्णोर्वीररसोद्दीपनाय सकलप्रबन्धजीवितसर्वस्वभूतस्य प्रधाननायकगतस्य वीररसस्य ताडकादमनखररणापसरणान्यरणसंसक्तवालिव्यापादनादिजनविहितापवादप्रतिपादनेन स्ववचसा कविना विनाशः कृत इत्यनुचितमेतत् ॥

भयानके यथा श्रीहर्षस्य—

'कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन्क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः ।
दत्तातङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः ॥

अपि च ।

नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।

पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥'

अत्राङ्गनानां निशितदशननखशिखोल्लेखातङ्कदानेन प्रचुरतरवानराभिसरणभयसंभ्रान्तान्तःपुरिकवृद्धवामनकिरातकुब्जादीनां पुरुषगणनाविहीनतया धैर्यविरहकातराणामुचितचेष्टानुभाववर्णनया भयानकरससंवादिरुचिरौचित्यमाचकास्ति ॥

न तु यथा राजपुत्रमुक्तापीडस्य[1]—

१४. राजपुत्र मुक्तापीड: श्लो

'नीवारप्रसराग्रमुष्टिकवलैर्यो वर्धितः शैशवे
पीतं येन सरोजपत्रपुटके होमावशेषं पयः ।
तं दृष्ट्वा मदमन्थरालिवलयव्यालोलगल्लं(ण्डं) गजं
सानन्दं सभयं च पश्यति मुहुर्दूरे स्थितस्तापसः ॥'

अत्र गजस्याघातकविकृतचेष्टानुवर्णनाविरहिततया स्थायिभावस्य भयानुभाववर्जितस्य केवलं नाममात्रोदीरणेन च भयानकरसोचितसंभ्रमाभावादुपचितमौचित्यं न किंचिदुपलभ्यते ॥

बीभत्से यथा मम मुनिमतमीमांसायाम्—

'सर्वापायचयाश्रयस्य नियतं कुत्सानिकायस्य किं
कायस्यास्य विभूषणैः सुवसनैरानन्दनैश्चन्दनैः ।
अन्तर्यस्य शकृद्यकृत्कृमिकुलक्लोमान्त्रमालाकुले
क्लेदिन्यन्तदिने प्रयान्ति विमुखाः कौलेयकाका अपि ॥'

अत्र वैराग्यवासनाच्छुरितबीभत्सरसस्य जुगुप्साख्यस्थायिभावोचितकायगतकुत्सिततरान्त्रतन्त्रादिसमुदीरणेन परा परिपुष्टिर्निःसारशरीराभिमानवैरस्यजननी प्रतिपादिता ॥

न तु यथा चन्दकस्य—

'कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः
क्षुधाक्षामो रूक्षः पिठरककपालार्दितगलः ।

१. मुक्तापीड इति कश्मीरमहीपतेर्ललितादित्यस्य नामान्तरम्. सुभाषितावलावयं श्लोको भश्रुनाम्ना लिखितः. कदाचिन्मुक्तापीडस्यैव बाल्यावस्थोचितं भश्रुरिति नाम स्यात्.

व्रणैः पूतिक्लिन्नैः कृमिपरिवृतैरावृततनुः
शुनीमन्वेति श्वा तमपि मदयत्येष मदनः ॥'

अत्राशुचिचर्वणरुचेरुपचितविचिकित्सकुत्सानिकायकायस्य स्वभावजुगुप्सितयोनेः शुनकस्य किमेतैर्बीभत्सविशेषणैरतिशयनिर्बन्धानुबद्धैरधिकमुद्भासितम् । एतैरेव पुरुषगतैर्जुगुप्सा परं गौरवमावहति ॥

अद्भुते यथा चन्दकस्य—

'कृष्णेनाम्ब गतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब पश्याननम् ।
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जग-
न्माता यस्य जगाम विस्मयपदं पायात्स वः केशवः ॥'

अत्र पाण्डुराङ्गकरसाक्षिलक्षितमृद्भक्षणाक्षेपोद्यतजननीभयचकितस्यापह्नवकारिणः शिशोर्विकासितास्यस्यान्तः समस्तजगद्दर्शनेन मातुश्च तत्प्रभावानभिज्ञतया वात्सल्यविह्वलाया विस्मयगमनेनात्युचितोऽयमद्भुतातिशयः ॥

न तु यथा मम मुनिमतमीमांसायाम्—

'समस्ताश्चर्याणां जलनिधिरपारः स वसति-
स्ततोऽप्याश्चर्यं यत्पिबति सकलं तं किल मुनिः ।
इदं त्वत्याश्चर्यं लघुकलशजन्मापि यदसौ
परिच्छेत्तुं को वा प्रभवति तवाश्चर्यसरणिम् ॥'

अत्रापारसरित्पतिप्रभावेण मुनिना तस्यैकचुलकाचमनेन मुनेश्च लघुकलशजन्मना क्रमाक्रान्तिसमारूढोऽप्यसमविस्मयमयोऽयमद्भुतप्रसरः संसारस्यैवंविधैवाश्चर्यसरणिरपरिच्छिन्ना न किंचिदेतत्कौतुकमित्यर्थान्तरन्याससामर्थ्येन सहसैवावरोपित इव तिरोभूततामुपगतः ॥

शान्ते यथा मम चतुर्वर्गसंग्रहे—

'भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं
दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयम् ।
माने म्लानिभयं जये रिपुभयं काये कृतान्ताद्भयं
सर्वं नाम भवे भवेद्भयमहो वैराग्यमेवाभयम् ॥'

अत्र सकलजनाभिमतभोगसुखवित्तादीनां भयमयतया हेयतां प्रतिपाद्य वैराग्यमेव सकलभयायासशमनमुपादेयतया यदुपन्यस्तं तेन शान्तरसस्य निरर्गलमार्गावतरणमुचिततरमुपदिष्टं भवति ॥

यथा वा मम मुनिमतमीमांसायाम्—

'कुसुमशयनं पाषाणो वा प्रियं भवनं वनं
प्रतनु मसृणस्पर्शं वासस्त्वगप्यथ तारवी ।
सरसमशनं कुल्माषो वा धनानि तृणानि वा
शमसुखसुधापानक्षैब्ये समं हि महात्मनाम् ॥'

अत्र सकलविकल्पतल्परहिताभेदावभासमानात्मतत्त्वविश्रान्तिजनितसर्वसाम्यसमुल्लसितशमसुखपीयूषपानोदितनित्यानन्दघूर्णमानमानसानां प्रियाप्रियसुखदुःखादिषु महतां सदृशी प्रतिपत्तिरिति जीवन्मुक्तिसमुचितमभिहितम् ॥

न तु यथा श्रीमदुत्पलराजस्य[1]—

'अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित्पुण्यारण्ये शिवशिवशिवेति प्रलपतः ॥'

अत्र जीवन्मुक्तोचितं प्रियाप्रियरागद्वेषोपशमलक्षणमोक्षक्षमं सर्वसाम्यमहिहारसुहृदरिसमदृष्टिरूपमभिदधता क्वचित्पुण्यारण्ये यदभिहितं तद्विकल्पप्रतिपादकमभेदवासनाविरुद्धमनुचितमवभासते । धाराधिरूढसर्वसाम्यविगलितभेदाभिमानग्रन्थेर्हि सर्वत्र सर्वं शिवमयं पश्यतस्तपोवने नगरावस्करकूटे च विमलात्मलाभतृप्ततया समानदृशः क्वचित्पुण्यारण्यादिवचनमनुचितोच्चारणमेव ॥

यथा मधुरतिक्ताद्या रसाः कुशलयोजिताः ।
विचित्रास्वादतां यान्ति शृङ्गाराद्यास्तथा मिथः ॥ १७ ॥

---

१. अभिनवगुप्ताचार्यस्य परमगुरुः प्रत्यभिज्ञासूत्राद्यनेकग्रन्थकर्ता श्रीमदुत्पलराजः ख्रिस्तसंवत्सरीयदशमशतकस्य पूर्वार्धं एव कश्मीरदेशे आसीत्.

तेषां परस्पराश्लेषात्कुर्यादौचित्यरक्षणम् ।
अनौचित्येन संस्पृष्टः कस्येष्टो रससंकरः ॥ १८ ॥

रसाः कटुकमधुराम्ललवणाद्याः कुशलसूदेन वेसवारपानादिषु योजिता विचित्रास्वादतामुपयान्ति तथैव परस्परमविरुद्धाः शृङ्गारादय इति । तेषामन्योन्यमङ्गाङ्गिभावयोजनायामौचित्यस्य जीवितसर्वस्वभूतस्य रक्षां कुर्यात् । अनौचित्यरजसा रससंयोगः स्पृष्टो न कस्यचिदभिमत इत्यर्थः ॥

रससंकरौचित्ये शान्तशृङ्गारयोरङ्गाङ्गिभावो यथा भगवतो महर्षेर्व्यासस्य—

'सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।
किं तु मत्ताङ्गनापाङ्गभङ्गिलोलं हि जीवितम् ॥'

अत्र भगवता जन्तुहिताभिनिविष्टेन मोक्षक्षमोपदेशेऽङ्गिनः शान्तरसस्य रागिजनानिष्टत्वात्सकलजनमनःप्रह्लादने बालगुडजिह्विकया शृङ्गारेऽङ्गभावमुपनीते पर्यन्ते शान्तस्यैव लोलं जीवितमित्यनित्यताप्रतिपादनपरिनिर्वाहेण परममौचित्यमुच्चैः कृतम् ॥

बीभत्सशृङ्गारयोरङ्गाङ्गिभावो यथा मम बौद्धावदानकल्पलतायाम्—

'क्षीबस्येवाचलस्य द्रुतहृतहृदया जम्बुकी कण्ठसक्ता
रक्ताभिव्यक्तकामा कमपि नखमुखोल्लेखमासूत्रयन्ती ।
आस्वाद्यास्वाद्य यूनः क्षणमधरदलं दत्तदन्तव्रणाङ्कं
लग्नानङ्गक्रियायामियमतिरभसोत्कर्षमाविष्करोति ॥'

अत्र श्लेषोपमया तुल्यकक्षाधिरूढयोरपि परस्परविरुद्धयोरर्थयोर्बीभत्सशृङ्गाराङ्गाङ्गिभावयोजनायां जम्बुकी तरुणशवस्य क्षीबस्येव निश्चलस्थितेः सहसैव हृतहृदयपद्मा कृष्टचित्ता वा, कण्ठे लग्ना शोणिते भृशमभिव्यक्तस्पृहा रक्ताभिव्यक्तकामा वा, नखोल्लेखमासूत्रयन्ती दत्तदन्तव्रणमधरमास्वाद्यास्वाद्याङ्गच्छेदक्रियायामनङ्गभोगक्रियायां वा, लग्ना गात्राणामूर्ध्वगतं कर्षणं रतकौशलोत्कर्षं वा, प्रकाशयतीति समानयोर्बीभत्सशृङ्गारयोः कामिनीपदपरित्यागेन केवलं जम्बुक्याः कर्तृत्वेन बीभत्स-

स्यैव प्राधान्ये शृङ्गारेऽङ्गतामुपगते वक्तुर्बोधिसत्त्वस्यान्तर्गतगाढवैराग्यवासनाधिवासितचेतसः कुत्साईजुगुप्सया नितम्बिनीरतिविडम्बनमौचित्यरुचिरतामादधाति । यद्यप्यत्र महावाक्ये शान्तस्यैव प्राधान्यं तथाप्युदाहरणश्लोकवाक्ये बीभत्सस्यैव ॥

वीरकरुणयोर्यथा मम मुनिमतमीमांसायाम्—

'गाण्डीवस्रुवमार्जनप्रणयिनः स्नातस्य बाष्पाम्बुभि-
श्चण्डं खाण्डवपावकादपि परं शोकानलं बिभ्रतः ।
जिष्णोर्नूतनयौवनोदयदिनच्छिन्नाभिमन्योश्चिरं
हा वत्सेति बभूव सैन्धववधारब्धाभिचारे जपः ॥'

अत्र त्रिगर्तसङ्ग्रामगतस्य गाण्डीवधन्वनः शत्रुभिर्नवयौवनोदयसमयनिहततनयस्य कार्मुकस्रुवमुन्मार्जयतः प्रसरदश्रुस्नातस्य शोकाग्निमुद्वहतश्चिरं हा पुत्रेति जयद्रथवधारब्धाभिचारे जपो बभूवेति यदुपन्यस्तं तेनारिक्षये दीक्षासमुचितव्रतवर्णनया शोकाग्नेश्चण्डत्वेन खाण्डवपदोदीरणेन वीररसस्याङ्गिनः सहसैवागन्तुके करुणरसे प्रज्वलिते सैन्धववधारब्धाभिचाराभिधानेन पर्यन्ते शौर्यनिर्वाहेण परममौचित्यमुज्जृम्भते ॥

शान्तशृङ्गारकरुणबीभत्सानां यथा मम तत्रैव—

'तीक्ष्णान्तस्त्रीकटाक्षक्षतहृदयतया व्यक्तसंसक्तरक्ताः
क्रोधादिक्रूररोगव्रणगणगणनानीततीव्रव्यथार्ताः ।
स्नेहक्लेदातिलग्नैः कृमिभिरिव सुतैः स्वाङ्गजैर्भक्ष्यमाणाः
संसारक्लेशशय्यानिपतिततनवः पश्य सीदन्ति मन्दाः ॥'

अत्र मुख्यस्याङ्गिनः शान्तरसस्यैवोद्दीपने कारणीभूतास्तीक्ष्णान्तस्त्रीकटाक्षक्षतहृदयव्यथार्तस्नेहक्लेदातिलग्नकृमितुल्यतनयादिपदोपादानेन शृङ्गारकरुणबीभत्साः शान्तमुखप्रेक्षिणः संलीनतया स्तिमितवृत्तयो भृत्या इव परममौचित्यं दर्शयन्ति ॥

रससंकरस्यानौचित्यमुद्भावयितुमाह । शृङ्गारशान्तयोर्यथामरकस्य—

'गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा १६. अमरकः कविः
द्वित्राण्येव पदानि तिष्ठतु भवान्पश्यामि यावन्मुखम् ।

संसारे घटिकाप्रणालविगलद्धारा समे जीविते
को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः ॥'

अत्र प्रकरणवर्तिनः शृङ्गाररसस्य पश्यामि यावन्मुखमित्युत्कण्ठोत्कण्ठासमुज्जृम्भमाणस्य स्वभावविरोधिनि शान्तेऽङ्गभावमुपनीते विस्तीर्णतरानित्यतावर्णनया वैराग्येण रतेर्न्यग्भावमापादयन्त्याप्रधानरससंबन्धेनाधिकमनौचित्यमुत्साहितम् । निःसारसंसाराचारुताश्रवणेन हि कठिनक्रियाक्रूरचेतसामप्युत्साहभङ्गादङ्गान्यलसीभवन्ति, किमुत कुसुमसुकुमारशृङ्गाररसकोमलमनसां विलासवताम् । प्रान्ते च शान्तपरिपोषनिर्वाहेण रागवैरस्यमेव पर्यवस्यति । तदुक्तमानन्दवर्धनेन—'विरोधी वाविरोधी वा रसोऽङ्गिनि रसान्तरे । परिपोषं न नेतव्यस्तेन स्यादविरोधिता ॥' तदेवात्र वैपरीत्येनोपलभ्यते परिपोषविपरीते स्वभावविरोधिन्यपि प्रधानानुपरोध एव ॥

यथा राजशेखरस्य—

'माणं मुंचध देह वल्लहजणे दिट्ठिं तरंगुत्तरं
तारुण्णं दिअहाइं पंच दह वा पीणत्थणत्थंभणं ।
इत्थं कोइलिमंजुसिंजिणमिसाद्देवस्स पंचेसुणो
दिण्णा चित्तमहूसवेण सहसा आणव्व सव्वंकसा ॥'[1]

अत्र 'मानं मुञ्चत ददत वल्लभजने दृष्टिं तरङ्गितां तारुण्यं दिनानि पञ्च दश वा पीनस्तनस्तम्भनमित्थं कोकिलमधुरध्वनिव्याजेन देवस्य पञ्चेषोश्चैत्रमहोत्सवेनाज्ञेव सर्वंकषा दत्ता' इति वाक्ये मुख्यः शृङ्गाररसः प्रारम्भपर्यन्तव्याप्तिशाली कतिपयदिवसस्थायि यौवनमित्यनित्यतारूपशान्तरसबिन्दुना मध्यत्रुडितेनेव विरसतां न नीतः । विरुद्धस्य परिपोषाभावात् । विरुद्धवर्णनोदितेन ह्यनौचित्येन स्थायी कुञ्जर इव श्वभ्रपातितः पुनरुत्थातुं

---

१. 'मानं मुञ्चत ददत वल्लभजने दृष्टिं तरङ्गोत्तरां तारुण्यं दिवसानि पञ्च दश वा पीनस्तनस्तम्भनम् । इत्थं कोकिलमञ्जुशिञ्जितमिषाद्देवस्य पञ्चेषोर्दत्ता चैत्रमहोत्सवेन सहसाज्ञेव सर्वंकषा ॥' इति च्छाया.

नोत्सहत इत्यलं विस्तरेण । अनया दिशा रससंकरे भेदप्रपञ्चौचित्यं विपश्चिद्भिः स्वयं विचार्यम् ॥

रसौचित्यविचारानन्तरमुद्देशानुसारक्रमेण क्रमोपगतं क्रियापदौचित्यं दर्शयितुमाह—

सगुणत्वं सुवृत्तत्वं साधुता च विराजते ।
काव्यस्य सुजनस्येव यद्यौचित्यवती क्रिया ॥ १९ ॥

काव्यस्य माधुर्यादिगुणवत्ता वसन्ततिलकादिसुवृत्तता परिपूर्णलक्षणसाधुता च विराजते, यद्यौचित्ययुक्तं क्रियापदं भवति । सुजनस्येवेति तत्तुल्यत्वं स्पष्टार्थमेव ॥

क्रियापदौचित्यं यथा मम नीतिलतायाम्—

'यः प्रख्यातजवः सदा स्थितिविधौ सप्ताब्धिसंध्यार्चने
दोर्दर्पेण निनाय दुन्दुभिवपुर्यः कालकंकालताम् ।
यः पातालमसृङ्मयं प्रविदधे निष्पिष्य मायाविनं
सुग्रीवाग्र्यविभूतिलुण्ठनपटुर्वाली स किं स्मर्यते ॥'

अत्र सप्ताब्धिसंध्यार्चनप्रख्यातजवो महिषरूपदुन्दुभिदानवोन्माथी मायाविदानवनिष्पेषोद्भूतशोणितपूरितपातालतलः स किं वाली स्मर्यत इति क्रियापदेन शुकसारणाभ्यां रावणस्य दुर्नयाभिनिवेशिनस्तद्गिरामाय हितोपदेशेन भवान्वसनकोणनियमिततनुः कक्षायां निःक्षिप्त इत्युचितयुक्तियुक्तमुक्तं भवति ॥

न तु यथा श्रीप्रवरसेनस्य—

'सग्गं[1] अपारिजाअं कोत्थुहलच्छिरहिअं महुमहस्स उरं ।
सुमिरामि महणपुरओ अमुद्धअन्दं हरअडापब्भारं ॥'

अत्र जाम्बुवताभिधीयमाने 'स्वर्गमपारिजातं कौस्तुभलक्ष्मीभ्यां विरहितं मधुमथनस्योरः स्मराम्यमृतमथनपुरतोऽप्यबालचन्द्रं हरजटाप्राग्भारम्'

---

१. सेतुबन्धे (४।२०) 'स्वर्गमपारिजातं कौस्तुभलक्ष्मीरहितं मधुमथनस्योरः । स्मरामि मथनपुरतोऽमुग्धचन्द्रं च हरजटाप्राग्भारम् ॥' इति च्छाया.

इति प्रगुणगुणाख्यानप्रसङ्गे क्रियापदेन जराजर्जरशरीरत्वमात्रमेव प्रतिपादितम् । न तु पौरुषोत्कर्षविशेषातिशयः कश्चिदुचितः संसूचितः ॥

कारकौचित्यं दर्शयितुमाह—

सान्वयं शोभते वाक्यमुचितैरेव कारकैः ।
कुलाभरणमैश्वर्यमौदार्यचरितैरिव ॥ २० ॥

उचितैरेव कारकैः सदन्वयवद्वाक्यं विराजते सद्वंशभूषितमैश्वर्यं सच्चरितैरिव ॥

कर्तृपदौचित्यं यथा भट्टबाणस्य—

'स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥'

अत्र शत्रुस्त्रियो व्रतं चरन्तीति वक्तव्ये, स्तनयुगं बाष्पसलिलस्नातं शोकाग्निसमीपवर्ति विमुक्तभोजनं विगतमुक्ताहारं च सद्व्रतं चरतीत्युक्ते कर्तृपदमौचित्यमुपचितं जनयति ॥

न तु यथा परिमलस्य—

'आहारं न करोति नाम्बु पिबति स्त्रैणं न संसेवते
शेते यत्सिकतासु मुक्तविषयश्चण्डातपं सेवते ।
त्वत्पादाब्जरजःप्रसादकणिकालोभोन्मुखस्तन्मरौ
मन्ये मालवसिंह गुर्जरपतिस्तीव्रं तपस्तप्यते ॥'

अत्र गुर्जरपतिर्विद्रुतो मरुगहनं प्रविष्टः परित्यक्ताहारादिसमस्तविषयश्चण्डातपोपसेवी तपश्चरतीति यदुक्तं तत्कर्तृपदस्य विशेषाभिप्रायोचितं न किंचिदुपलक्ष्यते शत्रुत्रासतरलतया मरुकान्तारान्तरावसन्नः सकलविषयसुखभोगपरिभ्रष्टः किमन्यत्कुरुताम् । स्तनयुगवत्कर्तृपदस्य चमत्कारोचितं न किंचिदभिहितम् ॥

कर्मपदौचित्यं यथा मम लावण्यवत्याम्—

'सदा सक्तं शैत्यं विमलजलधारापरिचितं
घनोल्लासः क्ष्माभृत्पृथुकटकपाती वहति यः ।

विधत्ते शौर्यश्रीश्रवणनवनीलोत्पलरुचिः
स चित्रं शत्रूणां ज्वलदनलतापं भवदसिः ॥'

अत्र निश्चलममलजलधारागतं शैत्यं तैक्ष्ण्यं शीतलत्वं च, घनोल्लासो निबिडोत्साहः पर्जन्यतुल्योदयश्च, क्ष्माभृतां सानुसैन्यनिपाती वहति स शौर्यश्रीश्रवणनवनीलोत्पलतुल्यस्त्वत्खड्गश्चित्रं शत्रूणां संतापं करोतीति यदुक्तं तत्कर्मभूतस्य तापस्य शिशिरतरसामग्रीजन्मनः परं वैचित्र्यं रुचिरमौचित्यमासूत्रितम् ॥

न तु यथा ममैवावसरसारे—

'भग्नाहितश्वसितवातविबोध्यमानः
काष्ठाश्रयेण सहसैव विवृद्धिमाप्तः ।
तापं तनोति निहतारिविलासिनीनां
वह्निद्युतिर्भुवननाथ भवत्प्रतापः ॥'

अत्र विद्रुताराातिनिःश्वसितानिलप्रबोध्यमानः काष्ठाश्रयेण दिक्चक्रपूरणेन प्रौढतां प्राप्तः पावकतुल्यस्त्वत्प्रतापः शत्रुकान्तानां तापमात्रं तनोतीति तत्समुचितमाश्चर्यं न किंचित् ॥

करणौचित्यं यथा गौडकुम्भकारस्य—

'लाङ्गूलेन गभस्तिमान्वलयितः प्रोतः शशी मौलिना
व्याधूता जलदाः सटाभिरुडवो दंष्ट्राभिरुत्तम्भिताः ।
प्रोत्तीर्णो जलधिर्दृशैव हरिणा स्वैराट्टहासोर्मिभि-
र्लङ्केशस्य च लङ्घितो दिशि दिशि प्राज्यः प्रतापानलः ।

अत्र हरिणा हनुमता जलनिधितरणे तरणिर्लाङ्गूलेन वलयितः किरीटप्रान्तेन शशी प्रोतः सटाभिर्मेघा व्याधूतास्तारा दंष्ट्राभिरायासितास्तीर्णोऽब्धिर्दृष्ट्यैवाट्टहासतरङ्गैर्लङ्केशस्य विस्तीर्णः प्रतापाग्निः शमित इति बहुभिः करणपदैरुत्साहाधिवासितैर्विस्मयशिखरारोहणसोपानैरिव रघुपतिप्रभावारम्भविजयध्वजायमानस्य पवनसूनोरौचित्यातिशयः प्रकाशितः ॥

न तु यथा भट्टबाणस्य—

'जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः क्षणलब्धलक्षया ।
दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम् ॥'

अत्र भगवतो नृसिंहस्य कोपरक्तया दृष्ट्यैव क्षणलब्धलक्षया हिरण्यकशिपोर्वक्षः स्वयं भयाद्भिन्नमिवेति यदुक्तं तन्महोत्साहपराक्रमस्य प्रतिनायकस्य रिपोः प्रधाननायकप्रतापोद्दीपनोपकरणीभूताधिकधैर्यस्य स्वयं भयविह्वलतया हृदयस्फुटनमित्युपचितमनौचित्यं 'दृशैव' करणपदस्य शिरसि विश्रान्तम् ॥

संप्रदानौचित्यं यथा भट्टप्रभाकरस्य[1]—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥'

अत्र दिग्गजचतुरस्रा भूः साध्यते, सा च सिद्धा हेलयैवान्नमुष्टिरिवैकस्मै विप्रमात्राय प्रतिपाद्यत इति निरतिशयौदार्याश्चर्यचमत्काररुचिरौचित्यचर्वणया वयं रोमाञ्चार्चिताः पश्यत, रोमाञ्चस्य प्रत्यक्षपरिदृश्यमानत्वात् । किमपरमपूर्वत्यागिने भार्गवाय तस्मै नम इति विप्रायेति संप्रदानपदगत एवोत्कर्षविशेषः प्रकाशते ॥

न तु यथा राजशेखरस्य—

'पौलस्त्यः प्रणयेन याचत इति श्रुत्वा मनो मोदते
देयो नैष हरप्रसादपरशुस्तेनाधिकं ताम्यति ।
तद्वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम् ॥'

अत्र रावणदूतेन परशुं याचितो भार्गवो ब्रूते—'नैष हरप्रसादलब्धः परशुर्दानयोग्यः । तत्तस्मादस्मद्वचसा स दशग्रीवो वाच्यः, पृथ्वी मया कश्यपाय प्रतिपादिता । तुभ्यं पातालत्रिदिवयोर्मध्यात्किं निर्जित्य दीयताम्'

[1] कश्चन सुप्रसिद्धो मीमांसको भट्टप्रभाकर आसीत्, यस्य गुरुरिति नामान्तरम्.

इत्यनुचितं मुनेर्लोकहितप्रवृत्तस्य त्रैलोक्यकण्टकभूताय राक्षसाय भुवनप्रतिपादनम् ॥

अपादानौचित्यं यथा मालवरुद्रस्य—

'एतस्माज्जलधेर्मिताम्बुकणिकाः काश्चिद्गृहीत्वा ततः
पाथोदाः परिपूरयन्ति जगतीं रुद्धाम्बरा वारिभिः ।
भ्राम्यन्मन्दरकूटकोटिघटनाभीतिभ्रमत्तारकां
प्राप्यैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः ॥'

अत्र यदुक्तमेतस्मान्महोदधेः परिमिताम्बुकणिकाः प्राप्य जलदा जगत्पूरयन्ति तथा भ्रमन्मन्दरकूटकोटिसंघट्टत्रासतरलतारकामेकां जलमानुषीं श्रियं प्राप्य श्रीमानच्युतोऽभूदिति तेन सागरगतनिरतिशयोत्कर्षविशेषः प्रदर्शितः । एतस्माज्जलधेरित्येतत्पदमौचित्यस्य मूलभूमिः ॥

न तु यथा भट्टेन्दुराजस्य—

'आदाय वारि परितः सरितां मुखेभ्यः
किं नाम साधितमनेन महार्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालमूलकुहरे विनिवेशितं च ॥'

अत्र महार्णवव्यपदेशेनान्यायोपार्जितद्रविणदुर्व्ययकारिणः भागविमुखस्य कस्यचिदुच्यते । सरितां मुखेभ्यः समन्तात्तोयमादायापात्रेभ्यः प्रतिपादितं दूषितम् । यत्त्वत्र सरिद्भ्यः समादायेति वक्तव्ये सरिन्मुखेभ्य इति यदुक्तं मुखशब्दस्य नैरर्थक्यादत्रानौचित्यमेव पर्यवस्यति ॥

अधिकरणौचित्यं यथा कुन्तेश्वरदौत्ये कालिदासस्य—[1]

'इह निवसति मेरुः शेखरः क्ष्माधराणामिह विनिहितभाराः सागराः सप्त चान्ये ।
इदमहिपतिभोगस्तम्भविभ्राज्यमानं
धरणितलमिहैव स्थानमस्मद्विधानाम् ॥'

१. प्रसिद्धेषु कालिदासग्रन्थेष्वयं श्लोको न प्राप्तः.

अत्र महाराजदूतोऽपि सामन्तास्थाने स्वप्रभुसमुचितगौरवपूजार्हमासनमनासाद्य कार्यवशेन भूमावेवोपविष्टः प्रागल्भ्यगाम्भीर्येणैवं ब्रूते यथासद्विधानां वसुधातल एव भुजगपतिभोगस्तम्भप्राग्भारनिष्कम्पे धरासने स्थानं युक्तं यस्मादिहैव मेरुरचलचक्रवर्ती समुपविष्टः सप्तमहाब्धयश्च तत्तुल्यतैवास्माकमित्यौचित्यमधिकरणपदसंबद्धमेव ॥

न तु यथा परिमलस्य—

'तत्र स्थितं स्थितिमतां वर देव दैवा-
द्भृत्येन ते चकितचित्तमियन्त्यहानि ।
उत्कम्पिनि स्तनतटे हरिणेक्षणानां
हारान्प्रवर्तयति यत्र भवत्प्रतापः ॥'

अत्र त्वद्भृत्येन मया तत्र तस्मिन्देशे स्थितं यत्र भवत्प्रतापः कम्पतरलस्तनतटे हरिणदृशां हारान्प्रवर्तयतीति यदुक्तं तेन शौर्यशृङ्गारगुणोत्कर्षस्तुतौ सर्वतो दिग्गमनाविच्छिन्नप्रसरः प्रतापः पारिमित्यं प्राप्तः । एकत्र परिच्छिन्ने देशे मया तत्र स्थितं यत्र त्वत्प्रतापस्तरुणीस्तनतटेषु हारतरलनं करोत्यन्यदेशे विलक्षणमुपलक्षणम् । सर्वगतश्चेत्प्रतापस्तत्सर्वत्रैव मया स्थितमिति वक्तव्ये तत्रेत्येकदेशाभिधायि पदं नोपपाद्यते । दस्युमात्रस्याप्येकदेशे जृम्भमाणप्रतापत्वात् । तदत्राधिकरणपदगतमनौचित्यमुपलभ्यते । तत्र तत्र मया स्थितं यत्र यत्र भवत्प्रताप इत्येव स्तुत्युचितं युक्तमुक्तं स्यात् ॥

लिङ्गौचित्यं दर्शयितुमाह—

उचितेनैव लिङ्गेन काव्यमायाति भव्यताम् ।
साम्राज्यसूचकेनेव शरीरं शुभलक्ष्मणा ॥ २१ ॥

प्रस्तुतार्थोचितेन लिङ्गेन काव्यं भव्यतामुपयाति, राजलक्षणेनेव शरीरम् ॥

यथा मम ललितरत्नमालायाम्—

'निद्रां न स्पृशति त्यजत्यपि धृतिं धत्ते स्थितिं न क्वचि-
द्दीर्घा वेत्ति कथां व्यथां न भजते सर्वात्मना निर्वृतिम् ।

तेनाराधयता गुणस्तव जपध्यानेन रत्नावलीं
निःसङ्गेन पराङ्गनापरिगतं नामापि नो सह्यते ॥'

अत्र वत्सेश्वरस्य रत्नावलीविरहविधुरचेतसः स्मरावस्थासमुचितं विदूषकेण सुसंगतायै यदभिहितं निद्रां न स्पृशति, धृतिं त्यजति, स्थितिं न धत्ते, दीर्घां कथां व्यथामिव वेत्ति, निर्वृतिं न भजते, तां विना तेन तद्गुणजापिना तद्ध्याननित्येन जनसङ्गत्यागिनान्यासामङ्गनानां नाममात्रमपि न सह्यते । स्थितिधृतिकथानिर्वृतीनां स्त्रीलिङ्गाभिधानेनाङ्गत्वाध्यारोपेण परममौचित्यं प्रतिपादितम् ॥

न तु यथा मम नीतिलतायाम्—

'वरुणरणसमर्था स्वर्गभङ्गैः कृतार्था
यमनियमनशक्ता मारुतोन्माथसक्ता ।
धनदनिधनसज्जा लज्जते मर्त्ययुद्धे
दहनदलनचण्डा मण्डली मद्भुजानाम् ॥'

अत्र रावणः कपिनिकारामर्षविषमविकाराविष्कारोचितं ब्रूते । वरुणादिलोकपालविशालबलावलेपविप्लवकारिणी मर्त्यमात्रयुद्धे लज्जते प्रचण्डा मद्भुजमण्डलीति स्त्रीलिङ्गेन निर्देशस्त्रैलोक्यविजयोर्जितस्य प्रतापस्य कठोरतामपहरन्ननौचित्यं सूचयति ॥

वचनौचित्यं दर्शयितुमाह—

उचितैरेव वचनैः काव्यमायाति चारुताम् ।
अदैन्यधन्यमनसां वदनं विदुषामिव ॥ २२ ॥

उचितैरेकवचनद्विवचनबहुवचनैः काव्यं चारुतामायाति । अदैन्यौदार्यचेतसां विदुषामिव वदनमयाच्ञारुचिरैरौचित्यचारुभिर्वचोभिः ॥

यथा मम नीतिलतायाम्—

'त्रैलोक्याक्रमणैर्वराहविजयैर्निःसंख्यरत्नाप्तिभिः
प्रख्यातः स्वरसस्वयंवरशतैर्युद्धाब्धिमध्ये श्रियः ।
साश्चर्यैर्बलिबन्धनैश्च बहुभिर्नित्यं हसत्युत्थितः
पौलस्त्यः सकृदुद्यमश्रमवशाद्व्यासक्तनिद्रं हरिम् ॥'

अत्र शुकसारणाभ्यां रघुपतेरग्रे दशग्रीवपराक्रमेऽभिधीयमाने यदुक्तं पौलस्त्यः शेषशायिनं हरिमेकवारोद्योगश्रमवशेन संसक्तालस्यनिद्रमेक-त्रैलोक्याक्रमणैर्वराहविजयिनां सुभटानां जयैरनेकरत्नप्राप्तिभिः समरस-मुद्रमध्ये बहुवारविहितैः श्रियः स्वयंवरशतैर्बलिनां च लोकपालानां ब-न्धनैः प्रख्यातः सदोत्थितः सोत्साहः सततं हसतीति बहुवचनैरेव हरि-वैलक्षण्यलक्षणमुपचितमौचित्यमुदञ्चितम् ॥

न तु यथा मातृगुप्तस्य[1]—

'नायं निशामुखसरोरुहराजहंसः
कीरीकपोलतलकान्ततनुः शशाङ्कः ।
आभाति नाथ तदिदं दिवि दुग्धसिन्धु-
डिण्डीरपिण्डपरिपाण्डु यशस्त्वदीयम् ॥'

अत्र नायं शशी, त्वदीयमिन्दुदुग्धाब्धिफेनपिण्डपाण्डुरं यश इति यदभिहितं तदविच्छिन्नप्रसराणां यशसां बहुवचनेन वर्णनायां समुचिता-नामेकवचनोपन्यासश्चन्द्रबिम्बाकारेण पिण्डमात्रपरिच्छिन्नतया संकोच-रूपमनौचित्यमुद्भावयति ॥

विशेषणौचित्यं दर्शयितुमाह—

विशेषणैः समुचितैर्विशेष्योऽर्थः प्रकाशते ।
गुणाधिकैर्गुणोदारः सुहृद्भिरिव सज्जनः ॥ २३ ॥

काव्ये विशेष्योऽर्थः समुचितैरेव विशेषणैः शोभां लभते । गुणोदारः साधुर्यथाभ्यधिकगुणैः सुहृद्भिः ॥

यथा मम मुनिमतमीमांसायाम्—

'चैत्रे सूत्रितयौवनान्युपवनान्यामोदिनी पद्मिनी
ज्योत्स्नाप्रावरणानि रत्नवलभीहर्म्याणि रम्याः स्त्रियः ।

---

१. षड्वर्षपर्यन्तमयं ब्राह्मणः कश्मीरदेशराज्यं कृतवान्. उज्जयिनीप्रभुणा हर्षापरनाम्ना विक्रमादित्येनास्मै कश्मीरराज्यं वितीर्णमित्यादिकथा राजतरङ्गिण्यां तृतीयतरङ्गे द्रष्टव्या.

सर्वं चारुतरं न कस्य दयितं यस्मिंस्तु तद्भुज्यते
तन्मृन्निर्मितमामभाजनमिव क्षिप्रक्षयं जीवितम् ॥'

अत्र युधिष्ठिरस्यासादितमहाविभूतेर्मयनिर्मितमणिमयसभाभिमानिनो विभवप्रभावे वर्ण्यमाने सकलभावाभावस्वरूपाभाववादोपदेशिनो महामुनेराशयविचारावसरे यदुक्तं कुसुमसमयसमुपचितयौवनान्युपवनानि मकरन्दामोदसुन्दरारविन्दिनी ज्योत्स्नापटप्रावृतानि रत्नवलभीहर्म्याणि रमणीया रमण्यश्चेति सर्वमेतच्चारुतरं सर्वस्याभिमतम्। किं तु यस्मिन्भुज्यते तज्जीवितमामम्मृत्पात्रनिःसारं क्षिप्रक्षयमिति तद्विशेष्यपदोत्कर्षकारिविशेषणपदोन्दितसौन्दर्येण पर्यन्तनिःसारतानिर्वेदसंवादि स्फुरदौचित्यमातनोति ॥

न तु यथा भट्टलट्टनस्य[१]— २२ भट्ट लट्टन: कवि:

'ग्रीष्मं द्विषन्तु जलदागममर्थयन्तां
ते संकटप्रकृतयो विकटास्तडागाः।
अब्धेस्तु मुग्धशफरीचटुलाचलेन्द्र-
निष्कम्पकुक्षिपयसो द्वयमप्यचिन्त्यम् ॥'

अत्र ग्रीष्मं द्विषन्तु, मेघागमं संकटस्वभावा विकटा विस्तीर्णाश्च तडागाः प्रार्थयन्ताम्, महाब्धेस्तु बालशफरीलोलाचलेन्द्रनिश्चलकुक्षिपयसो ग्रीष्मघनागमावप्यगणनीयाविति यदुक्तम्, तत्र तडागविशेषणयोः संकटविकटपदयोः परस्परविरुद्धार्थयोरनौचित्यं स्पष्टमवभासते। संकटस्वभावस्य हि विकटत्वं विस्तीर्णत्वं नोपपद्यते। अथ स्वभावे संकटत्वमाकारे विपुलत्वं तदपि तटाकस्य निश्चेतनस्य स्वभावाभावादनुपपन्नमेव ॥

उपसर्गौचित्यं दर्शयितुमाह—

योग्योपसर्गसंसर्गैर्निरर्गलगुणोचिता।
सूक्तिर्विवर्धते संपत्सन्मार्गगमनैरिव ॥ २४ ॥

उचितैः प्रादिभिरुपसर्गैः सूक्तिरुन्नतिमासादयति। विभूतिरिव सन्मार्गगमनैः ॥

---

१. एकस्मिन्पुस्तके 'भट्टवल्लभस्य' इति पाठः.

यथा मम मुनिमतमीमांसायाम्—

‘आचारं भजते त्यजत्यपि मदं वैराग्यमालम्बते
कर्तुं वाञ्छति सङ्गभङ्गगलितोत्तुङ्गाभिमानं तपः ।
दैवन्यस्तविपर्ययैः सुखशिखाभ्रष्टः प्रणष्टो जनः
प्रायस्तापविलीनलोहसदृशीमायाति कर्मण्यताम् ॥’

अत्र दुर्योधनस्य घोषयात्रायां गन्धर्वबन्धपराभवभग्नाभिमानस्य प्राज्यसाम्राज्यमुत्सृज्य तपःप्रयत्नाभिनिविष्टस्य दुर्ग्रहे वर्ण्यमाने यदुक्तं सर्वो जनः सुखभ्रष्टः प्रणष्टविभवः सदाचारं भजते, मदं त्यजति, वैराग्यमाश्रयति, सङ्गभङ्गेन विगलितोत्तुङ्गाभिमानं तपः कर्तुं वाञ्छति, प्रायो बाहुल्येन तापविगलितलोहपिण्डसदृशीं कर्मण्यतामायाति, अत्रोत्पूर्वतया सोपसर्गस्य तुङ्गशब्दस्य स्वभावोन्नतिर्द्विगुणतामुपयाता दुर्मदाभिमानार्थौचित्यमुच्चैः करोति ॥

न तु यथा कुमारदासस्य[1]—

‘अयि विजहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः ॥’

अत्राभिनवान[2]ङ्गसंगमगाढमालिङ्गननिश्चलाङ्गच्छन्नाङ्गनाप्रबोधने सख्या यदुक्तं वल्लभं मुञ्च प्रभातसंध्यायामरुणकिरणोद्गमो वर्तते, कुक्कुटाश्च संप्रवदन्तीति, तत्र संप्रोपसर्गशून्यशय्या(ब्दा)पूरणमात्रेण निरर्थकत्वादनुचितमेव ॥

निपातौचित्यं दर्शयितुमाह—

उचितस्थानविन्यस्तैर्निपातैरर्थसंगतिः ।
उपादेयैर्भवत्येव सचिवैरिव निश्चला ॥ २५ ॥

---

१. भगवता पतञ्जलिमुनिना व्याकरणमहाभाष्ये ‘व्यक्तवाचां समुच्चारणे’ (१।३।४८) इति सूत्रव्याख्यायाम् ‘वरतनु संप्रवदन्ति कुक्कुटाः’ इत्यस्य श्लोकस्य चतुर्थः पाद उदाहृतः. जानकीहरणकाव्यस्य कर्ता कुमारदासः. ‘जानकीहरणं कर्तुं रघुवंशे स्थिते सति । कविः कुमारदासश्च रावणश्च यदि क्षमः ॥’ इति राजशेखरश्लोकः. जानकीहरणस्य बहून्युदाहरणान्युज्ज्वलदत्तेनोणादिसूत्रवृत्तौ दत्तानि सन्ति. २. ‘अत्राभिमाननवसंगम—’ इति द्वितीयपुस्तकपाठः.

उपादेयैश्चादिभिर्निपातैरुचितपदविनिवेशितैः काव्यस्यार्थसंगतिरसंदिग्धा सत्सहायैरिव भवति ॥

यथा मम मुनिमतमीमांसायाम्—

'सर्वे स्वर्गसुखार्थिनः क्रतुशतैः प्राज्यैर्यजन्ते जडा-
स्तेषां नाकपुरे प्रयाति विपुलः कालः क्षणार्धं च तत् ।
क्षीणे पुण्यधने स्थितिर्न तु यथा वेश्यागृहे कामिनां
तस्मान्मोक्षसुखं समाश्रयत भोः सत्यं च नित्यं च यत् ॥'

अत्र स्वर्गसुखस्य वेश्याभोगवदवसानविरसचपलतायां प्रतिपादितायां निश्चलमोक्षसुखस्य निःसंदेहनिश्चिता प्रतिपत्तिर्निपातपदोपबृंहिता वाक्यार्थौचित्यं जनयति ॥

न तु यथा श्रीचक्रस्य[1]— २४. श्रीचक्रः कविः

'देवो जानाति सर्वं यदपि च तदपि ब्रूमहे नीतिनिष्ठं
सार्धं संधाय जालान्तरधरणिभुजा निर्वृतो बान्धवेन ।
म्लेच्छानुच्छिन्धि भिन्धि प्रतिदिनमयशो रुन्धि विश्वं यशोभिः
सोदन्वन्मेखलायां परिकलय करं किं च विश्वंभरायाम् ॥'

अत्र क्षितिपतिस्तुतिप्रस्तावे 'देवो जानाति सर्वं यदपि च तदपि' इति यदुक्तं तत्र पूर्वापरपदयोरसंबद्धत्वेन निरर्थक एव निरुपयोगश्चकारः प्रततोत्सवबहुजनभोजनपङ्क्तावपरिज्ञातः स्वयमिव मध्ये समुपविष्टः पश्चादभिव्यक्तः परं लज्जादुर्मनौचित्यं प्रतनोति ॥

कालौचित्यं दर्शयितुमाह—

कालौचित्येन यात्येव वाक्यमर्थेन चारुताम् ।
जनावर्जनरम्येण वेषेणेव सतां वपुः ॥ २६ ॥

कालकृतौचित्ययुक्तेनार्थेन वाक्यं चारुतामेति वेषपरिग्रहेणेव कालयोग्येन सतामवसरज्ञानां वपुः ॥

---

१. मुक्ताकणभ्राता चक्रपाल इति कविकण्ठाभरणे. स एवायं चक्र इति भाति. मुक्ताकणश्च कश्मीरदेशोद्भूतः, आनन्दवर्धनरत्नाकरादिसमकालीनश्च.

यथा मम मुनिमतमीमांसायाम्—

'योऽभूद्गोपशिशुः पयोदधिशिरश्चौरः करीषंकष-
स्तस्यैवाद्य जगत्पते खगपते शौरे मुरारे हरे ।
श्रीवत्साङ्क जडैरितिस्तुतिपदैः कर्णौ नृणां पूरितौ
ही कालस्य विपर्ययप्रणयिनी पाकक्रियाश्चर्यभूः ॥'

अत्रामर्षविषविषमाविष्कारमुमूर्षुणा शिशुपालेनाभिधीयमाने यत्किल गोपालबालः पयोदधिशिरश्चौरः करीषंकषोऽभूत्तस्यैवाद्य जगन्नाथादिभिः स्तुतिपदैर्नृणां कर्णौ पूरितौ ही बत कालस्य विपर्ययकारिणी पाकक्रियाश्चर्यभूमिरिति । तत्राभूदितिभूतकालेनाश्चर्यपरिपोषरुचिरमारब्धाधिक्षेपलक्षणं वाक्यौचित्यं कृतम् ॥

यथा वा मालवकुवलयस्य— २५. मालव कुवलयः कवि:

'[1]च्युतसुमनसः कुन्दाः पुष्पोद्गमैरलसा द्रुमा
मनसि च गिरं गृह्णन्तीमे किरन्ति न कोकिलाः ।
अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जरठतामालम्बन्ते क्लमोदयदायिनीम् ॥'

अत्र शिशुतरवसन्तकान्तोपवननवरसोल्लाससूच्यमानमनसिजोत्कण्ठावर्णनायामृतुसंधिसमुचिताः कुन्दाः कुसुमावसानशून्यतनवः, किंशुकाशोकाः कलिकोद्गमभरालसाः, मनसि कोकिलाः कलकूजितान्यनुसंदधति, रवेर्मरीचयः शीतोल्लासमथ च निवारयन्ति न च संतापदायिनीं प्रौढतामालम्बन्ते, इत्युक्ते वर्तमानकालपदेष्वेव हृदयसंवादसुन्दरमौचित्यं किमप्यामोदते ॥

यथा वा भट्टभल्लटस्य— २६. भट्टभल्लटः कवि:

'मृत्योरास्यमिवाततं धनुरिदं मूर्छद्विषाश्चेषवः
शिक्षा सा विजितार्जुना प्रतिलयं सर्वाङ्गलग्ना गतिः ।
अन्तः क्रौर्यमहो शठस्य मधुनो हा हारि गीतं मुखे
व्याधस्यास्य यथा भविष्यति तथा मन्ये वनं निर्मृगम् ॥'

---

१. उदाहृतोऽयं श्लोको वामनवृत्तौ समताख्यगुणप्रकरणे. तस्माद्वामनात्प्राचीनोऽयं कविः.

अत्र लुब्धकस्य धनुःसायकशिक्षागतिक्रौर्यगीतानि तथा यथा वनं निर्मृगं भविष्यतीति भविष्यत्कालः प्रकृतार्थपरिपोषेण हृदयसंवादौचित्यमादधाति ॥

न तु यथा वराहमिहिरस्य— २८. वराहमिहिरः कविः

'क्षीणश्चन्द्रो[1] विशति तरणेर्मण्डलं मासि मासि
लब्ध्वा कांचित्पुनरपि कलां दूरदूरानुवर्ती ।
संपूर्णश्चेत्कथमपि तदा स्पर्धयोदेति भानो-
र्नो दौर्जन्याद्विरमति जडो नापि दैन्याद्व्यरंसीत् ॥

अत्र रवेर्मण्डलं क्षीणः शशी प्रतिमासं प्रविशति ततः कांचिदाप्यायिकां कलां प्राप्य दूरे दूरे भवति । परिपूर्णश्च तस्यैव स्पर्धयाभ्युदेति । दौर्जन्यान्न विरमति न च दैन्याद्व्यरंसीदित्येतौ 'विरमति' 'व्यरंसीत्' अतिपरस्परासंगतं कालपदद्वयं चन्द्रस्य सदृशयोर्दौर्जन्यदैन्ययोः सर्वकालमभिनिर्वृत्तयोर्यदुपन्यस्तं तत्र व्यरंसीदिति विरुद्धार्थत्वादनुचितमेव ॥

देशौचित्यं दर्शयितुमाह—

देशौचित्येन काव्यार्थः ससंवादेन शोभते ।
परं परिचयाशंसी व्यवहारः सतामिव ॥ २७ ॥

देशविषयौचित्येन हृदयसंवादिना काव्यार्थः सतां व्यवहार इव परिचयसूचकः शोभते ॥

यथा भट्टभवभूतेः— ५०. भट्टभवभूतिः

'पुरा यत्र स्रोतः पुलिनमधुना[1] तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥

अत्र बहुभिर्वर्षसहस्रैरतिक्रान्तैः शम्बुकवधप्रसङ्गेन दण्डकारण्यं रामः पूर्वपरिचितं पुनः प्रविष्टः समन्तादवलोक्यैवं ब्रूते—'पुरा यत्र नदीनां प्रवाहस्तत्रेदानीं तटम्[1], वृक्षाणां घनविरलत्वे विपर्ययश्चिराद्दृष्टं वनमिदमपूर्व-

---

१. सुभाषितावलावयं श्लोको धाराधरस्य.

मिव मन्ये, पर्वतसंनिवेशस्तु तदेवैतदिति बुद्धिं स्थिरीकरोति ।' इत्युक्ते चिरकालविपर्ययपरिवृत्तसंस्थानकाननवर्णनया हृदयसंवादी देशस्वभावः परममौचित्यमुद्द्योतयति ॥

न तु यथा राजशेखरस्य—

'कर्णाटीदशनाङ्कितः शितमहाराष्ट्रीकटाक्षाहतः
प्रौढान्ध्रीस्तनपीडितः प्रणयिनीभ्रूभङ्गवित्रासितः ।
लाटीबाहुविवेष्टितश्च मलयस्त्रीतर्जनीतर्जितः
सोऽयं संप्रति राजशेखरकविर्वाराणसीं वाञ्छति ॥'[1]

अत्र कर्णाटमहाराष्ट्रान्ध्रलाटमलयललनासंभोगसुभगः कालेन गलितरागमोहः संप्रति राजशेखरकविर्वाराणसीं गन्तुमिच्छतीत्युक्ते शृङ्गाररसतरङ्गितवराङ्गनाप्रसङ्गेऽनङ्गनिरर्गलदक्षिणापथदेशोद्देशमध्ये प्रणयिनीभ्रूभङ्गवित्रासित इति देशोपलक्षणविरहितकेवलप्रणयिनीपदेन देशौचित्यमुपचितमप्यनुचिततां नीतम् ॥

कुलौचित्यं दर्शयितुमाह—

कुलोपचितमौचित्यं विशेषोत्कर्षकारणम् ।
काव्यस्य पुरुषस्येव प्रियं प्रायः सचेतसाम् ॥ २८ ॥

पुरुषस्येव काव्यस्य कुलोन्नतमौचित्यं सविशेषोत्कर्षजनकं प्रायेण बाहुल्येन सहृदयानामभिमतम् ॥

यथा कालिदासस्य—

'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥'

अत्र 'अथ स राजा वृद्धस्तरुणाय सूनवे राज्यं प्रतिपाद्य तया देव्या सह तपोवनं भेजे । विरक्तचेतसामिक्ष्वाकूणामन्ते हि कुलव्रतमिदमेव' इत्युक्ते भूतवर्तमानभाविनां तद्वंश्यानामौचित्यमुन्मीलितम् ॥

---

१. प्रसिद्धेषु राजशेखरग्रन्थेष्वयं श्लोको न प्राप्तः.

न तु यथा यशोवर्मदेवस्य[1]—

'उत्पत्तिर्भण्डकुले यदभीष्टं तत्पदं समाक्रान्तम् ।
भोगास्तथापि दैवात्सकृदपि भोक्तुं न लभ्यन्ते ॥'

अत्र ममोत्पत्तिर्भण्डकुले समीहितपदाक्रमणं च निष्पन्नं तथापि दैवार्पितप्रियाविप्रयोगाद्भोगा भोक्तुं न लभ्यन्त इत्यभिहिते स्वसंवेद्यमेव भण्डकुलमन्यत्राप्रसिद्धं स्वयमेव निर्दिश्यमानमुत्कर्षविशेषणविरहितकेवलपदोपादानेन निरर्थकतया निरौचित्यमेव। इक्ष्वाकुकुलस्य तु निर्विशेषणत्वमुपपद्यत एव। त्रिभुवनप्रसिद्धौचित्यचरित्रत्वात् ॥

व्रतौचित्यं दर्शयितुमाह—

काव्यार्थः साधुवादार्हः सद्व्रतौचित्यगौरवात् ।
संतोषनिर्भरं भक्त्या करोति जनमानसम् ॥ २९ ॥

काव्यार्थः समुचितव्रतगौरवात्साधुवादयोग्यः संतोषपूर्णं जनमनः करोति। भक्तिर्विच्छित्तिः ॥

यथा मम मुक्तावलीकाव्ये—

'अत्र वल्कलजुषः पलाशिनः पुष्परेणुभरभस्मभूषिताः ।
लोलभृङ्गवलयाक्षमालिकास्तापसा इव विभान्ति पादपाः ॥'

अत्र तपोधनोचितव्रतव्यञ्जकवल्कलभस्माक्षसूत्रप्रणयिपादपवर्णनायामचेतनानामपि शमसमयविमलचित्तवृत्तिरौचित्यमुपजनयति ॥

न तु यथा दीपकस्य—

'पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीकपालीमादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठम् ।
द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणी सनाथो स पुनरनुदिनं तुल्यकुल्येषु दीनः ॥

अत्र वैराग्यनिरर्गलवर्णनायां भिक्षाकपालीमादाय क्षुत्क्षामः कुक्षिपूरणाय प्रवृत्तो मानी वरं द्वारं द्वारं यष्टिनिविष्टपाणिः परिभ्रान्तो न पुनरनिशं तुल्यकुल्येषु दीन इत्युक्ते सहजप्रशमविमलमानसविश्रान्तिसंतोषमुत्सृज्य

[1] द्वितीयपुस्तके श्रीहर्षदेवस्य.

२८. यशोवर्मदेवः कविः
अत्र भण्डकुलम् उत्कर्षविशेषणरहितम् उक्तम् इति अनौचित्यम्। ...
२९. दीपकः कविः

तुल्यकुल्यद्वेषविजिगीषापरमेव वाक्यं भृशमनौचित्यमुद्भावयति। वरमेतत्तीव्रतकष्टं न तु स्वजनदैन्ययाचनमिति संसारग्रन्थिबन्धाभिमानोपन्यासः॥

तत्त्वौचित्यं दर्शयितुमाह—

काव्यं हृदयसंवादि सत्यप्रत्ययनिश्चयात्।
तत्त्वोचिताभिधानेन यात्युपादेयतां कवेः॥ ३०॥

तत्त्वोचिताख्यानेन कवेः सूक्तं सत्यप्रत्ययस्थैर्यात्संवादि गृह्यतां याति॥

यथा मम बौद्धावदानलतिकायाम्—

'दिवि भुवि फणिलोके शैशवे यौवने वा
जरसि निधनकाले गर्भशय्याश्रये वा।
सहगमनसहिष्णोः सर्वथा देहभाजां
नहि भवति विनाशः कर्मणः प्राक्तनस्य॥'

अत्र प्राक्तनस्य कर्मणस्त्रैलोक्ये शैशवयौवनवृद्धत्वावस्थासु देहिनां सह गमने समर्थत्वान्न विनाशोऽस्तीत्युक्ते निःसंशयसकलजनहृदयसंवादितत्त्वाख्यानमौचित्यं ख्यापयति॥

न तु यथा माघस्य—

'बुभुक्षितैर्व्याकरणं न भुज्यते न पीयते काव्यरसः पिपासितैः।
न विद्यया केनचिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फलाः कलाः॥'

अत्रार्यार्थार्थितापरत्वेन धनमेवार्जय, क्षुधितैर्व्याकरणं न भुज्यते, न च काव्यरसः पिपासितैः पीयते, न च विद्यया कुलं केनचिदुद्धृतमित्युक्ते सर्वमेतद्दारिद्र्यदैन्यविद्रुतधैर्यकातरतया तत्त्वविरहितं विपरीतमुपन्यस्तमनौचित्यं सुयुक्तमेव। विद्यानामेव सर्वसंपत्प्रसविनीनां कुलोद्धरणक्षमत्वं नान्यस्य॥

सत्त्वौचित्यं दर्शयितुमाह—

चमत्कारं करोत्येव वचः सत्त्वोचितं कवेः।
विचाररुचिरोदारचरितं सुमतेरिव॥ ३१॥

सत्त्वोचितं कवेर्वचश्चमत्कारं करोति। सुमतेरिव विचार्यमाणं रुचिरमुदारचरितम्॥

१. माघकृते प्रसिद्धे शिशुपालवधाभिधे काव्ये नायं श्लोकः.

यथा मम चित्रभारते नाटके—

‘नदीवृन्दोद्दामप्रसरसलिलापूरिततनुः
स्फुरत्स्फीतज्वालानिबिडवडवाग्निक्षतजलः।
न दर्पं नो दैन्यं स्पृशति बहुसत्त्वः पतिरपा-
मवस्थानां भेदाद्भवति विकृतिर्नैव महताम् ॥’

अत्र पयोधिव्यपदेशेन युधिष्ठिरस्य सत्त्वोत्कर्षेऽभिधीयमाने सरित्पूर-प्रवर्धिततनुर्वडवाग्निनिष्पीतश्च नोत्सेकं न संकोचमब्धिर्विपुलसत्त्वः स्पृशति। न ह्यवस्थानां भेदान्महाशयानां विकारो भवतीत्युक्ते गम्भीरधीरा सत्त्ववृत्तिरौचित्यमातनोति ॥

न तु यथा भट्टेन्दुराजस्य[1]—

‘आश्चर्यं वडवानलः स भगवानाश्चर्यमम्भोनिधि-
र्यत्कर्मातिशयं विचिन्त्य मनसः कम्पः समुत्पद्यते।
एकस्याशयघस्मरस्य पिबतस्तृप्तिर्न जाता जलै-
रन्यस्यापि महात्मनो न वपुषि स्वल्पोऽपि जातः श्रमः ॥’

अत्र वडवानलसमुद्रयोः सत्त्वमहत्त्वे वक्ष्यमाणे नातिविपुलाशयत्वादेकस्य पिबतः पयोभिस्तृप्तिर्न जाता, द्वितीयस्य तदुपजीव्यमानस्य न मनागपि खेदः, तदेतदुभयमाश्चर्यमित्युक्ते निःसंतोषतया सततया च कस्य न वडवाग्नेर्लज्जा। न च जलनिधेराश्रितैकार्थिपूरणसामर्थ्यमित्यसत्त्वे सत्त्वस्तुतिरनौचित्यमावहति ॥

अभिप्रायौचित्यं दर्शयितुमाह—

अकदर्थनया सूक्तमभिप्रायसमर्पकम्।
चित्तमावर्जयत्येव सतां स्वस्थमिवार्जवम् ॥ ३२ ॥

अक्लेशेनाभिप्रायसमर्पकं काव्यं हृदयमावर्जयति। सज्जनानां निर्मलमार्जवमिव ॥

---

१. श्रीमदभिनवगुप्ताचार्यस्य गुरुर्भट्टेन्दुराजः.

यथा दीपकस्य—

'श्येनाङ्घ्रिग्रहदारितोत्तरकरो ज्याङ्कप्रकोष्ठान्तर
आताम्राधरपाणिपादनयनप्रान्तः पृथूरःस्थलः ।
मन्येऽयं द्विजमध्यगो नृपसुतः कोऽप्यम्ब निःशम्बलः
पुत्र्येवं यदि कोष्ठमेतु सुकृतैः प्राप्तो विशेषातिथिः ॥'

अत्र स्वैररमणी रमणीयं दिनावसाने युवानं पथिकमालोक्याभिप्रायसूचकं जननीमेवं ब्रूते । यदसौ राजपुत्राकृतिः श्येनग्रहनाराचपरिचयोचितः सायं समये प्राप्त इत्युक्ते मात्राप्यभिप्रायपूरकमभिहितम् । पुत्रि यद्येवं तत्कोष्ठाङ्कं प्रविशतु सुकृतैर्विशेषोऽतिथिः प्राप्तः पूज्य इत्येतेन स्फुटाभिप्रायसूचकमौचित्यमुपचितमाचकास्ति ॥

न तु यथास्यैव—

'अयि विरहविचित्ते भर्तुरर्थे तथार्ता
सपदि निपतिता त्वं पादयोश्चण्डिकायाः ।
स्वयमुपहितधूपस्थालकच्छत्रशृङ्गो-
द्दलितमपि ललाटं येन नैवाललक्षे ॥'

अत्र विनयवत्याः सुचिरात्पत्यावागते ललाटनखोल्लेखापह्नववचने सख्या समुपदिश्यमाने हे विरहोन्मत्ते भर्तुरर्थे चण्डिकापादपतने स्वयं स्थापितधूपस्थालकोटिक्षतमपि न लक्षितं भवत्या ललाटमित्युक्तौ स्वैरापह्नवशिक्षामात्रमेवोपलक्ष्यते । न तु तस्याः सख्या वा कश्चिदभिप्रायविशेषः ॥

स्वभावौचित्यं दर्शयितुमाह—

स्वभावौचित्यमाभाति सूक्तीनां चारुभूषणम् ।
अकृत्रिममसामान्यं लावण्यमिव योषिताम् ॥ ३३ ॥

स्वभावोचितत्वं कविवाचामाभरणमाभाति । अकृत्रिममनन्यसामान्यं लावण्यमिव ललनानाम् ॥

यथा मम मुनिमतमीमांसायाम्—

'कर्णोत्तालितकुन्तलान्तनिपतत्तोयक्षणासङ्गिना
हारेणेव वृतस्तनी पुलकिता शीतेन सीत्कारिणी ।

---

१. 'प्रकोष्ठान्तिकः' इति द्वितीयपुस्तकपाठः. द्वितीयपादे 'चाताम्राधर—' इति पाठो युक्तः.

निर्धौताञ्जनशोणकोणनयना स्नानावसानेऽङ्गना
प्रस्यन्दत्कबरीभरा न कुरुते कस्य स्पृहार्द्रं मनः ॥'

अत्र व्याससूनोः शुकस्य गाढवैराग्यनिःसङ्गस्य गगनगङ्गातीरे स्नानोत्तीर्णास्त्रिदशयोषितो विवसनास्तद्दर्शननिःसंकोचाः पश्यतः प्रशमविमलमनसः स्मरव्यतिकरनिर्विकारतायां प्रतिपाद्यमानायां कर्णमूलोत्क्षिप्तालकपर्यन्तनिपतत्तोयकणसंतानेन स्तनयोः कृतमुहूर्तहारविभ्रमा, शीतेन रोमाञ्चसीत्कारिणी, धौताञ्जनारुणनयनान्ता, प्रस्रवन्मुक्तकेशकलापा, स्नानोत्तीर्णा, तरुणी कस्य स्पृहार्द्रं न मनः करोतीत्युक्ते स्वयमार्द्रस्वभावः परमप्यार्द्रीकरोतीत्युचितमेतत् ॥

न तु यथा मम तत्रैव—

'भक्तिः कातरतां क्षमा सभयतां पूज्यस्तुतिर्दीनतां
धैर्यं दारुणतां मतिः कुटिलतां विद्याबलं क्षोभताम् ।
ध्यानं वञ्चकतां तपः कुहकतां शीलव्रतं षण्ढतां
पैशुन्यव्रतिनां गिरां किमिव वा नायाति दोषार्द्रताम् ॥'

अत्र पिशुनस्वभावे वर्ण्यमाने भक्त्यादीनां गुणानां वैपरीत्ये प्रतिपादिते पिशुनानां वचसां किं वा दोषार्द्रतां नायातीत्यभिहिते स्वयमनार्द्रस्वभावस्य परार्द्रीकरणमनुचितमेव ॥

सारसंग्रहौचित्यं दर्शयितुमाह—

सारसंग्रहवाक्येन काव्यार्थः फलनिश्चितः ।
अदीर्घसूत्रव्यापार इव कस्य न संमतः ॥ ३४ ॥

सारसंग्रहवाक्येन काव्यार्थः सुनिश्चितफलः शीघ्रकारिण इव व्यापारः कस्य नाभिमतः ॥

यथा मम मुनिमतमीमांसायाम्—

'विविधगहनगर्भग्रन्थसंभारभारे-
र्मुनिभिरभिनिविष्टैस्तत्त्वमुक्तं न किंचित् ।

कृतरुचिरविचारं सारमेतन्महर्षे-
रहमिति भवभूमिर्नाहमित्येव मोक्षः ॥'

अत्र भगवद्गीतार्थविचारे सारसंग्रहोऽभिहितः, यत्किल मुनिभिरनेकभेदभिन्नशास्त्रजडैरभिनिविष्टमतिभिस्तत्त्वमुपादेयं न किंचित्कथितम् । भगवतो महर्षेर्व्यासस्य सुमतेर्विमलविचारोत्तीर्णं निश्चितमेतदेव । यदहंकारः संसारमूलभूमिर्ममतापरित्याग एव मोक्ष इति तत्संक्षेपेण भवक्षयोपदेशः प्रकृतार्थस्य परममौचित्यं पुष्णाति ॥

न तु यथा परिव्राजकस्य—

'तपो न तप्तं वयमेव तप्ता भोगा न भुक्ता वयमेव भुक्ताः ।
जरा न जीर्णा वयमेव जीर्णास्तृष्णा न याता वयमेव याताः ॥'

अत्र वयमेव तप्ता भुक्ता जीर्णा याता इत्युक्ते निःसाराचारुत्वादपर्यवसितो वाक्यार्थः फलशून्यतया सारसंग्रहोचितं न किंचित्प्रतिपादयति ॥

प्रतिभौचित्यं दर्शयितुमाह—

प्रतिभाभरणं काव्यमुचितं शोभते कवेः ।
निर्मलं सुगुणस्येव कुलं भूतिविभूषितम् ॥ ३५ ॥

प्रतिभालंकृतं कवेः काव्यमुचितं गुणवतः कुलमिव विमलं लक्ष्म्या प्रकाशितं शोभते ॥

यथा मम लावण्यवत्याम्—

'अदय दशसि किं त्वं बिम्बबुद्ध्याधरं मे
भव चपलनिराशः पक्वजम्बूफलानाम् ।
इति दयितमवेत्य द्वारदेशाप्तमन्या
निगदति[1] शुकमुच्चैः कान्तदन्तक्षतौष्ठी ॥'

अत्र कयापि द्वारदेशाप्तं प्रियं ज्ञात्वा अन्यकामुकदशनखण्डितौष्ठ्या संप्रति तदागमनानभिज्ञयेव शुकमुद्दिश्य यदुक्तं निर्दय किं त्वं बिम्बफललोभादधरं मम विदारयसि । पक्वानां जम्बूफलानामिदानीं चपलनिराशो

१. द्वितीयपुस्तके 'न्यगदत' इति पाठः.

मम । कुपिता तुभ्यं नो दास्यामीति तेनोच्चैः प्रत्यायनापह्नवनवोन्मेषप्रज्ञा-चातुर्यचारुवचनमौचित्यचमत्कारं करोति ॥

यदाह भट्टतौतः[1]—'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति ॥

न तु यथा मम तत्रैव—

'निर्याते दयिते गृहे विशयने निर्माल्यमाल्ये हृते
प्राप्ते प्रातरसह्यरागिणि परे वारावहारेऽन्यया ।
द्वारालीनविलोचना व्यसनिनी सुप्ताहमेकाकिनी-
त्युक्त्वा नीविविकर्षणैः स चरणाघातैरशोकीकृतः ॥'

अत्र वेश्या व्यालग्नकामुकस्य वारावहारं विधाय नवकामुकेन सह क्षणायां [नीतायां] प्रभाते तस्मिन्निर्याते शय्याकुसुमादिसंभोगलक्षणे निवारिते वारवञ्चनकुपिते गाढानुरागग्रहग्रस्तमतौ पूर्वकामुके प्राप्ते त्वदालोकनकाङ्क्षिणी व्यसनिनी द्वारन्यस्तनयनाहमेकाकिनी सुप्तेति प्रत्यायनावचनविलीनमन्युसुरभससरसनीविकर्षणोद्यताकृतिकृतेर्ष्याकोपया चरणनलिनप्रहारैरशोकीकृतः । शङ्काशल्योन्मूलनान्निःशोकः संपादितः । संततपुलकाङ्कुरत्वादशोकतरुतुल्यतां नीत इति वा वाक्यार्थः । केवलसत्यविप्रलम्भप्रागल्भ्यमात्रमेव गणिकाया गाढरागमूलतां च प्रतिपादयति । न तु प्रतिभोद्भूतामौचित्यकणिकां सूचयति ॥

अवस्थौचित्यं दर्शयितुमाह—

**अवस्थोचितमाधत्ते काव्यं जगति पूज्यताम् ।
विचार्यमाणरुचिरं कर्तव्यमिव धीमताम् ॥ ३६ ॥**

अवस्थोचिततया काव्यं जगति श्लाघ्यतामायाति । मतिमतामिव कृत्यं विचारनिर्घर्षरुचिरम् ॥

यथा मम लावण्यवत्याम्—

'मुक्तः कन्दुकविभ्रमस्तरलता त्यक्तैव बाल्योचिता
मौग्ध्यं निर्धुतमाश्रिता गजगतिर्भ्रूलास्यमभ्यस्यते ।

1. अभिनवगुप्ताचार्यस्योपाध्यायो भट्टतौतः.

यन्नर्मोर्मिषु[1] निर्मितं मृगदृशा वैदग्ध्यदिव्यं वच-
स्तद्विघ्नः सुभगाभिमानलटभाभावे[2] निबद्धो भरः ॥'

अत्र यदुक्तं कन्दुकक्रीडा त्यक्ता, बालचापल्यं परिहृतम्, मौग्ध्यं निरस्तम्, गजगतिरङ्गीकृता, भ्रूलतालास्याभ्यासः क्रियते, नर्मोर्मिषु वचनवैचित्र्यमासूत्रितम्, तेन जानीमहे शैशवावस्थां समुत्सृजन्त्या यौवनमाश्रयन्त्या प्रौढतामनारूढयापि नवसंभोगगौरवगर्भेण सुभगाभिमानेन लटभाभावे बालया भरो निबद्ध इत्यभिहिते स्फुटमृदुसंबद्धा(?)[3] वयोवस्थामध्यसंधिवर्णनायामौचित्यं स्फुरदिवावभासते ॥

न तु यथा राजशेखरस्य—

'ज्यायान्धन्वी नवधृतधनुस्ताम्रहस्तोदरेण
क्षत्रक्षोदव्यतिकरपटुस्ताटकाताडकेन ।
कर्णाभ्यर्णस्फुरितपलितः क्षीरकण्ठेन सार्धं
योद्धुं वाञ्छन्न कथममुना लज्जते जामदग्न्यः ॥'

अत्र भार्गवः स्थविरावस्थास्थितः स्थिरतरपराक्रमकर्कशप्रौढो धनुर्धरः शिशुना रामेण धनुर्ग्रहणाहणितकोमलकरकमलतलेन क्षत्रियक्षयसंरम्भप्रगल्भस्ताटकाताडकेन स्फुरदाकर्णपलितः संभाव्यमानजननीस्तनक्षीरकण्ठेनामुना युयुत्सुः कथं न लज्जत इत्युक्ते पेशलतया राघवावस्थायां जामदग्न्यावस्थाविपरीतायां प्रतिपाद्यमानायां ताटकाताडकेनेति विरुद्धाधिवासोऽर्थः किमप्यनौचित्येन चेतसि संकोचमादधाति ॥

विचारौचित्यं दर्शयितुमाह—

उचितेन विचारेण चारुतां यान्ति सूक्तयः ।
वेद्यतत्त्वावबोधेन विद्या इव मनीषिणाम् ॥ ३७ ॥

विचारौचित्येन सूक्तयश्चारुतां यान्ति । ज्ञेयस्वरूपज्ञानेन विद्या इव विदुषाम् ॥

---

१. 'नर्मोक्तिषु' इति द्वितीयपुस्तकपाठः. २. प्रगल्भाङ्गनाभावे. ३. 'स्फुटधिया' इति द्वितीयपुस्तकपाठः.

यथा मम मुनिमतमीमांसायाम्—

'अश्वत्थामवधाभिदानसमये सत्यव्रतोत्साहिना
मिथ्या धर्मसुतेन[1] जिह्मवचसा हस्तीति यद्व्याहृतम्।
सा सत्यामृतरश्मिवैरमसमं संसूचयन्त्याः सदा
शङ्के पङ्कजसंश्रयेण मलिनारम्भा विजृम्भा श्रियः॥'

अत्र द्रोणनिधनाख्याने सत्यव्रतोत्साहवता धर्मतनयेनापि मिथ्या लघुवचसा कुञ्जर इति यदुक्तं सा सततं सत्यचन्द्रद्वेषं सूचयन्त्याः श्रियः शङ्के पङ्कजसंश्रयेण मलिनव्यापारा विजृम्भेत्यभिहिते ससंवादलक्ष्मीस्वभावपरिभावनतया तत्त्वावबोधेन मूलविश्रान्त्या फलपर्यवसायी विचारः सहृदयसंवेद्यमौचित्यं व्यनक्ति॥

न तु यथा मम तत्रैव—

'प्रम्लाने चिरकालवृत्तदयिताकेशाम्बराकर्षणे
क्रूरं राक्षसवैशसं यदि कृतं भीमेन दुःशासने।
तत्कालक्षमिणा कुशाश्मपरुषारण्यप्रवासे चिरं
किं पीतं तततापमग्नमहिषस्वेदाम्बुपृक्तं पयः॥'

अत्र भीमसेनचरिते विचार्यमाणे त्रयोदशवर्षपर्युषिते कृष्णाकेशाकर्षणपराभवे भीमेन भीमं राक्षसकर्म दुःशासने यदि कृतं तत्सद्यःकृतार्द्रापराधकालक्षमिणा सुचिरं दर्भसूचीविषमाश्मपरुषवनवासे किं ग्रीष्मतापनिमग्नमहिषस्वेदस्रुतिपृक्तं पयः पीतमित्यनुपपन्नकृत्येऽभिहिते कारणविविचाराभावान्निर्मूलोपालम्भमात्रमनौचित्यमनुबध्नाति॥

नामौचित्यं दर्शयितुमाह—

नाम्ना कर्मानुरूपेण ज्ञायते गुणदोषयोः।
काव्यस्य पुरुषस्येव व्यक्तिः संवादपातिनी॥ ३८॥

काव्यस्य कर्म औचित्यं तेन नाम्ना पुरुषस्येव गुणदोषव्यक्तिः संवादिनी ज्ञायते॥

---

१. 'धर्मस्यापि सुतेन' इति द्वितीयपुस्तकपाठः.

यथा कालिदासस्य—

'इदमसुलभवस्तुप्रार्थनादुर्निवारः
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
किमुत मलयवातान्दोलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥'

अत्र प्रारम्भ एव ममेदं मनः पञ्चबाणः सुदुर्लभवस्तुप्रार्थनादुर्निवारः शकलीकरोति । किमुत लीलोद्यानसहकारैर्मलयानिलान्दोलितबालपल्लवैरङ्कुरेषु दर्शितेष्वित्युक्ते मदनस्य पञ्चबाणाभिधानमुचितमेव ॥

यथा वा मम बौद्धावदानलतायाम्—

'तारुण्येन निपीतशैशवतया सानङ्गशृङ्गारिणी
तन्वङ्ग्या सकलाङ्गसङ्गमसखी भङ्गिर्नवाङ्गीकृता ।
निःसंरम्भपराक्रमः पृथुतरारम्भाभियोगं विना
साम्राज्ये जगतां यया विजयते देवो विलासायुधः ॥'

अत्र यौवननिपीतशैशवतया तन्वङ्ग्यानङ्गश्रृङ्गारवती सर्वाङ्गसंगमसखी सा काप्यभिनवा भङ्गिरङ्गिकृता यया निष्प्रयत्नपराक्रमः प्रभूततरारम्भसंभारं विहाय त्रिभुवनसाम्राज्ये जयति देवो विलासायुध इत्युक्ते कामस्य विलासायुध इति नामोपपन्नमेव । तन्वङ्गीभङ्ग्यैव सिद्धत्रैलोक्याधिपत्यविजिगीषायां कामसायकादीनां नैरर्थक्यात् ॥

न तु यथा कालिदासस्य—

'क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥'

अत्र पश्यतो भगवतस्त्रिनेत्रस्य स्मरशरनिपातक्षोभे वर्ण्यमाने तन्निकारकोपप्रशमाय संहर संहर प्रभो क्रोधमिति यावद्वचः खे देवानां चरंति तावद्भवनेत्रोद्भवः स वह्निर्मदनं भस्मराशिशेषमकार्षीदित्युक्ते संहारावसरे रुद्रस्य भवाभिधानमनुचितमेव ॥

आशीर्वचनौचित्यं दर्शयितुमाह—

पूर्णार्थदातुः काव्यस्य संतोषितमनीषिणः ।
उचिताशीर्नृपस्येव भवत्यभ्युदयावहा ॥ ३९ ॥

संपूर्णार्थसमर्पकस्य संतोषितविदुषः काव्यस्य नृपतेरिवोचितमाशीः-पदमभ्युदयवाहं भवति ॥

यथास्मदुपाध्यायगङ्गकस्य[1]— 38. गंगकः कविः (क्षेमे उपाध्यायः)

'स कोऽपि प्रेमार्द्रः प्रणयपरिपाकप्रचलितो
विलासोऽक्ष्णां देयात्सुखमनुपमं वो मृगदृशाम् ।
यदाकूतं दृष्ट्वा पिदधति मुखं तूणविवरे
निरस्तव्यापारा भुवनजयिनः पञ्च विशिखाः ॥'

अत्र स कोऽप्यसामान्यप्रेमप्रणयविश्रान्तिप्रगल्भकुरङ्गदृशां निरुपमो नयनविलासः सुखं वो देयात् । यदभिप्रायमालोक्य भुवनजयिनः कामस्य पञ्च सायकाः समाप्तव्यापारास्तूणीरविवरे लज्जयेव मुखं पिदधतीत्युक्ते सुखं वो देयादित्याशीःपदमुचितमेव । प्रियानयनविभ्रमस्य सुखार्पणयोग्यत्वात् ॥

यथा वा मम वात्स्यायनसूत्रसारे— इदमपि पुस्तकं क्षेमे रचितम्

'कामः कामं कमलवदनानेत्रपर्यन्तवासी
दासीभूतत्रिभुवनजनः प्रीतये जायतां वः ।
दग्धस्यापि त्रिपुररिपुणा सर्वलोकस्पृहार्हां
यस्याधिक्यं रुचिरतितरामञ्जनस्येव याता ॥'

अत्र कामः प्रीतये वो जायतां यस्य दग्धस्याप्यञ्जनस्येवाधिक्यं रुचिरतीत्युक्ते प्रीतये जायतामित्युचितं कामस्य प्रीत्यात्मकत्वात् ॥

न तु यथामरुकस्य— उ...कोऽमरकेण भिन्नः स एव वा?

'आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां सीकरैः ।

---

१. क्षेमेन्द्रस्योपाध्यायो गङ्गकः.

तन्वङ्ग्याः सुतरां रतान्तसमये वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरस्कन्दादिभिर्दैवतैः ॥'

अत्र तन्व्या रतिव्यत्यये लोलालकं चलत्कुण्डलं स्वेदसलिलेन किंचिदुन्मृष्टतिलकं यन्मुखं तत्त्वां पातु, किं हरिहरस्कन्दादिभिर्दैवतैरित्युक्ते पातु त्वामित्यनुचितम्, आनन्दयतु त्वामित्युचितं स्यात्। अन्येषु काव्याङ्गेष्वनयैव दिशा स्वयमौचित्यमुत्प्रेक्षणीयम्। तदुदाहरणान्यानन्त्यान्न प्रदर्शितानीत्यलमतिप्रसङ्गेन ॥

आसीत्प्रकाशेन्द्र इति प्रकाशः काश्मीरदेशे त्रिदशेश्वरश्रीः।
अभूद्गृहे यस्य पवित्रसत्रमच्छिन्नमग्रासनमग्रजानाम् ॥
यः श्रीस्वयंभूभवने विचित्रे लेप्यप्रतिष्ठापितमातृचक्रः।
गोभूमिकृष्णाजिनवेश्मदाता तत्रैव काले तनुमुत्ससर्ज ॥
तस्यात्मजः सर्वमनीषिशिष्यः श्रीव्यासदासापरपुण्यनामा।
क्षेमेन्द्र इत्यक्षयकाव्यकीर्तिश्चक्रे नवौचित्यविचारचर्चाम् ॥
श्रीरत्नसिंहे सुहृदि प्रयाते शार्वं पुरं श्रीविजयेशराज्ञि।
तदात्मजस्योदयसिंहनाम्नः कृते कृतस्तेन गिरां विचारः ॥

यस्यासिः परिवारकृत्त्रिभुवनप्रख्यातशीलश्रुतेः
सर्वस्यावनतेन येन नितरां प्राप्ता विशेषोन्नतिः।
आशाः शीतलतां नयत्यविरतं यस्य प्रतापानल-
स्तस्य श्रीमदनन्तराजनृपतेः काले किलायं कृतः ॥

इति श्रीप्रकाशेन्द्रात्मजव्यासदासापराख्यश्रीक्षेमेन्द्रकृता
औचित्यविचारचर्चा समाप्ता।

---

१. 'तन्व्या यत्सुरतान्तताान्तनयनम्' इत्यमरुशतकपुस्तकेषु पाठः.

	कि.	ट. ख.
सकृत, मल्लिनाथकृत संजीविनी टीकेसहित	।=	०–
,, इंग्रजी टीपांसहित	।।।	०–॥
यमुनाष्टक-शंकराचार्यकृत	०।	०॥
रघुवंश काव्य-कालिदासकृत, मल्लिनाथकृत संजीविनी टीकेसहित	१॥	०≡॥
,, (सूक्ष्माक्षर) ...	।।।	०=
रत्नसमुच्चय	०=	०॥
रत्नावली नाटिका-श्रीहर्षदेवकृत...	।=	०–
,, इंग्रजी टीपांसहित	॥	०–
रसिकाष्टक काव्य-नारायणभट्ट पर्वणीकरकृत	०॥	०॥
रामगीता व रामगीतामाहात्म्य	०।।।	०॥
रामचंद्रिका (गुंजीकरकृत संस्कृत शब्दरूपावलि)...	।	०॥
रामरक्षास्तोत्र	०॥	०॥
रामस्तवराजस्तोत्र ...	०–	०॥
रामायण-वाल्मीकिकृत, रामकृत तिलकटीकेसहित	८	।।।=
रुद्र...	०।।।	०॥
लघुकौमुदी-वरदराजकृत	०≡	०–
लघुयोगवासिष्ठ, आत्मसुखकृत वासिष्ठचंद्रिका टीकेसहित ...	५	॥
लक्ष्मीस्तोत्र-अगस्त्यकृत	०॥	०॥
वेदांतसार-हें नृसिंहसरस्वति स्वामिकृत सुबोधिनी टीका व रामतीर्थविरचित विद्वन्मनोरंजनी टीका या दोन टीकांसहित कर्नल जे. ई. जेकब यांनीं पाठांतरें व इंग्लिश नोट्स देऊन तपासलें आहे.	१॥	०=॥

	कि.	ट. ख.
विक्रमोर्वशी नाटक-कालिदासकृत, रंगनाथकृत प्रकाशिका टीकेसहित...	।।।	०–
विदुरनीति, सटीक ...	।=	०॥
श्रीविष्णोर्नामसहस्रम्	।=	०–
विष्णुसहस्रनाम (सा.)	०–	०॥
,, (रेशमी पुट्ठा)...	०=॥	०॥
,, मोठ्या अक्षराचें (सा.)	०–॥	०॥
विष्णुसहस्रनामावलि ...	०–।	०॥
,, (रेशमी पु०) ...	०=॥	०॥
वृत्तरत्नाकर-केदारभट्टकृत, नारायणपण्डितकृत टीकेसहित, श्रुतबोध-कालिदासकृत, व छन्दोमञ्जरी-गङ्गादासकृत... ...	।।।	०
वैदिककोश-भट्टभास्करकृत, निघंटु व चार परिशिष्टें यांसुद्धां ...	॥	०–
वैराग्यशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित	।।॥	०॥
शब्दरूपावलि (गुंजीकरकृत)...	०–	०॥
शिवसहस्रनामावलि (साधी)	०–॥	०॥
,, (रेशमी पुट्ठा)	०≡	०॥
शिवकवच	०।।।	०॥
शुक्लयजुर्वेदीयरुद्राष्टाध्यायी (स्थूलाक्षर)	०≡	०॥
शिवगीता (साधी) ...	।।।	०–
शिवगीता (रेश० पु०)	।=।	०–

	कि.	ट. ख.
,, लक्ष्मीनरहरिसूनुकृत बालानंदिनी टीका व शंकराचार्यकृत कालभैरवाष्टक यांसहित	१	०=
शिवतांडवस्तोत्र-दशकंठकृत, माधवानंदकृत टीकेसहित	०८	०॥
शिवमहिम्नस्तोत्र-पुष्पदंतकृत	०।॥	०॥
शिवापराधक्षमापनस्तोत्र-शंकराचार्यकृत	०॥	०॥
शिशुपालवध काव्य-माघकृत, मल्लिनाथकृत सर्वंकषा टीकेसहित	३	।८
शितलाष्टक	०।	०॥
शृङ्गारशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित	०≡॥	०॥
सत्यनारायण पूजा व कथा	०८	०॥
सारस्वतव्याकरणपूर्वार्ध (कापडी बाइंडिंग)	।८	०८
सप्तशती (चंडीपाठ), देवीसूक्त व तीन रहस्यें यांसहित (स्थूलाक्षर रेशमी पुठ्ठा)	।॥।	०=॥
सप्तशती (रे. पु. म. अ.)	।८	०८
,, (साधी कागदी)	०≡	०८
,, (मध्यमाक्षर सुटी प्रत)	०=	०८
,, (सूक्ष्माक्षर रे. पु.)	।।	०॥
,, (स्थूलाक्षर सुटी प्रत)	॥=	०=
समयोचितपद्यमालिका	।=	०८
समासचक्र	०।॥	०॥
सर्वपूजा	०८	०॥
सिद्धांतकौमुदी-भट्टोजी दीक्षितकृत, अष्टाध्यायीसूत्रपाठ, गणपाठ, धातुपाठ, लिंगानुशासन व शिक्षा आणि सूत्रानुक्रमणी यांसहित	२	।८
सुभाषितरत्नभांडागार	३॥	।=
सूर्यसहस्रनामावलि ...	०८॥	०॥
,, (रे. पुठ्ठा) ...	०≡	०॥
सौर	०॥	०॥
स्वानुभवाष्टक-गोपीनाथ दाधीचकृत, स्वकृत सारबोधिनी टीकेसहित	०८	०॥
स्वात्मनिरूपण	।।	०।
हर्षचरित-बाणभट्टकृत, शंकरकृत संकेतटीकेसहित	२	०=
हितोपदेश-नारायणपंडितकृत	॥।	०८
(इंग्रजी टीपांसहित)	१	०८॥
हिरण्यकेशीय (आपस्तंबीय) नित्यविधि	०≡	०८

नामलिंगानुशासन.

(अमरकोश.)

हें पुस्तक आजपर्यंत बहुतेकांनीं सटीक व मूळ असें छापून प्रसिद्ध केलें व करीतही आहेत, त्यावरून, केवळ याचें नांव ऐकून लोकांस महत्त्व वाटणार नाहीं, परंतु हें तसें नसून केवळ मूळमात्रच आहे खरें, तथापि याच्या प्रतिश्लोकांत येणारीं ज्या ज्या वस्तूंचीं नांवें असतील तीं दरपृष्ठांत त्या त्या ओळीच्या बाजूस मराठींत दिलीं आहेत. व कोणच्या वस्तूचीं किती हें समजण्याकरितां बाजूस अंकही दिला आहे. लवकर ध्यानांत येण्याकरितां विशेषनांवें तेवढीं जाड ठेवून बाकी मजकूर बारीक